

एकवीरा



लेखकः

विश्वनाथ सत्यनारायणः

अनुवादकः

श्री ति. गु. वसन्तलक्ष्मीः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्-गुजरातम्

Shree Somnath Sanskrit University-Veraval-Gujarat

2013

॥एकवीरा॥

प्रधानसम्पादकः

प्रो. वेम्पटि कुटुम्बशास्त्री

लेखकः

तेलुगुमूलम्

ज्ञानपीठ पुरस्कृतः कविसम्राट

विश्वनाथ सत्यनारायणः

संस्कृतानुवादः

श्री ति. गु. वसन्तलक्ष्मीः

प्रकाशनम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

जूनागढजनपदम्, गुजरातम् - ३६२ २६६.

दूरभाषः - ०२८७६ - २४४५२८, २९, ३२ फेक्स : २४४४१७

e-mail : sssu.veraval@gmail.com,

www.shreesomnathsanskrituniversity.info

प्रकाशकः -

डॉ. दशरथः जादवः

कुलसचिवः

श्रीसोमनाथसंस्कृतयुनिवर्सिटी-वेरावलम्

युनिवर्सिटी रोड, वेरावलम् - ३६२ २६५

जुनागढजनपदम् (गुजरात)

प्रथमं संस्करणम्

फरवरी, २०१३

प्रतयः

३००

ISBN

978-93-83097-07-4

मूल्यम्

रु. १००/-

मुद्रकः

एच. के ओफसेट, वेरावलम्

।। शुभाशंसनम् ।।

विद्यायाः प्रकाशनं बहुविधं भवति। कदाचित् अध्यापनेन, कदाचित् अध्ययनेन, कदाचित् प्रवचनेन च। परन्तु उपर्युक्ताः प्रकाशनमार्गाः अपेक्षितविद्याप्रकाशनं न कुर्वन्ति यावद्ग्रन्थप्रकाशनं विद्याप्रकाशनं जने–जने करोति। अत एवोक्तम् ''पुस्तकी भवति पण्डितः''। अर्थात् यस्य पार्श्वे पुस्तकानि बहूनि विविधानि च भवन्ति स पण्डितो भवति। श्रीसोमनाथसंस्कृतविश्वविद्यालयः एकत्र तु संस्कृतभाषायाः प्रचारप्रसारक्षेत्रे समर्पितकालो वर्तते तदाऽन्यत्र नूतनसाहित्यसर्जनां कारयितुं तस्याश्च प्रकाशनं कारयितुं दत्तावधानोऽस्ति। अस्मिन्नेव शुभे पुण्ये च सन्दर्भे **'उज्जयिनीनगरे'** आयोजिते **''संस्कृतसाहित्योत्सवे'** श्रीसोमनाथसंस्कृतविश्वविद्यालयः बहूनां ग्रन्थानां प्रकाशनं करोति। अध्यापकानां छात्राणां च कृते **श्री विश्वनाथ सत्यनारायणः** रचितोऽयं **श्री ति. गु. वसन्तलक्ष्मीः** अनुदितोऽयं **एकवीरा** नामधेयः ग्रन्थोऽयं महते लाभाय भविष्यति। अस्य ग्रन्थस्य प्रसाराय अहं शुभाशंसनं प्रकटीकरोमि।

।। जयतु सोमनाथः जयतु संस्कृतम् ।।

प्रो. वी. कुटुम्बशास्त्री

कुलपतिः

नमस्तुरगवक्त्राय सर्वविद्याप्रदायिने।

अज्ञानध्वान्तसंहर्त्रे वागीशायामितात्मने।

सः निदाघकालः। परिक्षीणा वैगैनदी प्रोषितभर्तृका इव कृशा वर्तते। तस्याः नद्याः प्रभवस्य कारणभूता काचित् कथा श्रूयते, या खलु मथुरानगरे विराजमानयोः मीनाक्षीसुन्दरेश्वरयोः विवाहसम्बन्धिनी। देवी मीनाक्षी पाण्ड्यराजस्य पुत्री, देव्याः पार्वत्याः अंशावतारः च आसीत्। जन्मनः प्रभृति सा लोकनायकम् आदिभिक्षुं च सुन्दरेश्वरं पतिम् अवृणोत्। तस्याः मनः निवर्तयितुम् अशक्तः सः राजा अपि तां सुन्दरेश्वराय प्रतिपादयितुम् अङ्गीकृतवान्। एतत् तु तस्याः भ्रातुः न सम्मतम् आसीत्।

देवः सुन्दरेश्वरः विवाहार्थं समागतः। तेन सह न परिवारः आसीत्, न वा बन्धुवर्गः। एककः एव आगतः आदिभिक्षुः। दुहितुः विवाहार्थं स्वविभवानुरूपैः महद्भिः सम्भारैः सन्नद्धः पाण्ड्यः निराशः सञ्जातः। आत्मनः महारम्भं, स्वसम्भृतं वस्तुजातं च जामात्रे दर्शयित्वा "अधुना तेन किं करणीयं" ? इति तं साधिक्षेपम् अपृच्छत्। कृतस्मितः परमेश्वरः आत्मना आनीतं कमपि बालकं निर्दिश्य सर्वान् तान् पदार्थान् सः एव भुजिष्यति इति अवोचत्।

सः बालकः कुण्डोदरः नाम कश्चित् राक्षसः। सः सर्वाणि खाद्यानि निश्शेषं भुक्त्वा पिपासया "जलम् " इति उच्चैः आक्रोशत्। मथुरानगरस्थाः वापीकूपतटाकाः तस्य पिपासाम् उपशमयितुं पर्याप्ताः न अभवन्। ततः परमेश्वरः तं हस्तं प्रसारयितुम् आदिश्य, स्वशिरसि भागीरथ्याः महाप्रवाहम् उपरुन्धतः जटाकलापात् जटामेकां शिथिलीकृतवान्। इत्थं महेश्वरस्य जटाविवरात् विनिस्सृता गङ्गा मथुरायाः समीपे वैगैनदीरूपेण अवतीर्णा अभवत्। पर्वताग्रात् प्रवहन् निर्झरः इव वैगै अतीव वेगवती। "वै-गै" इत्यस्य द्राविडभषायां "हस्तं प्रसारय " इति अर्थः।

पुरा कुण्डोदरस्य पिपासां कतिचिद्भिः एव बिन्दुभिः उपशमितवती सा पुण्यवदी अद्य निदाघोष्मणा अर्धावशिष्टा वर्तते। मथुरापुर्याः एकस्यां दिशि सा नदी एव कन्दकः अभवत्। अन्यासु तिसृषु अपि दिक्षु प्राकारः परिखा च स्तः। यदा नदी कूलङ्कषा प्रवहति, तदा तस्यां लघवः नावः चरन्ति। यत्किञ्चित्

वाणिज्यम् अपि प्रचलति। सम्प्रति नदी परिक्षीणा इत्यतः केवलं द्रोण्यः एव तत्र तत्र सैकतेषु न्यस्ताः दृश्यन्ते।

वैगै तनुं कुल्यारूपम् आसाद्य नारिकेलोदकवत् तलतलायमाना प्रवहति। नद्याः अधरे स्रोतसि कश्चित् कुण्डः अस्ति। सः निदाघकाले अपि अतीव अगाधः वर्तते। तत्र हस्तिपकाः गजान् स्नपयन्ति। कुण्डात् ऊर्ध्वं सरिदि एव जलाशयाकारः महान् एकः गर्तः समजायत। तस्मात् गर्तात् एव राजान्तःपुराणाम् उपयोगार्थं स्वच्छजलं महिषवाह्याभिः चर्मभस्त्रिकाभिः नीयते। ततः ऊर्ध्वं वर्षाकालीनं नौकास्थानम्। ततः अग्रे नगरस्य चरमे भागे स्थितानि सैकतानि केतकीरेणून् विकीर्य सज्जीकृतानि विश्रान्तिस्थानानि इव लक्ष्यन्ते।

प्रतिदिनं सन्ध्याकाले नगरात् विद्यार्थिनः, राजपुत्राः, विद्वांसः च आगत्य तत्र विश्राम्यन्ति। सन्ध्याकाले विद्यार्थिनः सान्ध्यं विधिं परिसमाप्य तत्र शास्त्रचर्चाः कुर्वन्ति। राजकुमाराः यौवनविलासिनः वीराः च आत्मनाम् अश्वारोहणविद्याकौशलं प्रदर्शयन्ति। किञ्चित् अतीतायां सन्ध्यायां सर्वे पुरं प्रविशेयुः। सकलायाम् अपि निशायां तत्र खड्गहस्ताः राजभटाः चरेयुः। यामिन्याः प्रथमयामानन्तरं कः अपि नगरस्य अन्तः न आगच्छेत्, नगरात् बहिः वा न गच्छेत्।

सः कृष्णचतुर्दश्याः सन्ध्याकालः। ईषदिव तिमिरे व्याप्ते वैगैनदीसैकतानि निर्जनानि नीरवाणि च सञ्जातानि। किन्तु दूरे विश्रान्तिस्थाने, पुलिनेषु द्वौ एव पुरुषौ उपविश्य मिथः सम्भाषेते। "वीर! न मे अस्ति किञ्चिदपि सुखम्। गर्भाधानोत्सवस्य तिसृषु अपि रात्रिषु सा बाला द्वारि एव स्थित्वा-स्थित्वा, अन्ते चेलाञ्चलं भूमौ आस्तीर्य तत्रैव अस्वपत्। अहं तु तस्याः दिशि दृष्टिम् अपि न प्रसारितवान्। तां द्रष्टुं मे मनः न ऐच्छत्। यदि अहं कदा अपि तां विलोकयितुं मतिं अकरवं, तर्हि सद्यः एव मम प्रेयसी सा दिव्यसुन्दरी मे नयनपथम् आगच्छत्। अधुना अपि एषा मे प्रणयिनी मम पुरतः साक्षात् आस्ते? अहो"! एवं ब्रुवाणः कुट्टान सेतुपतिः नेत्रयोः अश्रूणि विमुञ्चन् मनसि स्थितां कामपि मूर्तिं पश्यन् इव शून्यानि विलोकनानि प्रसारितवान्। वीरभूपतेः शरीरं विकलहृदयत्वात् इव किञ्चित् अकम्पत।

ततः परं कुट्टानः पुनः अवदत् "वीर! सा मे प्रेयसी अतीव सुन्दरी। तादृशं सैन्दर्यं तु भूलोकदुर्लभम्। तस्याः देहान्तरेखाः अतीव विस्पष्टाः। प्रतिदिनं कमपि कार्यं निमित्तीकृत्य अहं तस्याः गृहं गच्छन् आसम्। न जाने कथं सः मासः अतीतः। ततः मम पिता "सत्वरम् आगच्छ" इति मां सन्दिष्टवान्। अतः मया अत्र शीघ्रम् आगन्तव्यम् आसीत्। यदि अहं कस्मिन् अपि साधारणे कुले जातः अभवं तर्हि सा मम एवम् अलभ्या न अभविष्यत्" एवं वदन् एव कुट्टानः पुनः अपि बाष्पं व्यकिरत्।

"किं त्वया सम्प्रति पुनः तत्र न गन्तव्यम्"? वीरभूपतिः स्वं वामहस्तं वामकपोले संयेज्य कूर्परं च ऊरुतले निधाय अपृच्छत्। कुट्टानः " अहम् कुत्र अस्मि, कथम् अस्मि, कस्मिन् दिने किं कुर्वन् अस्मि – इत्येतत् सर्वं अनुदिनं मम पित्रे निवेदनीयं खलु। यदि अहं राजधानीं त्यजेयं, तर्हि सा वार्ता निमेषद्वयाभ्यन्तरे एव रामनाथे मम पित्रा वेदिष्यते" इति उक्त्वा निःश्वस्य पुनः अवोचत् " तस्याः गृहं मे मातुलगृहस्य अत्यन्तं निकटे एव अस्ति...." अर्धोक्ते वीरभूपतिः तम् अपृच्छत् " कः तेषां ग्रामः" ? तत् अश्रुण्वन् एव कुट्टानः आह "असकृत् तस्याः गृहं गच्छति मयि, तस्याः गृहजनाः प्रथमं तत् मम सौजन्यम् अमन्यन्त। क्रमेण मे भावं ज्ञात्वा ते भीताः अभवन्। मे मातुलः मातुलानी च एतां वार्तां अजानताम्। तदनु मे पितुः सन्देशः आगतः.... धिक् ! निरर्थकं खलु मे जन्म ! मम ईप्सितार्थः दुर्लभः इति ज्ञात्वा अपि अहम् जीवन् अस्मि। पश्य माम्.... " इति वदन् सः उद्गच्छन्तं दुःखं कण्ठे एव स्तम्भितवान्।

यदा तस्य शोकः शान्तिम् अगच्छत् तदा वीरभूपतिः तम् अपृच्छत् " सा त्वयि अनुरक्ता वा न वा इति किं ज्ञातं भवता" ? कुट्टानः " हन्त" ! इति उक्त्वा मुहूर्तमिव तूष्णीं स्थित्वा पुनः अवदत् "पूर्वं तम्बिच्चिनायके राजशासनम् उल्लङ्घयति चिन्नकेशवनायकः प्रथमस्य कृष्णप्पनायकस्य साहाय्यं कृतवान्। तस्य चिन्नकेशव नायकस्य मे मातामहः दक्षिणभुजसदृशः विश्वासपात्रः आसीत्। तस्मिन् अवसरे सः मम मातामहः प्रभूतं धनम् आर्जितवान्। तत्पुत्रस्य मे मातुलस्य बहूनि उद्यानानि आरामाः च सन्ति। सः तद्गृहस्य पुरतः एव महान्तं देवालयं निर्मापितवान्। मम मातामहः वाराणसीनगरात् विश्वेश्वरस्य अच्छलिङ्गमेकम् आनीय, तस्य प्रतिष्ठापनात् पूर्वम् एव मृतः आसीत्। मे मातुलः तमेव लिङ्गं तत्र प्रतिष्ठापितवान्। तस्य समीपे एव भगवतः

पुष्पवाटिका वर्तते।

अहं तां बालां पूर्वं द्वित्रिवारं दृष्टवान्। सा तु मां न कदापि अपश्यत्। तस्याः बन्धवः यद्यपि न धनिनः तथा अपि सम्मानयोग्याः कुटुम्बिनः। एकस्मिन् दिने सा बाला पुष्पवाटिकायां पुष्पाणि अपचित्य, तैः मालां सङ्ग्रथ्य, ततः गच्छन्ती आसीत्। अहं तु तया सह सम्भाषितुं योग्यं अवसरं प्रतीक्षमाणः आसम्। अतः सत्वरं ताम् उपगम्य "शिवद्रव्यं नैव हरणीयम्" इति अवदम्। यद्यपि सा ततः पूर्वं मां सावधानं न अपश्यत्, तथापि कः अहम् इति तु जानाति एव। यदा अहम् एवम् अब्रुवं तदा सा अवहिता मां विलोक्य, भीता इव अलक्ष्यत। अहं स्मितं अकरवम्। सा कथमपि स्मितं कृत्वा, तां स्रजं मम चरणयोः प्रास्य, ततः धावितवती। यद्यपि अहं एतं वृतान्तम् उपवर्णयन् अस्मि तथा अपि मया उच्चार्यमाणः एकैकः शब्दः शूलः इव मे हृदयं निर्विशति। वीर ! अहो मे निर्भाग्यत्वम् ! सा माला...." कुट्टानः अग्रे वक्तुम् अक्षमः सकरुणं रोदितुम् आरब्धवान्। वीरभूपतिः तं परिष्वज्य "सेतो ! धैर्यं पुरुषलक्षणम्। न खलु वयं प्रभवामः अस्माकं भागधेयानाम्" इति तम् अनुनीतवान्।

कुट्टानः "अहं तां स्रजं हर्तुं ऐच्छम्। किन्तु यदा अहं तां ग्रहीतुम् अनमं तदा सा मे शिवद्रव्यं प्रत्यभात्। ततः ताम् अगृहीत्वा एव अहं गृहम् अगच्छम्। धन्या खलु सा माला या मे प्रियायाः हस्तस्पर्शं प्राप्तवती। यद्यपि अहम् गृहं गतः, तथापि मे पादौ पुनः मां बलात् तत्र एव अनयताम्। अर्धघटिकामात्रः कालः अपि न अतीतः। सा माला तु तत्र न आसीत्। मम हृदयं विनिर्भिन्नं अभवत्। वीर ! तस्याः स्रजः स्थाने कश्चित् कालसर्पः तत्र स्यात्। यदि अहं तं सर्पं कण्ठे अधारयं तर्हि किम् अभविष्यत्"।

कुट्टानस्य दक्षिणहस्तः वीरभूपतेः दक्षिणहस्तम् अगृह्णात्। कुट्टानः तं हस्तम् अपीडयत्। तस्य वपुः अवेपत। प्रगाढे अपि अन्धकारे वीरभूपतिः तस्य दुरवस्थां पश्यन् एव आसीत्।

वीरभूपतिः - "सेतो ! न खलु त्वया एवम् अधुना शोचितव्यम्। सम्प्रति त्वं विवाहितः असि। त्वन्निमित्ते ते जाया अपि परितप्स्यति। त्वया सम्प्रति त्वद्भार्यायां प्रणयवता भाव्यम्। सर्वं इमम् अनुरागं ते भार्यायां प्रवर्तय"।

वीरभूपतिः एतानि वचांसि हृदयपूर्वकं न अवदत्। कुट्टानस्य स्थितिः तस्य दुर्भरा अजायत। तस्य मनसि अस्फुरत् यत् कुट्टानस्य हृदयावेगः केन अपि मार्गेण निरोधितव्यः। नो चेत् सः प्रकृतिं न गमिष्यति इति। अतः एव सः एवम् अवदत्।

तत् श्रुत्वा कुट्टानः "वीर ! वीर ! किं वदसि? तम् अनुरागम् अस्यां कथं प्रवर्तयेयम्? एषा वैगैनदी रामनाथपर्यन्तं प्रवह्य, तत्रत्यं महातटाकं सङ्गच्छति। पश्य। एतां नदीवेणिकां ततः निवर्त्य अन्यस्मिन् मार्गे प्रवर्तय। किं मे अनुरागः ते परिवर्तनयोग्यः प्रतिभाति? एषः न तादृशः" इति ब्रुवाणः, तावत् नम्रीभूतं स्वं देहम् आयतीकृत्य दीर्घं निःश्वसितवान्। तस्य मुखं गाम्भीर्येण अङ्कितम् अभवत्। वीरभूपतिः कुट्टानसदृशः वीरः न इति न। किन्तु सम्प्रति कुट्टानस्य मुखं विलोक्य सः विचलितः अभवत्। वीरभूपतिः तं दृष्ट्वा अचिन्तयत् " एषः किं कुर्तुं न समर्थः? सङ्कल्पमात्रेण एव असौ अस्तं गतं विजयनगरसाम्राज्यं पुनः समुद्धृत्य तं मथुरानयकराज्ञां वशे न कुर्यात् किमु"

तदा वैगैसैकतेषु दूरे चक्रवातः समुद्भूय स्वनन् तयोः समीपात् परिभ्रम्य नौस्थानस्य दिशि अवहत्।

मूहूर्तात् अनन्तरं कुट्टानस्य वदनं पुनः विषण्णम् अभवत्। वीरभूपतिः तत्र चिरं न स्थातव्यं इति मत्वा " किं गच्छाव" ? इति अवदत्।

कुट्टानः – "वीर ! इदं दुःखं मे हृदयशोणितं पिबति। एतत् प्रेम माम् अन्तः एव ग्रसति। न अहं चिरं जीवेयम्"।

वीरभूपतिः "अमङ्गलं मा वद" इति उक्त्वा पुनः "सेतो ! किमेतत्? कथं त्वम् अद्य एवं दीनहृदयः संवृत्तः? कुत्र ते शौर्यं पौरुषं च" ? इति अवोचत्। दूरात् "कः अत्र भोः" इति प्रश्नः श्रुतः। वीरभूपतिः " कुट्टान सेतुपति महाराजः" इति उच्चैः प्रत्युत्तरम् अदात्। सः भटः पुनः किमपि न अवदत्। वीरभूपतिः कुट्टानः च उत्थाय पुराभिमुखं प्रस्थितै। कुट्टानः वीरभूपतिम् आलम्ब्य गच्छन् आसीत्। वीरभूपतिः तस्य कर्णे मन्दम् अवोचत् " सेतो ! कः अपि एवं धैर्यं न परित्यजेत्। सर्वस्य अपि जन्तोः स्वानुरूपं दुःखम् अवश्यं वर्तते। मे हृदये अपि

घोरः महाग्निः प्रज्वलति। तत् अहं पश्चात् कथयेयम्"।

किञ्चित् दूरं गत्वा तौ उभौ परस्परं विश्लिष्टौ अगच्छताम्। गोपुरद्वारि अश्वशकटः प्रतीक्षमाणः आसीत्। तौ तम् अधिरुह्य पुरं प्राविशताम्। राजगृहाणां समीपे कस्यचित् विशालोद्यास्य पुरतः रथम् अवरुह्य, वीरभूपतिं तद्गृहं नेतुं सारथिम् आदिश्य च कुट्टानः गृहं प्राविशत्।

2

कुट्टानः उभयतः विविधफलपुष्पवृक्षशोभितेन पथा स्वं सौधं प्रविष्टवान्। तत् तस्य पितुः सौधम्। राज्ये अधिकृतानां सर्वेषां उन्नतोद्योगिनां प्रत्येकं मथुरायाम् अन्तःपुराणि सन्ति। कुट्टानस्य पिता शतैकदेव उदयन सेतुपतिः। सः मुद्दुकृष्णप्प नायक महाराजस्य प्रधानसचिवेषु अन्यतमः। तस्य गृहं च मथुरायाः अतिमनोहरेषु निर्माणेषु अन्यतमम्। देव्याः मीनाक्ष्याः आलये यावती शिल्पसम्पत् अस्ति तावती अस्मिन् गृहे अपि विराजते। तमसि शिल्पपरीक्षा न सङ्गच्छति।

अन्तः प्रविष्टे एव कुट्टाने कश्चन सेवकः प्रत्यागत्य "प्रभो ! स्नानाय जलं सिद्धं अस्ति" इति निवेदितवान्। कुट्टानः स्वकक्ष्यां प्रविशन्, पुरः स्थिते दर्पणे स्वस्य मूर्तिं.दृष्टवान्। तस्य वदनं बाष्पकलुषितं आसीत्। सः प्रकोष्ठः दीपानां कान्त्या धगद्धगायमानः अवर्तत। कुट्टानः उत्तरीयकम् अपनीय तं स्वस्य वामपार्श्वे स्थितायां भित्त्यां नागदण्डे अवालम्बयत्। शुकाकारः सः नागदण्डः एकेन महता मरकतोपलेन विन्यस्तः आसीत्। तस्य शुकाकृतिः चञ्चुत्वेन नेत्रत्वेन च सन्निविष्टैः त्रिभिः माणिक्यैः सम्पूर्णताम् अगच्छत्। तस्मिन् प्रकोष्ठे चतसृषु अपि दिक्षु आहत्य अष्टौ नागदण्डाः सन्ति। भित्तिषु द्राविडशिल्पस्य प्रधानचिह्नानि गोष्टपञ्जराणि सन्ति। एकस्मिन् गोष्टपञ्जरे द्राविडभाषायां श्रीरामचन्द्रस्य चरितामृतं प्रवाहयतः कम्बस्य शिलानिर्मिता मूर्तिः समायोजिता अस्ति। तस्य अभिमुखं पश्चिमदिक्कुड्ये विन्यस्ते अन्यस्मिन् गोष्ठपञ्जरे मथुरापुरीम् उपायनीकुर्वतः श्रीकृष्णदेवरायस्य, तां प्रतिगृह्णतः श्रीविश्वनाथ नायकस्य च लोहमयं मूर्तिद्वयं सन्निविष्टम्। दक्षिणस्यां दिशि एका

शिलावितर्दिका वर्तते। तस्यां मृदवः रत्नकम्बलाः आस्तीर्णाः। तस्याः अग्रे भित्त्यां वर्णविन्यस्तम् एकं चित्रम् अस्ति। तत् आन्ध्रकवितापितामहस्य पेद्दनार्यस्य चित्रम्। वीरभूपतिः स्वयम् एतत् चित्रं लिखित्वा तं कुट्टानस्य उपायनीकृतवान्।

कुट्टानः कूर्पासकम् उन्मुच्य, तम् अन्यस्मिन् नागदण्डे अवलम्बयित्वा तस्यां वितर्दिकायां निषण्णः पेद्दनार्यस्य चित्रं पश्यन् आसीत्। कञ्चित् कालं तथा स्थित्वा, पुनः उत्थाय आत्मनः पुस्तकसञ्चयं प्रति अगच्छत्। कम्बमहाकवेः विग्रहस्य उभयोः पार्श्वयोः स्निग्धीकृत्य शिल्पविन्यासेन मण्डितानि तनूनि उन्नतानि च फलकानि सन्ति। तेषाम् उपरि एकतः तमिलभाषाग्रन्थाः अन्यतः आन्ध्रसंस्कृतभाषाग्रन्थाः च सन्ति। सर्वे अपि ते तालपत्रेषु लिखिताः ग्रन्थाः एव। कुट्टानः किमर्थम् आत्मा तत्पुस्तकसमीपम् अगच्छत् इति न ज्ञातवान्।

द्वारि "प्रभो ! स्नायताम्" इति एकः कण्ठध्वनिः अश्रूयत। कुट्टानः कक्ष्यां त्यक्त्वा स्नानार्थम् अगच्छत्।

तन्महासौधस्य पश्चाद्भागे चतुर्णां पूगीवृक्षाणां मध्ये ईषदुन्नते चन्द्रकान्तशिलाकुट्टिमे कुट्टानः आसीनः अभवत्। द्वौ सेवकौ एकेन पात्रेण उष्णोदकम्, अपरेण शीतलोदकं च आनीय तम् अस्नपयताम्। स्नात्वा कुट्टानः स्वदेहं सम्मार्जयन् आसीत्। (सः न सम्मार्जयति। सेवकौ एव तं सम्मार्जयतः। एषः राज्ञां समुदाचारः) तदा एव चन्द्रमाः उदयन् आसीत्। मलयजचूर्णसम्मिश्रितेन स्नानचूर्णेन उद्वर्तितस्य स्वशरीरस्य सुगन्धः तस्मै महान्तम् आनन्दम् अजनयत्। अपरः सेवकः कस्तूरीमिश्रितं तैलं हस्ताभ्यां गृहीत्वा तेन तस्य केशान् अञ्जितवान्। एताभ्यां परिमलाभ्यां सद्यः उदितस्य हिमांशोः किरणानां शैत्येन च कुट्टानस्य मनः प्रसन्नम् अभवत्।

भोजनानन्तरं कुट्टानः सौधस्य पुरोभागे स्थिते मण्डपे निषण्णः अभवत्। दाक्षिणात्या शिल्पशैली पल्लवानां कालात् चोलानां काले, चोलानां कालात् विजयनगरपालकानां काले च क्रमेण विकासं प्राप्नुवती आगच्छत्। दाक्षिणात्यशिल्पचरित्रज्ञाः तञ्जपुरीयमथुरापुरी- यशिल्पशैल्यौ विजयनगरीयशिल्पशैल्याः न पृथक् कुर्वन्ति। किन्तु तञ्जपुरीमथुरयोः शिल्पकला विजयनगरीयशिल्पशैल्याः अपेक्षया सुष्ठु परिणता इत्येव वक्तव्यम्।

एतत्कथाकाले –अर्थात् मुद्दुकृष्णाप्पनायकस्य काले सा शिल्पकला आधुनिकशिल्पत्वेन परिणमिष्यमाणा असीत् इति वक्तव्यम्। पल्लवानां काले रथाः, चोलानां काले गोपुराणि, विजयनगरपालकानां काले मण्डपाः च दाक्षिणात्यशिल्परीत्यां प्रामुख्यम् अवहन्। तेषु तेषु दिनेषु ते ते अभिवृद्धिम् आप्नुवन् च। उदयन सेतुपतिः स्वस्य एतस्य दिव्यसौधस्य प्राङ्गणे महान्तं मण्डपं निर्माप्य स्वस्य शिल्पकलापक्षपातं प्रकटितवान्।

तस्मिन् मण्डपे आस्तीर्णस्य रत्नकम्बलस्य उपरि कुट्टानः समासीनः अभवत्। मन्दीभवत्सु चन्द्रिकापटलेषु तस्मिन् मण्डपे निषण्णं तं राजपुत्रं पश्यतः कस्यापि मनसि अमरावत्यां मन्मथमण्डपम् अधितिष्ठतः जयन्तस्य साम्यम् अवश्यं स्फुरति।

दूरात् वीरभद्र भट्टरः कुट्टानं वीक्ष्य, सः सन्तुष्टः आसीत् इति सम्भावितवान्। सविनयं तं समुपसृत्य "प्रभो ! शयनवेला उपस्थिता" इति न्यवेदयत्। कुट्टानः किञ्चित्कुपितया दृष्ट्या तम् अवालोकयत्। किन्तु पूगीपल्लवपश्चाद्गते चन्द्रातपे वीरभद्र भट्टरः तत् न अपश्यत्।

वीरभद्र भट्टरः कुट्टानस्य सद्वर्तनं पर्यवेक्षितुं अधिकृतः। तम् अविज्ञाप्य कुट्टानः किमपि न कुर्यात्। कुट्टानः उत्थाय गृहाभ्यन्तरं प्रविष्टवान्। राजप्रासादे यामधण्टिका अवाद्यत। सर्वेषां निद्रावेला सञ्जाता।

कुट्टानः शयनागारं प्राविशत्। तत् मन्दिरं विशालं, प्राङ्गणस्थेन मण्डपेन तुल्यपरिमाणं च। तस्य छदिः अतीव उन्नता। तत् गृहस्य द्वितीयकक्ष्यायां वर्तते। स्निग्धतया लिप्तासु भित्तिषु चित्रवर्णैः लताः शुकाः वृक्षाः च चित्रिताः सन्ति। कुड्येषु पङ्क्तिक्रमेण बहूनि चित्राणि आलम्बितानि। तेषु मोघलचित्रकाराणां चित्रविद्याचिह्नानि स्पष्टं दृश्यन्ते। कुड्येषु पुराणकथाः बहुविधाः विन्यस्ताः वर्तन्ते। प्राग्दिशाभित्तिस्थे कुड्यगर्ते रत्नम् एकं निक्षिप्तं, यस्य मरीचयः तं मन्दिरम् अच्छैः प्रभाभिः प्लावयन्ति। भित्तिम् अनुसृत्य चन्द्रकान्तशिलावितर्दिकाः, शिल्पाढ्यानि फलकानि च न्यस्तानि। तेषु सुगन्धद्रव्याणि, दम्पत्योः आनन्ददायकानि चित्राणि, दर्पणानि, शुकाकाराणि शिल्पानिच निहितानि। तन्मन्दिरस्य पश्चाद्भागे बृहत्परिमाणं वातायनम् एकम् अस्ति। तस्य द्वारेण गृहारामे समुन्नततया निर्मितयोः मल्लिकाजातीनिकुञ्जयोः

परिमलं गन्धवहः वारं वारम् अन्तः आनयति।

तद्गवाक्षस्य समीपे महान् एकः पर्यङ्कः वर्तते। तस्य वितानस्तम्भाः चत्वारः महतीं शिल्पसम्पदं वहन्ति। उपान, पद्म, कुमुद, वेदिका, नागबन्ध, कलश, पुष्पबोधिगादीन् विन्यासान् यथावकाशं धारयन्तः ते स्तम्भाः अतिमनोहराः विराजन्ते। पर्यङ्कवितानिकायाः अनेकानि रत्नानि लम्बन्ते। स्वतः एव उन्नता सा खट्वा तदुपरि न्यस्ताभिः पञ्च शय्याभिः पुरुषप्रमाणोन्नता जाता। ताम् अधिरोढुं सोपानानि सन्ति। पर्यङ्कस्य शिरोदेशे पादन्यासदेशे च द्वौ स्तम्भौ, औन्नत्येन तत्समानौ विद्येते। शिरोदेशस्थितस्य स्तम्भस्य उपरि सौवर्णभाजने ताम्बूलद्रव्याणि सुगन्धद्रव्याणि च निहितानि। वितानिकाधारस्तम्भस्थात् नागबन्धात् द्वे सुदीर्घे मन्दारकुसुमगुम्फिते सङ्गतलवलीकिसालये च कुन्दमालिके लम्बेते। शय्यायां कुन्दजातीसुमानि अविरलं विकीर्णानि। तस्य पार्श्वे अपरा एका खट्वा वर्तते। सा औन्नत्येन किञ्चित् ऊना अपि सौन्दर्येण तत्समाना विराजते। तस्यां तु माघ्यकुसुमानि न सन्ति।

कुट्टानः भुजङ्गनिर्मोकवत् श्लक्ष्णं स्वच्छं च वस्त्रम् एकं परिधार्य, अन्यत् भुजयोः अधारयत्। सः यथाप्रकारं स्वशयने शेतुं तस्य सोपानानि आरुढवान्। तत्र शय्यायाम् अविरलं विकीर्णानां मल्लिकाकुसुमानां मध्ये एकवीरा गोधूमवर्णा पन्नगी इव सङ्कुचिताङ्गी स्वपिति। कुट्टानः दिग्भ्रान्तः अजायत। इतःपूर्वं न कदापि एकवीरा तस्य तल्पम् आरुढवती। त्रयः मासाः अतीताः तस्याः पतिगृहम् आगतायाः। न वा पतिः ताम् आललाप, नापि सा पतिम्। उन्नते पर्यङ्के कुट्टानः, ह्रस्वे तल्पे एकवीरा च इति एवं त्रयः मासाः गताः। कथम् अद्य एषः विपरिणामः? कथम् एकवीरा कुट्टानस्य शयनीये स्वप्तुम् अधृष्यत्?

एकवीरा प्रत्यहं हरितवर्णं वाराणसीयं दुकूलं धारयति। तस्य उपरि सौवर्णदशायुक्तेन काश्मीर राङ्कवेन अवकुण्ठनं धत्ते। सर्वाणि अङ्गानि अनेकैः अमूल्याभरणैः अलङ्करोति। किन्तु अद्य सा धवलशाटिकां, परिमितानि भूषणानि च धृतवती। तस्याः गात्रे कञ्चुकः न आसीत्। सा अभ्यञ्जनस्नाता स्यात्, यतः तस्याः तैलविरहिताः चिकुराः मन्दानिलेन चाल्यन्ते। अभ्यञ्जनस्नानेन बलवत् श्रान्ता निद्रां गता स्यात्।

कुट्टानः अत्यर्थं कुपितः अभवत्। "कथम् एषा हतभागिनी मे शय्याम् अलङ्कर्तुम् अर्हति? एतावतः दिनानि अनुद्बुद्धा एषा आशा अस्याः मनसि कथम् अद्य प्रादुर्भूता ? या महासौन्दर्यराशिः मदीयं तल्पम् अधिरोढुम् अर्हति तया सह अस्मिन् जन्मनि मे समागमः एव न भवेत्। एषा पिशाचिनी माम् आविष्टा। हन्त! कथं वा एष पापग्रहः मां विमोक्ष्यति? "

कुट्टानस्य आग्रहः ईषदिव शान्तः अभवत्। "हन्त! इयं मे सहधर्मचारिणी खलु। मां परित्यज्य कुत्र वा एषा गच्छेत्? एतावतः दिवसान् मम तूष्णींभावेन अनया कियत् दुःखम् अनुभूतं स्यात् नु ! किन्तु न कदापि सा माम् आलपत्। कथं वा स्त्री स्वयम् आलपति? आत्मनि विमुखे पुंसि, स्त्रिया तूष्णींभावः एव आलम्बनीयः खलु"। ततः कुट्टानस्य नेत्रे निमीलिते। आत्मनः मनोहारिण्याः लताङ्ग्याः रूपं तस्य अक्ष्णोः साक्षादभवत्। कुट्टानः जगन्मोहनं तस्याः रूपं द्रष्टुं न अपारयत्। झडिति लोचने उन्मीलितवान्। तस्य अक्षिणी अश्रुभिः अपूर्येताम्।

एकवीरा निद्रायां पर्यवर्तत। निमीलितयोः तस्याः नयनपुटयोः कीटाण्डजालसदृशाः सूक्ष्माः स्वेदबिन्दवः अजायन्त। अहो तद्वदनसौन्दर्यम् ! गिरितटात् पतन् प्रातस्सूर्यमरीचिभिः धगद्धगायितः निर्झरः इव भासते। कुट्टानः सम्मोहितः अभवत्।

इतःपूर्वं कुट्टानः एकवीरां सावधानं न आलोकितवान्। तां रूपवतीं अपि न अंमन्यत। कदापि "सा सुन्दरी भवेत् नाम। तावता मम हृदयं तदधीनं न भविष्यति" इति अचिन्तयत्।

एकवीरायाः उत्तरीयकं स्थानभ्रष्टम् अभवत्। कुट्टानः नेत्रे न्यमीलयत्। तस्य प्रणयिनी साक्षादभवत्। शोकोद्विग्नस्य कुट्टान महाराजस्य क्रोधः उद्वेलः अभवत्। सः अन्याय्यम् आत्मनः शय्याम् आक्रामन्तीं एकवीरां अधः पातयितुम् ऐच्छत्। एकवीरा कपटनिद्राम् अभिनयति इति मत्वा क्रुद्धः सः शत्रुमारणसमर्थं आत्मनः हस्तं तीव्रवेगेन तस्याः कपोले प्रास्यत्। किन्तु महाबुद्धिमतः तस्य करपद्मं तेन अनभिज्ञातम् एव एकवीरायाः कपोलं पुष्पगुच्छम् इव मृदु अस्पृशत्।

एकवीरा सम्भ्रान्ता उदतिष्ठत्। उभौ अपि निस्तब्धौ स्थितौ। एकवीरा मनसि एवम् अचिन्तयत्। " चत्वारः मासाः अतीताः मम पितुः एतं सम्बन्धं मे कल्पयतः। अद्यावधि एषः मे पतिः मे मुखम् अपि न आलोकितवान्। शोभनरात्रौ अहं द्वारोपान्ते पटाञ्चलम् आस्तीर्य अस्वपम्। पितुः गृहे मया अनुभूतं लालनम् अधुना एवं विपर्यस्तम्। अहं बलात् इमं नूत्नं देशम् आनीता अस्मि। न मे अत्र कः अपि बन्धुः अस्ति, न वा कः अपि मया सह भाषते। कथम् अहं मे रहस्यं दासीभ्यः निवेदयामि। दिने दिने ताः अस्मन्मन्दिरे अनुपयुक्तानि भोग्यवस्तूनि दृष्ट्वा हसन्ति, मां पृच्छन्ति च। अहं ताः समाधातुं न शक्नोमि।

अनेन सह विवाहात् पूर्वं मम मनः अन्यस्मिन् यूनि लग्नम् आसीत्। सः कः वा, कुत्रत्यः वा इति न ज्ञातं मया। सः प्राकृतजनः इव अलक्ष्यत। तम् अन्विष्य अपि न किमपि लभ्यते। दिष्ट्या अहम् इमं कुट्टान सेतुपतिं पतिं प्राप्नुवम्। कियत् शोभनं स्यात् यदि अहं प्रथममेव एनम् अपश्यम्। अधुना अपि न किञ्चिदपि अपास्तम्। अमुम् अपि अहम् अकल्मषहृदया सेविष्ये। किन्तु असौ मयि न अनुरज्यति। अस्य अनुरागं वाञ्छन्ती नितरां कृशा अहम् अद्य कथमपि साहसं कृत्वा, अस्य शयनं अधिरुह्य निद्रां गता। मम साहसं अधिकृत्य एष किं नु खलु चिन्तयति" ? सर्वे एते भावाः एकवीरायाः मनसि सपदि विद्युद्विद्योतः इव प्रास्फुरन्।

कुट्टानः अचिन्तयत् " कियती सुन्दरी एषा! मां दृष्ट्वा कथं लज्जते! किं अधुना मया करणीयम्? एतावतः दिवसान् मया क्रियमाणम् अपराधं मर्षयितुं तां प्रार्थये वा? धिक्! धिक्! कथम् अहं मे तां प्रियां प्रति अपराध्यामि? तस्यै अर्पितं मम एतत् हृदयम् अन्यस्यै दातुं न शक्नोमि।"

एकवीरा शनैः जान्वोः उत्थाय, वितानिकास्तम्भे नागबन्धे आलम्बितयोः मल्लिकामालिकयोः एकाम् आदाय अर्धनिमेषाभ्यन्तरे लज्जावनतवदना तां कुट्टानस्य कण्ठे अर्पयामास । सा माला कण्ठे पतिता अभवत् वा न वा कुट्टानः रौद्रमूर्तिः अजायत। ताटकावधोद्यतः रामचन्द्रः अपि धनुः तावता वेगेन आकृष्टवान् न स्यात्। कुट्टानः सहसा तां स्रजं द्विधा कृत्वा भूमौ प्रास्यत्। एकवीरा सपदि मूर्छिता शय्यायाम् अपतत्। स्तोकेन सा भूमौ अपतिष्यत्,

पुरुषप्रमाणात् पर्यङ्कात् पतितायाः तस्याः शिरः शीर्णं अभविष्यत् च। कुट्टानस्य नयने अश्रुभिः अपूर्येताम्। सः सोपानानि अवरुह्य अपरां खट्वाम् अधिरुह्य रुदन् तत्र अशेत।

एकवीरा निमेषाभ्यन्तरे समाश्वस्ता अभवत्। पतिः आत्मनः पार्श्वे न अस्ति। सः स्वस्याः ह्रस्वे तल्पे शेते। सा त्वरमाणा शय्याम् अवरुह्य, कञ्चकं प्रतिदिनं आत्मना धार्यमाणां शाटिकां च धृत्वा, सर्वाणि भूषणानि अलङ्कृत्य, काश्मीररराङ्कवम् अवकुण्ठनीकृत्य, अश्रुपूर्णनेत्रा स्वपर्यङ्कं समीप्य, रुद्धकण्ठा कथमपि अवदत् " प्रभो! यूयं युष्माकं शय्यायाम् एव स्वपित। अहम् अत्र शयिष्ये" ।

अभिमुखीभूय तां पश्यतः कुट्टानस्य लोचने सपदि अभ्रमताम्। तस्य हृदयं सहस्रधा विशीर्णं अभवत्। सः आत्मना कृतम् अनुस्मृत्य बहुधा पर्यतपत्। एकवीरां समालिङ्गय तस्याः शिरः स्वबाष्पैः अभिषेक्तुम् ऐच्छत्। किन्तु अधीरतया तथा कुर्तुं न अशक्नोत्। शनैः उत्थाय स्वशयने अशेत। ह्रस्वपर्यङ्के आस्तीर्णाः चतस्रः शय्याः एकवीरायाः अश्रुभिः अधःपर्यन्तम् अक्लिद्यन्। अर्धं गते रात्रे कथमपि सा निद्राम् अवाप। प्रत्युषसि प्रबुद्धः कुट्टानः एकवीरा अस्ति वा न वा इति तस्याः शयनीयस्य दिशि दृष्टिं प्रासारयत्। सा परिम्लानं मन्दारकुसुममिव शय्याम् आश्रिता आसीत्। तस्मिन् दिने दासीजनः भूमौ पतिते पुष्पमालिके दृष्ट्वा सभयनेत्रः जातः।

3

परस्मिन् दिने कुट्टानः सुप्तोत्थितः काल्यानि अनुष्ठाय रत्नखचितपर्याणनिवेशनेन सज्जीकृतं हयम् आरुह्य दुर्गात् बहिः अगच्छत्। तत्र तावता एव समाविष्टाः विविधमण्डलाधीश्वराणां पुत्राः श्रेणीभूताः अतिष्ठन्। तेषु प्रथमः तिरुचुनापल्लि मण्डलाधिपस्य पुत्रः। सः धवलम् अश्वम् अधिरुढः आसीत्। सः प्रायशः विंशतिवर्षीयः। धवलं कञ्चुकं मरकतमणिभिः परिवेष्ठितं उष्णीषं च धृतवान्। तस्य पार्श्वे तिरुनल्वेलिमण्डलाधीशस्य पुत्रः, तन्निकटे सत्यमङ्गलमण्डलेन्द्रस्य तनयः च आस्ताम्। द्वौ अपि एतौ समानवयस्कौ,

भ्रातरौ इव लक्ष्येते। तयोः अनन्तरं मानामधुरमण्डलाधिपतेः, शेन्दमङ्गलमण्डलाधिपस्य च पुत्रौ वत्सतरद्वन्द्वः इव तिष्ठतः। तौ परस्परं पितृष्वस्रीयमातुलेयौ। तयोः रूपे परस्परं संवदतः। द्वौ अपि ऊनाष्टादशवर्षप्रायौ। तयोः तुरगौ भुवि न तिष्ठतः। तौ तु बालौ अपि कृतबहुपरिश्रमौ इव स्वारूढौ उत्तमजात्यश्वौ आत्मनोः देहचालनेन पादप्रसारणेन च निगृह्णीतः। ततः क्रमेण धारापुर, मारमङ्गल, शेल, कण्णिवीडु मण्डलाधीश्वराणां तनूजाः तिष्ठतः। अन्ये च अनेके राजपुत्राः सन्ति। सर्वैः च तैः आरुढाः अश्वाः अजानेयाः आसन्। तेषां सर्वेषां गात्राणि अमूल्याभरणैः मण्डितानि। सर्वेषां मुखेषु शौर्यलक्ष्मीः चकास्ति। कुट्टानः आत्मनः वाजिनं तेषां धुरि अस्थापयत्। ततः क्रमेण प्रधानमन्त्रिणः रायसस्य च पुत्रौ आगत्य स्वोचिते स्थाने स्वीकुर्युः। दूरे राजसेना अपि बद्धपङ्क्तिः अतिष्ठत्।

राजकुमाराणां श्रेण्याः अग्रे एकः प्रवयाः युद्धवीरः, पलितैः श्मश्रुभिः भीष्माचार्यं अनुकुर्वाणः, महोन्नतं श्वेताश्वम् अधिरुह्य अतिष्ठत्। सः तेषां युद्धविद्यागुरुः आसीत्। मथुरानायकानां राज्ये सैन्याध्यक्षः "दलवायिः"इति अभिधीयते। आद्यानां त्रयाणां नायकानां काले महामेधाशाली आर्यनाथः तं पदम् अलङ्कृतवान्। सम्प्रति पाण्ड्य पार्थिव मुद्दुकृष्णनृपतेः उदयन सेतुपतिः दलवायिः अजायत। उदयन सेतुपतिः महासमर्थः, सेनानिर्वहणक्षमः राजकार्यनिपुणः च।

किन्तु एते सेतुपतयः नायकवंशीयानां समकालीनाः न आसन्। ते तु पाण्ड्यवंशीयानां राज्ञां कालात् आरभ्य मथुरापालकानां मण्डलाधिपाः आसन्। रामनाथप्रान्तीयः समस्तः देशः तेषां वशे अभवत्। रामेश्वरगामिनि मार्गे चोरबाहुल्यात् तैर्थिकाः बहून् क्लेशान् अनुभवन्तः आसन्। तस्मात् कारणात् उदयन सेतुपतिना अधिकतया रामनाथे एव स्थातव्यम् आसीत्। तस्य असन्निधौ समस्ता सेना अस्य एव वृद्धसिंहस्य वशे वर्तते। अस्य नाम कस्तूरीरङ्गप्प नायकः।

विश्वनाथ नायकस्य पौत्रः वीरप्प नायकः त्रयः पुत्रान् अविन्दत। ते क्रमेण-द्वितीयः कृष्णप्प नायकः, विश्वप्पः, कस्तूरीरङ्गप्पः च इति आख्याताः।

अधुना राज्यं कुर्वाणः मुद्दुकृष्णप्प नायकः विश्वप्पस्य पुत्रः। विश्वप्पस्य अभिषेकात् पूर्वं कस्तूरीरङ्गप्पः तस्य राज्यम् अपहर्तुं प्रायतत्। अतः प्रजाः तं सन्ध्यामण्डपे मारितवन्तः। एषः वृद्धसिंहः कस्तूरीरङ्गप्पःस्य श्यालः। स्वयमपि नाम्ना कस्तूरीरङ्गप्पः एषः राजभक्तिपरायणः।

तस्य वृद्धस्य दृष्टिपातम् अनुसृत्य राजकुमाराः एकैकशः अग्रेभूय, छुरिकायाः प्रयोगोपसंहारयोः, करवालचालने, तत्प्रयोगे, अश्वानाम् अभिपातने, वल्गने च स्वं स्वं प्रावीण्यं प्रादर्शयन्। ततः ते सर्वे कुमाराः सैन्यसमीपम् अनीयन्त। कस्तूरीरङ्गप्प नायकः कुट्टानं दृष्ट्वा सेनया सर्वतोभद्रव्यूहं रचयितुम् आदिदेश। कामन्दकः सर्वतोभद्रव्यूहं शत्रुहृदयनिर्भेदकम् आख्यातवान्। तत्क्षणं कुट्टानः व्यूहस्यत उरः, कक्षौ, कोटि, जघनं च कल्पयित्वा अचलाकृतिं व्यूहं रचयामास। कस्तूरीरङ्गप्प नायकस्य गुल्मोपमयोः पलितभ्रुवोः आनन्दस्य स्फुरणम् अलक्ष्यत। सः वृद्धवीरः कुट्टानम् अपृच्छत् "तात! यदि ते सेनायाः जधनम् आपद्गतं भवेत्, तर्हि कं व्यूहं रचयसि" ? कुट्टानः किमपि अनुक्त्वा एव सर्वतोभद्रव्यूहं मकरव्यूहत्वेन परिवर्त्य तम् वृद्धशिक्षकं अतोषयत्। ततः इतरे अपि राजपुत्राः क्रमेण श्येन, सूची, शकट, वज्रादीन् व्यूहान् विरचय्य तं आनन्दयामासुः। कुट्टानः कक्षविरहितम् एकं व्यूहं विरच्य तस्य मुखम् अवालोकयत्। रङ्गप्प नायकः "साधु साधु" इति तं प्रशशंस।

अतीते दिनस्य प्रथमे यामे सर्वे राजकुमाराः स्वस्वावासान् प्रति निर्गताः अभूवन्। सेना च कञ्चित्कालं यावत् रङ्गप्पनायकस्य आज्ञाम् अनुपाल्य स्वयमपि नियतं देशं गता।

कुट्टानः गृहं गत्वा पुनः स्नात्वा भोजनादिकं कर्तुं अभ्यन्तरशालाम् अगच्छत्। तत्र सः रक्तं काश्मीरराङ्कवम् अवकुण्ठनीकृत्य पार्श्वतः गच्छन्तीं एकवीराम् अपश्यत्। कुट्टानम् आगच्छन्तं विज्ञाय सा सत्वरं गन्तुम् ऐच्छत्। किन्तु पादे मञ्जीरेण पीड्यमाने, मध्ये क्वचित् स्थित्वा तस्य पुनः संवेशनम् आवश्यकम् अभवत्। कुट्टानः तदा नागवल्लीकिसालयसुकुमारं तस्याः पाणिपादं सविमर्शम् आलोकयत्। अनुपमं तस्याः करचरणसौकुमार्यं कुट्टानः कदा अपि न ऊहितवान्।

भोजनानन्तरं कुट्टानः आत्मनः पठनागारम् अगच्छत्। तस्य हस्तः अप्रयत्नं

कौटिलीयं अर्थशास्त्रम् उद्धृतवान्। उद्घाटिते एव ग्रन्थे अन्तःपुररक्षणसम्बन्धीनि वाक्यानि तस्य दृष्टिगोचराणि अभवन्। कामन्दकः, कौटिल्यः च अस्मिन् विषये एकाभिप्रायौ आसन्। अन्तःपुरस्य रक्षणविषये, अन्तःपुरात् सम्भवन्तीनाम् आपदां विषये च कौटिल्यः याः कथाः उदाहृतवान् ताः एव कामन्दकः अपि उदहरत्। भद्रसेनस्य भ्राता तं तस्यैव भार्यायाः मन्दिरे गुप्तः हतवान्। कारूशनृपतेः सुतः तं स्वमातुः शय्यायाः अधः निलीनः अहनत्। काशीराजं, वैरान्त्यं सौवीरं च तेषां पत्न्यः एव अमारयन्....इत्यादि पठतः कुट्टानस्य मनसि निर्निमित्ता भीतिः अजायत। सः पुनः धैर्यं अवलम्बितवान्, स्वहृदये जायमानां वेदनाम् उपशमयितुं कुट्टानः कम्बरामायणम् उद्धृत्य ततः पद्यम् एकं अपठत्। कुट्टानः सङ्गीतं न अशिक्षयत्, किन्तु रागच्छायया पद्यं पठितुं शक्नोति।

तत्रान्तरे वीरभद्र भट्टरः द्वारि स्थितः अश्वशकटः आयत्तः इति विज्ञापितवान्। कुट्टानः अन्यानि वस्त्राणि धृत्वा तेन सह अगच्छत्। शकटः राजसौधानि ययौ। तत्र एकं महासौधं प्रमुखतया राजपुरुषान् राजनीतिम् अध्यापयितुम् उद्दिष्टम् आसीत्। कुट्टानवीरभद्र भट्टरौ तं सौधं प्राविशन्। तस्य अन्तर्भागः अतीव विशालः। तत्र भूमौ समन्ततः अमूल्यानि रत्नकम्बलानि आस्तीर्णानि आसन्। तेषु पण्डिताः समासीनाः। बहवः राजकुमाराः अपि आगताः। क्वचित् भोजविरचितः युक्तिकल्पतरुः, क्वचित् जीमूतवाहनकृतः दायभागः, क्वचित् चण्डीश्वरोपज्ञं विवादरत्नाकरः च अध्याप्यते। अन्यत्र एकः द्राविडभाषापण्डितः तमिलभाषायां विरचितां विज्ञानेश्वरव्याख्याम् अध्यापयति। अपरत्र अन्यः संस्कृतपण्डितः संस्कृतभारतं, रामायणं, तत्तद्ग्रन्थोपनिबद्धां राजनीतिं च विद्यार्थिनः बोधयति। कुट्टानः तत्र उपविश्य श्रद्धया पाठम् अश्रुणोत्। ईषत् सायंकालोन्मुखायां वेलायां राजसौधाङ्गणे घण्टा अवाद्यत। तां श्रुत्वा सर्वे विद्यार्थिनः यथादेशं ययुः।

वीरभूपतिः अपि एताम् एव पाठशालाम् आगतवान्। निर्गमनावसरे सः कुट्टानं समागच्छत्। परस्परदर्शनेन सन्तुष्टौ तौ सेतुपतेः मन्दिरम् अगच्छताम्। वीरभद्र भट्टरः कार्यवशात् राजसौधे एव अतिष्ठत्। मध्येमार्गं वीरभूपतिः कुट्टानम् अवदत् "सेतो! मे त्वया करणीयं कार्यम् एकम् अस्ति"। कुट्टानः "किं

तत्" ? इति अपृच्छत्।

वीरभूपतिः – "तिरुमल नायकः तव मित्रं खलु? तेन मह्यम् एकम् उद्योगं दापय। अहं नीतिशास्त्रं सम्पूर्णम् अधीतवान्। विज्ञानेश्वरं, वैशम्पायनकृतां नीतिप्रकाशिकां च अपठम्। कौटिलीये अर्थशास्त्रे, कामन्दकीये नीतिसारे च सुष्ठु परीक्षितः अपि अभवम्। मम कस्यापि उद्योगस्य आवश्यकता दिने दिने वर्धते"।

कुट्टानः – "तिरुमल नायकः अद्य विद्यासौधं न आगतः खलु। यदा मे तेन सह समागमः भविष्यति तदा अहम् अवश्यं त्वाम् अधिकृत्य कथयिष्यामि। सः त्वया सह अपि सुष्ठु परिचितः एव खलु"?

वीरभूपतिः – "अथकिम्। परिचितः एव"।

ततः किमपि भाषमाणौ कुट्टानस्य गृहम् अगच्छताम्। यदा तौ कुट्टानस्य प्रकोष्ठं प्राविशतां तदा तत्र तयोः कृते उपाहारः सिद्धः आसीत्। उभौ अपि अल्पाहारं स्वीकृत्य ताम्बूलसेवनं कुर्वन्तौ उपविष्टौ । तदा कुट्टानः वीरभूपतिं गातुं प्रार्थितवान्। वीरभूपतिः तमिलभाषया मधुरामीनाक्ष्याः स्तुतिगीतम् एकम् उच्चैः अगायत्। तस्य गीतध्वनिना सः मन्दिरः अपूर्यत। पारिजातपुष्पाणि कबलयन् मृगशावकः ग्रीवां चालयन् अन्तः आगत्य तं निरीक्ष्य अगच्छत्।

4

सूर्यः अस्तम् अगच्छत्। दिनः शीतताम् अयात्। राजसौधाजिरे वाद्यमानानां भेरीणां ध्वनिषु मेघस्तनितभ्रान्तिम् आपन्नाः गृहमयूराः नृत्यन्ति। कुट्टानवीरभूपती सायन्तनविहारार्थम् अश्वशकटम् आरुह्य वैगैनद्याः सिकतातलानि अगच्छताम्।

कुट्टानः ईषत् ह्रस्वः श्यामवर्णः च। तस्य नेत्रे विशाले। तस्य देहयष्टिः निरन्तरव्यायामेन कठिनीकृता आसीत्। सः संस्कृतान्ध्रभाषयोः सर्वान् राजनीतिग्रन्थान् अधीतवान्। सः प्रायः पञ्चविंशतिवर्षीयः अतिनीलानि तस्य

श्मश्रुणी नातिसान्द्रे नातिविरले च। तस्य वदनम् अवलोकयतः कस्य अपि प्रथमं तस्य प्रोन्नता नासा एव दृष्टिम् आकर्षति। सः नासादण्डः, ते पद्मपत्रायते नेत्रे च तन्मुखस्य अपरिमितं सौन्दर्यम् अकल्पयताम्। ते विशालनयने एव तस्य सद्वंशप्रसूतत्वं वदतः। कुट्टानः अतीव गम्भीरस्वभावः। विना आवश्यकतां सः न कमपि भाषते। यदि कः अपि तस्य किञ्चित् अप्रियं कुर्यात् तर्हि सः आत्मनः अप्रसन्नतां तीक्ष्णया दृष्ट्या एव व्यनक्ति। तं दृष्टिपातं कतिपये एव जनाः सोढुं शक्नुवन्ति। तस्मिन् प्रसन्ने सति तस्य स्मितं परान् अतीव आनन्दयति। सर्वः तस्य व्यवहारः पश्यतां मनस्सु – सः पितुः उदयन सेतुपतेः समानस्कन्धः भविष्यति इति अभिप्रायं जनयति।

अथ वीरभूपतिः धवलच्छायः प्रांशुः च । अकृताधिकव्यायामत्वात् तस्य वक्षः कुट्टानस्य वक्षः इव तिर्यक्प्रसारिता गण्डशिला इव न दृश्यते। न तस्य नेत्रे कुट्टानस्य नेत्रे इव आयते, न वा अनायते। तस्य नासिका अपि न अत्युच्चा। तस्य मुखम् अवलोकयन् सर्वः अपि जनः तं सुन्दरं मनुते। कुट्टानस्य मुखे बहून् युद्धान् कृतवतां आनुपूर्व्या राज्यं पालयतां च पितृणां चिह्नानि लक्ष्यन्ते। वीरभूपतेः वदनं शान्तं सत्, कृष्या विद्याभ्यासेन च जीवितुम् अभ्यस्तानां पितृणा चिह्नानि दर्शयति। तस्य श्मश्र्वोः व्यावर्तिते अन्ते कमलस्य उपरि पतन्तं भृङ्गद्वयम् अनुकुर्वतः। संक्षेपतः कुट्टानस्य मुखश्रीः पुरुषैः प्रशस्यते, वीरभूपतेः तु स्त्रीभिः। वीरभूपतेः आननं क्रोधारुणम् अपि स्मेरम् इव लक्ष्यते। हसतः तस्य अक्षिणी सङ्कुचिते भूत्वा पश्यतः जनान् सूच्यौ इव विध्यतः। कुट्टानः सत्वरं चलति, वीरभूपतिः तु मन्दम्।

कुट्टानः उदयन सेतुपतेः एकमात्रः पुत्रः। उदयन सेतुपतिः "तेवै" पुरस्य अधिपतिः। सः राज्ञा सेतूनां रक्षणे अधिकृतः आसीत्। राज्ये प्रवहन्तीनां सर्वासां नदीनाम् उपरि सेतवः बद्धाः अभवन्। तेषां सेतूनाम् अधः भूमिः कृष्यते। सेतुपतिः एतेषां सेतूनां अधिकारी। सः महान् शिवभक्तः, अरियरायस्य सैन्यान् निर्मूलितवान्, मुद्दुकृष्णप्प नायकस्य प्रधानमन्त्री च। तत्पुत्रे कट्टाने अपि न किञ्चित् परिहीयते। सः च स्वपितुः अनन्तरं तस्य पदम् अधिष्ठातुम् आवश्यकं शिक्षणं मथुरायां प्राप्नुते।

वीरभूपतेः जन्मस्थानं राजवल्लीपुरम्। तस्य पितरौ न धनिनौ। यदा

श्रीकृष्णदेवरायः विश्वनाथ नायकाय पाण्ड्यराज्यं दत्तवान् तदा बहवः योद्धारः विश्वनाथ नायकेन सह त्रिलिङ्ग(आन्ध्र) देशात् मथुराप्रान्तदेशम् अगच्छन्। किन्तु ते तत्र गत्वा नायकेन दत्तां भूमिं कषन्तः जीवितुम् आरभन्त। वीरभूपतिः तु राजोद्योगवाञ्छया राजवल्लीपुरात् मथुराम् आगत्य तत्र राजनीतिम् अधीतवान्।

तस्मिन् काले मथुरायां विद्याव्याप्तिः सुष्ठुतया अक्रियत। तेषु दिनेषु तस्मिन् नगरे विद्यार्थिनां संख्या कदापि दशसहस्रात् न्यूना न आसीत्। तेषां कृते सर्वविधानि सौकर्याणि कल्पितानि। विद्यार्थिनां भोजनादिकानां कृते अध्यापकानां वेतनानां कृते च विजयगरपालकैः मथुरानायकैः च वितीर्णाः भूमयः अनेकाः आसन्। ताभ्यः आगतः आयः प्रतिवत्सरं परिशिष्यते। गैर्वाणतमिलतेलुगुभाषाः तिस्रः अपि अध्याप्यन्ते। देवतायतनानि पाठशालात्वेन उपयुज्यन्ते। विदग्धाः उपाध्यायाः षट् शास्त्राणि, चतुरः वेदान् च विद्यार्थिनः अध्यापयन्ति। तमिलतेलुगुभाषे पृथक् पाठशालासु शिक्ष्यन्ते। मथुरानायकानां काले तेलुगुभाषा अतीव अद्रियत। राजकुमारान् राजनीतिं बोधयितुं पृथक् विद्याशालाः आसन्। तासु मुख्याः राजसौधे एव आसन्। प्रतिवर्षं द्विवारं समस्तासु विद्याशालासु विद्यार्थिनः परीक्ष्यन्ते। परीक्षायां ये ये उत्तीर्णाः तेभ्यः राजा बहुमानानि च ददाति।

राजनीतिकक्ष्या बहुधा विभक्ता आसीत्। ते च विभागाः– ग्रामपालनं, दायविभागः, शिक्षाविधानं, सैन्यविभागः च। राजकुमाराः सैन्यविभागशिक्षाम् अधिगच्छन्ति। अन्ये च शिष्टासु कक्ष्यासु अधीत्य उचितम् अधिकारं लभन्ते। मथुरानायकाः वेदरक्षकाः वर्णाश्रमधर्मपरिपालकाः च आसन्। देशे ब्राह्मणभक्तिः अधिका आसीत्। तथापि मधुरापालकाः अन्येषु मतेषु वैमनस्यं न अवहन्। दक्षिणभारतदेशे क्रैस्तवमतस्य अवतारः प्रथमं मथुराराज्ये एव आसीत्।

मथुरानायकाः स्वराज्यं पाल्यविधानेन विभाजितवन्तः। समस्तं राज्यम् अनेकेषु मण्डलेषु विभज्य एकैकं मण्डलं एकस्य अधिकारिणः पालने अयोजयन्। सः च अधिकारी स्वमण्डलस्य राजसदृशः। सः मथुरानायकाय निर्दिष्टं करम् अर्पयन् स्वं मण्डलं पालयितुम् अर्हति। सः सेनाम् अपि एकां

पोषयन् काले तां राज्ञः साहाय्यार्थं प्रेषयेत्। मथुरायां तु राजा कतिपयमन्त्रिणां साहाय्येन राज्यं कुर्वन् आसीत्।

राज्ये प्रधानः अधिकारी दलवायिः(सैन्याध्यक्षः) एव। सः एकः एव राज्यपालनं सैन्याधिकारं च निर्वहति। मथुरापालकाः पूर्वे भारतीयाः राजानः इव पालनाधिकारं मन्त्रिणः निर्वहणे, सैन्याधिकारं सेनापतेः निर्वहणे च न आयोजयन्। ते तु एतम् अधिकारद्वयं दलवायेः एकस्य एव हस्ते न्यक्षिपन्। राज्यस्य शान्तिः सामाजिकी व्यवस्था, अन्यराज्यैः सह सम्बन्धाः – एते सैन्याध्यक्षेण निर्वाह्याः अधिकाराः। अवशिष्टानाम् अधिकारिणां सः एव मुख्यः। दलवायेः अनन्तरः अधिकारी "प्रधानी" इति उच्यते। सः राज्यस्य आयं पर्यवेक्षितुं अधिकृतः। शुल्काः, इतरे धनागमाः, राज्यार्थं क्रियमाणः व्ययः च तस्य अधिकारविषयाः। युद्धावसरेषु यदा सैन्याध्यक्षः राजधान्याः प्रोषितः भवति, तदा प्रधानी एव तस्यापि अधिकारं पालयति। अस्मिन् क्रमे तृतीयः सचिवः "रायसम्" इति अभिधीयते। सः परिपालने प्रधानः पुरुषः। राज्यस्य सुस्थितिः एतान् त्रीन् अधिकारिणः आधारीकृत्य वर्तते। एतेषां त्रयाणां अनन्तरं प्रधानौ अधिकारिणौ कणक्कं(गणकः), स्थानापतिः च। गणकः सर्वाः गणनाः पर्यवेक्षते। स्थानापतिः अन्यैः राजभिः दत्तानि उपायनानि, राजदेयानि, तत्सम्बन्धीनि कार्याणि च अवेक्षते।

कतिपयग्रामानां समाहारः "मागाणम्" इति उच्यते। कतिपयानि मागाणानि समाहृतानि "नाडु" इति अभिधीयन्ते। तस्य एव "देशः", "राष्ट्रं," "राज्यं", "मण्डलम्" इति नामानि। प्रतिग्रामम् एकः अधिकारी वर्तते। ग्रामेषु न्यायः ग्रामाधिकारिभिः एव पाल्यते। समस्ते अपि राज्ये अखिलानां न्यायानां निर्णेता प्रधानी। ग्रामेषु अनिर्णीताः सकलाः अभियोगाः मथुरायां विचार्यन्ते।

मथुरा अतिसुन्दरतया निर्मिता आसीत्। मध्ये पुरं मीनाक्षीसुन्दरेश्वरयोः आलयः विराजते। तस्य चतसृषु अपि दिक्षु चत्वारि गोपुराणि सन्ति। एकैकस्यां दिशि गोपुरात् आरभ्य नगरबहिर्देशपर्यन्तम् एका एव वीथी। श्रीमीनाक्षीसुन्दरेश्वरयोः आयतनं परितः चतुरस्राकारेण गृहाणि निर्मितानि। नगरे सर्वत्र देवालयाः एव दृश्यन्ते। सर्वेषां आलयानां नयकराजाभिः अर्पितानि प्राभृतक्षेत्राणि सन्ति। न कस्य अपि देवताविशेषस्य भोगः अवहीयते। सर्वेषु

देवतायतनेषु वेदशास्त्राणि उपदिश्यन्ते। नगरः सर्वसमृद्धः सन् न कस्मिन् अपि अंशे लोपम् अनुभवति।

कुट्टानवीरभूपती अनागते एव तिमिरे वैगेनदीतीरं गत्वा पूर्वस्मिन् दिने यत्र तौ निष्णौ अभवतां, तत्र एव पुनः न्यषीदताम्। अन्धकारः शनैः शनैः प्रसरन् आसीत्। अस्तं गतस्य अपि भानोः रक्ताः द्युतयः धरित्रीं न अत्यजन्। परिक्षीणायाः वैगैनद्याः तरङ्गेभ्यः ईषत् शैत्यं प्रतिपद्य वायुः मन्दं वहति। श्लक्ष्णनिर्मोकसदृशं सिकतासु प्रवहन्त्यां नद्यां क्षुद्रमीनस्य चलनम् उपलक्ष्य तित्तिरिपक्षी कूजन् आकाशात् अकस्मात् अवतीर्य तं नखैः गृहीत्वा उदपतत्। दूरे प्रतीच्यां दिशि भास्करः आत्मनः रक्तांशून् उपसंहृत्य घनीभूतः रुधिरमयः मृत्पिण्डः इव अपासरत्। वपुषि मषीं विलिप्य, अवकाशं प्रतीक्षमाणः चोरः इव सान्ध्यं तमः अवनतः अवालोकयत्। तमसि उज्ज्वलं प्रकाशन्त्यः तारकाः वैगैनद्याः विरले प्रवाहे प्रतिफलन्त्यः तस्य अन्तः रजतकान्त्या चकासतां मीनानां सौन्दर्यस्य आम्रेडितानि अकल्पयन्। तन्वीषु नदीवेणिकासु उत्पद्यमानाः ऊर्मयः सर्पपोताः इव तीरं प्रति नुद्यन्ते।

5

कुट्टानः वीरभूपतेः स्कन्धे हस्तं निधाय "वीर ! मम हृदयं तावत् दह्यते एव। ह्यः सायं त्वं – तव अपि हृदये किमपि महादुःखं वर्तते इति अवदः। तत् मे न कथयसि" ? इति अपृच्छत्। वीरभूपतिः क्षणं तूष्णीं स्थित्वा " कुतः मां मे कथां स्मारयसि? एतत् तु मया यावज्जीवम् अनुभोक्तव्यं दुःखम्। यद्यपि मया आजीवम् अविवाहितेन भाव्यं, तथापि मम शरीरस्य उपरि न मे अधिकारः अस्ति। विवाहः तु अपरिहार्यः प्रतिभाति" इति वदन् सालोचनाक्षः तमांसि उद्गिरन्तीं प्रतीचीं दिशं तदेकदृष्टिः द्रष्टुम् आरभत। कुट्टानः उत्थाय, जलवेणिकाम् अवतीर्य, पादौ प्रक्षाल्य, परिकरबन्धात् कृपाणिकाम् उद्धृत्य, तस्याः धारां परीक्ष्य, पुनः तां कोशे निधाय, मुखं प्रक्षाल्य, पुनः वीरभूपतेः

समीपम् आगत्य उपाविशत्।

वीरभूपतिः – " सेतो ! त्वम् असि महाराजपुत्रः। अहं तु अकिञ्चनः। एकस्यां कक्ष्यायाम् अध्ययनमात्रेण आवयोः ईदृशी दृढा मैत्री कथं सङ्घटिता? त्वं तावत् प्राणसदृशानि रहस्यानि मे अकथयः। कथम् अहं मे रहस्यं तुभ्यं न कथयेयम्" इति वदन्, द्विधा विभक्तान् सेतुपतेः केशान् करेण आमृशन्, स्निग्धेन चक्षुषा तं विलोकयन् पुनः प्राह। "सेतो! त्वं धर्मपत्न्या सहैव वससि। किन्तु युवयोः दाम्पत्यसौख्यं नास्ति इति अकथयः। तस्यां तपस्विन्याम् अनुरक्तः भव। महाराजपुत्री नूनं कुटीरवासिन्याः निर्धनायाः अपेक्षया सुन्दरतरा भवत्येव। न भवति चेत् अपि – तदीयं सौकुमार्यं तु अकिञ्चनाभिः कथं प्राप्यते ? अहं त्वां त्वज्जायायाम् अनुरागं बद्धुं मनःपूतं याचे। न मे अस्ति निर्वृतिः यावत् त्वं भवत्पत्न्यां स्नेहं वोढुं न प्रतिज्ञास्यसि।

अचिरादेव अहं विवाहितः भविष्यामि। मया अभिप्रेता कान्ता तु कथमपि मे दुर्लभा। या का अपि कन्या मया अवश्यम् उपयन्तव्या एव। नो चेत् किं करवाणि? प्राणात्यये अपि न परिणयेयम् इति प्रतिजानामि वा? कथम् अहं तथा कृत्वा मदेकगत्योः पित्रोः वार्धके असह्यां मनोवेदनां कल्पयानि? अथ कामपि परिणयानि – ततः तां नवोढां प्रति विमुखीभूय किं लभ्यते? इहलोकसुखं वा, परलोकसुखं वा? न खलु अस्माभिः एतत् जन्म सुखानुभवाय गृहीतम्। मे वचनं देहि यत् त्वं पत्न्यां अनुरक्तः भविष्यसि। यदि त्वं तथा प्रतिज्ञां कुर्याः तर्हि अहं मे कथां कथयिष्यामि"।

एवं वदति वीरभूपतौ कुट्टानः नेत्राभ्याम् अश्रूणि विमुञ्चन् आसीत्। वीरभूपतिः क्षणं तूष्णींभूय, " भ्रातः! त्वाम् एवं सम्बोधयितुं भवान् एव मां विस्रब्धीकृतवान्। मा अश्रूणि मोचय। यद्यपि अहम् अन्येषु विषयेषु त्वत्तः न अधिकः, तथापि वयसा ज्येष्ठः अस्मि। हन्त! नैव रोदितव्यम्" इति वदन् स्वस्य उत्तरीयेण तस्य अश्रूणि प्रमृष्टवान्। पुनः " किं मे वचनं दद्याः? तव श्रेयः वाञ्छन् अहम् एतत् वदामि। त्वयि मे स्नेहः त्वां प्रतिज्ञाबद्धं कर्तुं मां प्रेरयति। मम हस्ते हस्तं निधाय ब्रूहि यत् त्वम् इतः प्रभृति भार्यायां सानुरागः वर्तिष्यसे" इति सः कुट्टानं बलात् अनुरोधितवान्। कुट्टानः तस्य प्रतिवचनं न अदात्। वीरभूपतिः पुनः तं " किं ते भार्या रूपवती" ? इति अपृच्छत्। कुट्टानः

वीरभूपतिः तं गाढं परिष्वज्य, तस्य मूर्धानम् आघ्राय, अवोचत् " विलम्बेन न किञ्चित् अपहीयते। सुष्ठु विचार्य यत् करणीयं तत् कुरु। मया वारं वारं किं वचनीयम् ? त्वया एतद्विषये प्रतिज्ञातम् इति मा विस्मर "। " अथकिम्। प्रतिज्ञातं मया "। अर्धाङ्गीकारं सूयचन्त्यां कुट्टानस्य वाचि, तस्य शिरः पूर्णाङ्गीकारं प्रकटयत् अचलत्। ततः कञ्चित्कालं यावत् तयोः न कः अपि अभाषत। कुट्टानः शिरः उन्नमय्य वीरभूपतिं अवालोकयत्। सा तस्य दृष्टिः तं स्वकथां कथय इति पृच्छन्ती इव आसीत्। वीरभूपतिः शिरः अवनम्य दक्षिणहस्तेन वैगैसिकतां मुष्टिना गृह्णन्, विमुञ्चन् च वक्तुम् आरभत।

" सेतो ! मे रहस्यं इदं कस्मैचिदपि कथयितुं न अहम् ऐच्छम्। मद्रहस्यं गोपायितुम् अहम् आत्मना एव आत्मानं शप्तवान् आसम्। यत् अहं तं शापम् अपि वितथीकृत्य तुभ्यम् एतत् रहस्यं कथयितुं सन्नद्धः अस्मि – न जाने का शक्तिः माम् एवं कर्तुं प्रेरयति। यतः त्वं त्वदीयानि रहस्यानि मे अकथयः, ततः मे हृदयं त्वयि स्निग्धं जातम्। भवादृशेन यः मयि विस्रम्भः आदरः च दर्शितः, तेन मे हृदये अपूर्वं मार्दवम् आनीतम्। मम अभिनिवेशः च शिथिलीकृतः। किन्तु, सेतो! मत्कथायाम् उक्तायामपि न किञ्चित् प्रयोजनम् अस्ति। अस्मिन् जन्मनि मे अभीष्टं नैव सफलं भविष्यति। अहं दृढं जानामि यत् मम इच्छापूर्तेः अवकाशः एव नास्ति। तथापि तेन असाफल्येन मे हृदयम् अधुना अपि व्यथते। मम मनः तं वृत्तान्तं विस्मर्तुं न पारयति। यदि तं वृत्तान्तं मत्तः श्रोतुम् अर्ह कः अपि अस्ति – सः एकः त्वम् एव। किन्तु अहं त्वां प्रार्थये यत् – यदा अहं तां कथां कथयिष्यामि तदा मां किमपि मा पृच्छ। यावत् मया वक्तव्यं तत् सर्वं वक्ष्ये। किन्तु ग्रामनामानि गोपायिष्ये। तानि प्रकटीकर्तुम् अहं न इच्छामि। तेषां ज्ञानेन न किञ्चित् सम्पाद्यते च।

वयं राजवल्लीपुरवासिनः आन्ध्रदेशीयाः। पुरा मम प्रपितामहः विश्वनाथ नायकेन साकम् एतं देशम् आगतवान्। यद्यपि युद्धावसरेषु मे पितरः आयुधग्रहणम् अकुर्वन्, तथापि ते प्राधान्येन कृषिकर्मणि एव व्यापृताः आसन्। मम पितामहाः त्रयः सोदराः, मे पितरः च चत्वारः। मम पितुः वयं त्रयः पुत्राः। विश्वनाथ नायकेन वितीर्णा सर्वा भूमिः मम वंशीयानां मध्ये खण्डशः विभक्ता अभवत्। अधुना मम उद्योगसम्पादनम् आवश्यकं सञ्जातम्। अहं सम्प्रति अष्टविंशतिवर्षप्रायः। गते वत्सरे एव अहम् अवशिष्टां भूमिं मम भ्रातृभ्यां सह

व्यभाजयम्। यद्यपि मे बान्धवाः कृषिकर्मणि एव निरताः, तथापि तेषां युद्धवाञ्छा न अस्तङ्गता। अधुना अपि अवसरे प्राप्ते देशरक्षायै स्वरुधिरं स्यन्दयितुं मत्कुटुम्बे शिशुः अपि सन्नद्धः भवति।

यदा अहं चतुर्विंशतिवर्षीयः आसम्, अर्थात् चतुर्वर्षेभ्यः प्राक् केनचित् कारणेन कञ्चित् ग्रामं गतवान्। तद्ग्रामस्य नामधेयं वा, तत्र गमनकाणं वा पृष्ट्वा मां मा व्यथय। एकस्मिन् दिने अहं स्नात्वा स्वच्छवस्त्राणि परिधार्य तद्ग्रामे विहरन् आसम्। माम् आत्मस्तुतिपरं मा मन्यस्व। तदा अहम् अतीव मनोहराकारः आसम्। गृहसम्बन्धिभिः मनस्सम्बन्धिभिः च क्लेशैः एनेकैः मे सौन्दर्यं नष्टम् अभवत्। सम्प्रति मे नयनयोः कापि चिन्ता दृश्यते। तेषु दिनेषु मम अक्षिणी दुःखानभिज्ञस्य प्राणिनः नेत्रे इव, सायं विकसिते नीलोत्पले इव च आस्ताम्।

न स ग्रामः मे परिचितः। ग्रामान्ते कस्यामपि वीथ्यां महत् एकं सौधं आसीत्। तत्सौधवातायनात् कापि जगन्मोहनाकृतिः मामेव समुद्वीक्षन्ती आसीत्। अहम् अपि तां अपश्यम्। अहो! कथं वर्णयेयं तस्याः सौन्दर्यम्! सः सायंसमयः। क्षीयमाणे शिशिरर्तौ, वसन्तर्तुः शनैः अवतरन् आसीत्। वसन्तेन आत्मना सह आनीतेषु सकलेषु कुसुमेषु अपि तादृशं सौन्दर्यं न भवेत्। यदैव अहं ताम् अपश्यं, सा सपदि तस्मात् वातायनात् स्वशिरः उपसंहृतवती। ततः किं कार्यम् ? न मे पादौ गन्तुं प्राचलताम्। बलात् गन्तुं प्रयततः मम नेत्रयोः अश्रूणि अजायन्त। तत् हर्म्यं तु कस्य अपि महाधनिनः गृहम् इव अलक्ष्यत। क्व अहं, क्व च सा सौधश्रीः? एतत् अवगच्छतः मम मनसि वितताः आशातन्तवः भिन्नाः अजायन्त। अत्रान्तरे तत् वातायनं दुकूलेन पिहितम् अभवत्। तत् पिधानं मे प्रेमज्योतेः निर्वापणं इव अभासत। कथञ्चित् महता प्रयासेन ततः वसतिम् अगच्छम्।

ततः न मे रात्रिः, न वा प्रातः। सकलायां रात्रौ निद्रा अपि न आसीत्। उषसि एव काल्यानि परिसमाप्य, पुनः स्वच्छदुकूलानि परिधार्य, केशानि निर्घृष्य, मम वसतौ दर्पणं एकम् अविद्यत – तस्मिन् आत्मानम् अवालोकयम्। यावद्रात्रिं अस्वापात् चक्षुषी आरक्ते, कपोलौ परिम्लानौ। अक्षिणी निमीलतः। किन्तु अतीव मनोहरः आसम्। आत्मनः रूपं दृष्ट्वा स्वयं मुग्धः अभूवम्। सा मे मनसः भ्रान्तिः अपि स्यात्। यतः सुखदुःखे सौन्दर्यं च मनसः एव भावम्

अनुकुर्वतः।

अथ पुनः तामेव वीथिम् अगच्छम्। कार्यव्यग्रः इव इतस्ततः विचरन् आसम्। मुहूर्तेन वातायनात् सः दुकूलः शुकपक्षः इव संहृतः अभवत्। पुनः तत् जगन्मोहनं वदनं मम नेत्रयोः अग्रे सक्षादभूत्। सेतो ! न मे विश्वासः अभवत् यत् अहं तां पश्यन् आसम्। तत् तु बहुपुण्यराशिः किमपि नक्षत्रम्। केनापि पापलेशेन भूमिवतीर्णम्। मुहूर्तम् आवां परस्परदृष्टिप्रसारप्रवाहे मग्नौ अभूव। पुनः सः गवाक्षपटः शनैः अवततार। यथा यथा दिनम् अतीतं, तथा तथा मे धैर्यमपि शिथिलं जातम्। यावत् अहं तत्र आसं तावत् सा पुनः पुनः वातायनपटं संहृत्य मां प्रेक्षन्ती आसीत्।

तदारभ्य अहं तद्ग्रामगमनाय कारणभूतं कार्यं विस्मृत्य, प्रतिदिनं प्रातः सायं च तत्र गत्वा तामेव पश्यन् कालम् अयापयम्। सा अपि मयि सानुरागा इव अलक्ष्यत। एवं दिनसप्तकम् अतीतम्। सा एकस्मिन् आयसदुर्गे अवर्तत। न च तस्याः ततः बहिः आगन्तुं शक्तिः आसीत्, नापि मम अन्तः प्रवेष्टुम्। एतेषु सप्तसु दिवसेषु कदापि सा गवाक्षात् दर्शनं दातुम् अवकाशं न प्राप्नोत्।

एकदा सा माम् अनिमेषम् आलक्ष्य, ततः मुहूर्तं नेत्रे दृढं निमील्य, पुनः उन्मील्य, च अन्तः अगच्छत्। पुनः न आगता। तस्याः सा चेष्टा कः अपि सङ्केतः इति अवगम्य अपि अहं तस्य याथार्थ्यं ज्ञातुं न अपारयम्। वसतिं गत्वा, भोजनानन्तरं तस्यां रात्रौ यामद्वयात् ऊर्ध्वं तमसि पुनः तत्सौधसमीपम् अगच्छम्। गवाक्षात् आलोकः प्रसरति। अहं तस्य नातिदूरे स्थित्वा अकासम्। सा च मम उपस्थितिं विज्ञाय, किमपि वस्तु गवाक्षात् बहिः प्रास्य, अन्तः अगच्छत्। ततः सः गवाक्षः अन्धकारेण आवृतः अभवत्। अहं तस्मिन् अन्धतमसि व्यचिनवम्। सा वीथिः सकला अपि सुगन्धेन अपूर्यत। मया अन्विष्यमाणं वस्तु मे हस्तगतम् आसीत्। तच्च जातीमल्लिकाकुसुमैः गुम्फितम् एकं गुच्छकम्। तस्य सौरभं सोढुम् अहम् अशक्तः अभवम्।

वसतिं गत्वा तत् गुच्छम् उरसि निधाय नेत्रे निमील्य शयितवान्। मे मनः निग्रहीतुं अहं न अशकम्। कथं वा शक्नुयाम्? तत् गुच्छकमात्रम् अमन्वानः मनसा देवैः अपि अगम्यान् मनोरथान् निर्मितवान्। सर्वे सुप्ताः आसन्। अतः तत् गुच्छकं दीपस्य अन्तिकं नीत्वा अचुम्बम्। तत् उरसि निधाय तस्य स्पर्शं

प्रियाकरस्पर्शं सम्भावयन् अतुष्यम्। तेन मम वपुः पुलकित् अभवत्। किं माम् उपहससि? किं करवाणि? सर्वं तुभ्यं निवेद्यते।

ततः मे मनसि कापि बुद्धिः अजायत। तेन अहं तत् छिन्नम् अकरवम्। आश्चर्यं संवृत्तम्! तस्य अन्तः किमपि पत्रम् आसीत्। भूर्जपत्रे लिखतानाम् अक्षराणां स्पष्टतां कल्पयितुं कस्तूर्यादीनि द्रव्याणि तस्मिन् अलिप्यन्त। तत्सुगन्धः सर्वं गृहं व्याप्नोत्। मे भीतिः अजायत तेन गन्धेन दीपः निर्वाणं गच्छेत् इति, गृहजनाः जागृयेयुः इति च। तत्पत्रस्य पठनात् पूर्वमेव तं गोपायितुं मतिः अजायत। कुत्र गोपायेयम्? हृदयं विदार्य तस्य अन्तः स्थापयेयम्? हृदयं विदारयितुं मत्सकाशे खड्गः न आसीत्। एतस्मिन् सप्ताहे परित्यक्तखड्गः एव सञ्चरन् आसम्। मम आवेगं कथमपि निगृह्य तं पत्रं पठितुम् आरब्धवान्। प्रत्यक्षरं नूतनं स्वर्गं सृजन्तं तं लेखं सम्पूर्णतया पठितुम् अहं न अशक्नुवम्। अवशिष्टं श्वः पठेयम् इति विचिन्त्य गत्वा अशयम्। कथं वा स्वपेयम्! पुनः दीपसमीपं गत्वा किञ्चित् अपठम्। कः अपि जागृयात् इति भीतिः। सा रात्रिः मम जीवने परमोत्कृष्टः कालः। तावान् आनन्दः मया एकस्यां एव रात्रौ अनुभूतः इत्यतः अद्य यावत् मया दुःखमेव अनुभोक्तव्यम् इति विधिना लिखितं स्यात्।

सुप्ते मयि कुक्कुराः प्रभातं सूचयन्तः अकूजन्त। न खलु मयि सुप्ते – किन्तु केवलं शय्यां गते एव। प्रभाते मत्कार्यं विलम्बितम् इत्यतः मम पिता आगतवान्। येन कार्येण अहं तद्ग्रामं गतः, तत् कार्यं अविलम्बेन साधनीयं आसीत्। तम् असाधयता मया अतीव अपराद्धम्। किन्तु अहं निस्सहायः। परेद्युः तत्कार्यं साधितम्। मया निवृत्य गन्तव्यम् आसीत्। अहं तं ग्रामं त्यक्तुम् असमर्थः, किन्तु पित्रा सह मया अवश्यं गन्तव्यम्। प्रवहणम् आरुह्य आवां प्रतिनिवर्तमाणौ आस्ताम्। मम पिता मे कलेवरं गृहं नयन् आसीत्। मां तु सहस्रं नागाः पुच्छैः संरुद्ध्य पृष्ठतः कर्षन्तः आसन्।

महार्हायाः कस्तूर्याः स आमोदः मम पित्रा संज्ञातः। सः माम् अपृच्छत्। किन्तु अहं न किमपि प्रत्यवदम्। यावत् आवां गृहं न गतौ तावत् मम पिता सर्वं वृत्तान्तं ज्ञातवान्। सः तत्सर्वं मे मात्रे अकथयत्। का सा कन्या, कथं मया सा पुनः द्रष्टव्या– इत्येतत् सर्वं तस्मिन् पत्रे लिखितं आसीत्। अन्ये च कति विषयाः

तत्र लिखिताः! ये खलु मदृते न अन्येन केनापि द्रष्टव्याः, श्रोतव्याः वा। अवर्ण्या खलु मे व्यथा यदा मे पितरौ सर्वान् तान् विषयान् अजानीताम्। पक्षिभिः चञ्चुभिः नखैः च चेच्छिद्यमानफणस्य भुजङ्गस्य यादृशी व्यथा स्यात्, तादृशीं बाधाम् अहम् अन्वभवम्। किन्तु तौ मे पितरौ खलु। अन्यः कः अपि तत् मम रहस्यं न ज्ञातवान्। मम सहोदरौ अपि न ज्ञातवन्तौ। मे पितरौ मां चिबुके गृहीत्वा बहुधा प्रर्थितवन्तौ। महापत् स्वयं शिरसि न आनेतव्या इति, शालिक्षेत्रे मञ्चः एव निर्मातव्यः न तु महासौधं इति च अबोधयताम्। अनेकानि सप्ताहानि यावत् बाष्पाणि मोचयन्तौ आस्ताम्।

सेतो ! मया किं करणीयम्? इतः मनोरथः उपसंहर्तव्यः? फलोन्मखः खलु सः ! वाञ्छितः स्वर्गः पुरतः स्पष्टं परिदृश्यते खलु! यदा यदा अहं नेत्रे निमीलयामि, तस्याः रूपं परित्यज्य नान्यत् किञ्चिदपि साक्षाद्भवति। ततः पितरौ तोषणीयौ? तेषु दिनेषु न मे आहारः आसीत्, न वा निद्रा। उन्मत्तः इव पश्यन् आसम्। न मे पिता वा माता वा एकमपि निमेषं माम् अत्यजताम्। मासद्वयात् ऊर्ध्वम् अहं प्रकृतिं गत्वा, पुनः जीवलोकं प्रविष्टः। कथंकारं अहं वर्णयेयं तेषु दिवसेषु मया दृष्टानि दुस्स्वप्नानि, अक्षिनिमीलनेन लक्ष्यमाणानि घोरदर्शनानि च ! अन्ते पित्रोः प्रेम एव जयं प्राप्नोत्।

ततः सवत्सरं यावत् यदा यदा अहं लोचने न्यमीलयं सा मे प्रेयसी एव साक्षाद्भवन्ती आसीत्। साम्प्रतं तु स्वप्ने अपि न दृश्यते। ततः आरभ्य पितरौ मम तद्ग्रामगमनस्य अवसरः एव यथा न स्यात् तथा अकुरुताम्। यदि अहं तं ग्रामं गच्छेयं, तर्हि मे पितरौ सपदि प्राणं त्यजेताम् इति मे मनसि भीतिः उदपद्यत। तौ मां तथा अभीषयेताम्। तस्य ग्रामस्य दिशि परिवृत्य अपि न प्रेक्षेय इति प्रतिज्ञाम् अकरवम्। इत्थं – मरुदेशे स्वयमेव अदृश्यतां गता नदी इव मे प्रेम अन्तरधात्।"

ततः नीरवता, अन्धकारः च।

6

दिनानि यथास्थिति गच्छन्ति स्म। कुट्टानस्य मनःक्षोभः वीरभद्र भट्टरेण

ईषदिव अबुद्ध्यत। तस्य हेतुः तु न अज्ञायत। तस्य स्थितिं वर्णयत् पत्रं रामनाथं प्रति प्रहितम्। एकदा कुट्टानवीरभद्र भट्टरौ राजनीतिपाठशालां गतौ। मध्याह्ने भानुः तीक्ष्णांशून् विकिरन् आसीत्।

एकवीरायाः आहारः क्रमशः क्षीयमाणः आसीत्। तस्याः तनुः दिने दिने शुष्यति। आयते तस्याः अक्षिणी निम्ने जाते। कपोलयोः परीक्षीणत्वात् पारावतोदरवत् मृदु तस्या वदनं विगलितमधुकोषा वृक्षशाखा इव शोभाहीनं शुष्कं च अभवत्। प्रतिदिनसंस्कारविरहितानि तस्याः केशानि यदा संस्कृतानि तदा स्निग्धानि, अन्यदा तु अरम्याणि च आसन्। प्रारम्भदिनेषु सुसंस्कृतकेशा सुवेषा च वर्तन्ती एकवीरा क्रमेण वेषभूषादिषु अनास्था सञ्जाता। एतानि रहस्यानि दासीजनस्य दृष्टिं कथम् अतिवर्तेरन्? एकवीरा प्रकृत्या अतीव धीरा दृढहृदया च। परमाणि रहस्यानि आजीवं स्वमनसि एव गोपायितुं सा शक्ता। तस्याः रहस्यं ब्रह्मणा अपि न ज्ञायते।

तिरुचुनापल्लिमण्डले आल्वारुकुरुच्चि नामकः ग्रामः अस्ति। सः एव अम्बासमुद्रः इत्यपि व्यवह्रियते। अम्बासमुद्रः तिरुचुनापल्लिमण्डले विशालः ग्रामः। यद्यपि न तिरुचुनापल्लिसमानः, तथापि तस्मात् किञ्चिदेव न्यूनः। तन्मण्डलाधिपस्य पालने दश ग्रामसमूहाधिपाः आसन्। यथा मण्डलाधिपाः मथुरानायकान् सेवन्ते तथा एते मण्डलाधिपं सेवन्ते। अम्बासमुद्रग्रामसमूहाधिपस्य पालने षट् शतं ग्रामाः सन्ति। एतेषु षट् शतग्रामेषु सः एव अधिकृतः। तस्य शासने पञ्चसहस्रसंख्याकं सैन्यम् आसीत्। तिरुचुनापल्लिमण्डलाधिपस्य अधिकारस्थेषु सर्वेषु ग्रामसमूहाधिपेषु सः एव धनी बलवान् च। अम्बासमुद्रे तस्य दुर्गं वर्तते। ग्रामसमूहाधिपैः एतादृशानि दुर्गाणि न निर्मातव्यानि। किन्तु अनेन दुर्गे निर्मिते, मण्डलाधिपः किमपि वक्तुम् अक्षमः तूष्णीम् आस्त।

एकवीरा तस्य एतस्य पुत्री। तस्याः कनीयसौ द्वौ भ्रातरौ स्तः। तस्याः पितुः सा एका एव स्त्रीसन्ततिः। महाकुलप्रसूतत्वात् एकवीरा आबाल्यं सर्वान् भोगान् अन्वभवत्। किन्तु सा पितुः वात्सल्यं न अजानात्। तस्याः पिता राक्षससदृशः, अतीव क्रूरः च। सः स्वपाल्यग्रामेभ्यः करग्रहणे वा अन्येषु राजकार्येषु वा नितरां कठिनः। पत्न्याः विषये वा अपत्यानां विषये वा तस्य मनसि प्रेमैव न आसीत्।

तस्य मुखे विलोकिते राक्षससन्दर्शनेच्छा पूरीक्रियते। किन्तु एकवीरायाः माता सुगुणालवाला। प्रायः लोके दुर्जनं सुगुणवत्या, सुजनं दुष्टया, कुरूपं सुरूपया, रूपवन्तं विरूपया च योजयतः भगवतः लीलां न कः अपि जानाति। यथा एकवीरायाः पिता दुर्मार्गः, राक्षसकल्पः, विरूपः च, तथा तस्याः माता सन्मार्गा, पृथ्वीसदृशा, रुपवती च। एकवीरा रूपेण सर्वथा मातरम् एव अन्वगच्छत्।

उदयन सेतुपतिः स्वकुमारस्य एकवीरया सह विवाहपरिकल्पनेन दशग्रमान् प्राप्नोत्। गजाः अश्वाः धनं च पर्याप्तं लब्धम्। एष विवाहः आल्वारुकुरुञ्चिग्रमे एव सम्पन्नः। विवाहमहोत्सवस्य त्रिषु अपि दिनेषु वधूवरौ द्वौ अपि रोगपीडितौ आस्ताम्। वधूः तु रुदन्ती एव आसीत्। सर्वे बालिका मुग्धात्वेन भीतिं गता इति अचिन्तयन्। उत्सवेषु कुट्टानस्य स्थितिः विचित्रा आसीत्। सः पितुः सविधे भीतः न किमपि अवोचत्। तस्य परोक्षो सर्वेभ्यः अकुप्यत। उद्वाहसमये वधूवराभ्यां अन्योन्योच्छिष्टं ताम्बूलं न चर्वितं, परस्परनाम्नी अपि न उक्ते। चरमे दिने एकवीरा पत्युः नाम गृहीतवती। कुट्टानः तु न किञ्चित् अवोचत्। सर्वे भीताः अजायन्त।

सम्प्रति एकवीरा अष्टादशवर्षदेशीया । कूलङ्कषा नदी वा, सस्यपूर्णं क्षेत्रं वा तत्सैन्दर्यस्य उपमा भवितुम् अर्हति। सा द्राविडभाषायां सर्वान् सद्ग्रन्थान् अपठत्। तस्याः पितुः गृहे एकमपि पुस्तकं न आसीत्। सा मातुः अनुमत्या पुरोहितगृहात् ग्रन्थान् आनाय्य पठितवती । सद्ग्रन्थपठनेन तस्याः मनः पल्लवितं फलितं च अभवत्, सा च सुकुमारभावानाम् उद्भवः अजायत।

तस्मिन् मध्याह्ने भानुः तीक्ष्णांशून् विकिरन् आसीत्। एकवीरा प्रकोष्ठं गत्वा शयितवती। स्वस्याः पेटिकाम् उद्घाट्य ततः 'अव्वैयार' विरचितौ 'कोण्ड्रैवेन्दन्', ' अतिच्चूडि' नामकौ ग्रन्थौ उपगृह्य पठितॉम् आरभत। अव्वैयार षष्टिवर्षप्राया वृद्धा। सा सरस्वत्याः अंशावतारः आसीत्। तया ग्रथिताः ग्रन्थाः अर्थगम्भीराः अपि सुग्राह्यत्वात् आन्ध्रभाषायाः सुमतिशतकवत् बालानां पाठयोग्याः आसन्। एकवीरा अतिच्चूडि ग्रन्थम् उद्घाट्य प्रथमम् "आरञ्जे विरुम्बु" (धर्मं चर) "अरुवदु शिवं" (मा कुप्याः) इति पठित्वा पुस्तकं पिहितवती। तस्याः मनसि "धर्मं चर" इत्येतदर्थकं तमिलधर्मवाक्यं पुनः पुनः

ध्वनत् आसीत्। सा नेत्रे निमील्य शय्यायाम् अशेत। अकस्मात् उत्थाय द्वारदेशं गत्वा कः अपि आगतः इति चिन्तयन्ती बहिः विलोक्य, आत्मना प्रमदितमिति मत्वा पुनः अशेत। निदाघोष्मणा तस्या शरीरं सन्तापाकुलमभवत्।

सौधस्य पश्चाद्भागे पटलस्य अधः कुड्यम् अनुसन्धाय चतुरस्राकारा भित्तिका निर्मिता आसीत्। सा सदैव जलपूर्णा विद्यते। शिलानिर्मितत्वात् तस्यां जलं सर्वदा शीतलं वर्तते। एकवीरा सर्वाणि आभरणानि अवमुच्य, काश्मीरराङ्कवं दूरे निधाय महार्हं दुकूलं धृत्वा एव तस्मिन् जले निममज्ज। तत् जलं तस्याः उरोदघ्नम् अवर्तत। सा शिरः अपि न्यमज्जयत्। अतः पूर्वमेव अलङ्कारिकया परिमलयुक्तेन तैलेन आक्तानि, संस्कृतानि च तस्याः शिरोजानि वेणीबन्धविमोचनेन तस्मिन् अल्पे जलाशये शैवालानि इव अराजन्त। तत्तैलेन वासितं तत् जलं घुमघुमायितम् अभवत्।

कापि परिचारिका एतत् दृष्ट्वा "स्वामिनि ! किमेतत्? किमहम् अङ्गम् उद्वर्तयानि" ? इति अवदत्। आज्ञासूचिकया एकवीरायाः भ्रूकुट्या तर्जिता सा तूष्णीं ततः निष्क्रम्य, कवाटस्य पश्चात् स्थिता, ताम् अवलोकयन्ती अतिष्ठत्। मुहूर्तेन एकवीरा ततः उत्तीर्य स्वं प्रकोष्ठं अगच्छत्। तस्याः पथि जलप्रवाहः अजायत। प्रकोष्ठं प्रविश्य, कवाटं पिधाय, क्लिन्नवस्त्रा एव वामहस्तविन्यस्तकपोला भूमौ उपाविशत्। अग्रे भित्तौ मीनाक्षीदेव्याः, तस्याः वस्त्रं हरतः सुन्देरेशस्य च मूर्ती विन्यस्ते आस्ताम्। सा ते एव विलोकयन्ती अतिष्ठत्। "प्रभो सुन्देरेश ! किमेते मोहपाशाः योगीश्वरेश्वरं भवन्तम् अपि न त्यजन्ति? अथवा मानवाः एव आत्मनां मनस्सन्तोषाय त्वाम् एवंविधम् आलिखन्ति "? एकवीरा उत्थाय वस्त्रान्तानि हस्तेन समपीडयत्। जलं भूमौ पल्वलीभूतम् अभवत्। ततः सा तं वस्त्रं परित्यज्य, शरीरं शिरः च सम्यक् प्रमृज्य स्वपेटिकाम् उद्घाट्य तत्रत्यानि सर्वाणि वस्तूनि भूमौ न्यस्तवती। तस्याः उद्वाहसमये मातुलः तस्यै एकं दुकूलं दत्तवान्। तत् तस्यै अतीव रोचते। अतः सा तं दुकूलं उद्‌घृत्य अधारयत्। सर्वाणि आभरणानि परिधार्य, आदर्शस्य पुरतः स्थित्वा स्वं सौन्दर्यं पश्यन्ती अशोचत्। तदन्तरे कः अपि भावः तटिल्लता इव तस्याः मनसि अस्फुरत्। ततः एकवीरा पार्श्वस्थायां शय्यायां निपत्य, रुदित्वा-रुदित्वा अस्वपत्।

7

रुद्ररूपेण मालाच्छेदनदिनात् आरभ्य कुट्टानः रात्रिषु एकवीरया साकं निद्रितुं न गच्छति स्म। शरीरस्य अस्वास्थ्यं व्याजीकृत्य स्वप्रकोष्ठे एव निद्राति। पाठशालामपि सम्यक् न गच्छति। वीरभद्र भट्टरः तस्य हेतुं न अजानात्।

परेद्युः कुट्टानः दिने विमनाः चरित्वा, सायं स्नात्वा, शुभ्रवस्त्राणि धृत्वा, विहारार्थं गत्वा, शीघ्रं प्रतिनिवृत्तः। सूर्यः अस्तं गच्छन् आसीत्। अध्ययनप्रकोष्ठे सः स्वशय्यायाम् अशेत। आरक्ते तस्य अक्षिणी निमीलिते। सपदि तस्य प्रेयस्याः मुखं दृष्टिगोचरीभूय, पुनः अदृश्यताम् अगच्छत्। कुट्टानः नेत्रे उन्मील्य पुनः न्यमीलयत्। दीनदृष्टिः वीरभूपतिः आत्मानम् एकवीरायां प्रणयं वोढुं प्रार्थयन् अदृश्यत। कुट्टानः उत्थाय पर्यङ्के निषण्णः एवम् अचिन्तयत् "कुतः वीरभूपतिः मां मद्भार्यायां प्रेमभावं बद्धुं प्रार्थयते? तस्य मम भार्यया सह कः सम्बन्धः? अहं मम जायायां प्रेम बध्नामि वा न वा। किं तेन तस्य ? कुतः अहं गृहविषयान् तस्मै अकथयम् ? हा ! हन्त ! अन्तःपुररहस्यान् तस्मै आख्यायन् अहं कथं बद्धिहीनः समभवम् "! कञ्चित्कालं सः निश्चलया दृष्ट्या गवाक्षात् बहिः स्थितान् पूगीवृक्षान् पश्यन्नासीत्।

ततः सः पुनः शय्यायाम् अशेत। पुनः तस्य मनः चिन्तामग्नम् अभवत्। "वीरभूपतिः मम अत्यन्तं प्रियः सुहृत्। मित्राय अनिवेद्यानि रहस्यानि कानि स्युः ? तस्मै मद्रहस्यकथने न कः अपि देषः अस्ति। किं तेन तद्रहस्यं मह्यं न निवेदितम्? हन्त ! कीदृशीं दुरवस्थां गतः अस्मि ! आत्मनः छायां दृष्ट्वा अपि बिभ्यन् अस्मि। अहं तस्य एकमात्रः सुहृत् इत्यतः मम क्षेमं कांक्षन् मे हितं अवोचत्। एतावता मम भार्यया सह तस्य सम्बन्धः कुतः स्यात्? नरस्य मनः अतीव दुष्टम्। न खलु तत् – एतत् चिन्तनीयम्, एतत् अचिन्तनीयम् इति विमृशति। नाहं तस्याः स्त्रियः मुखं द्रष्टुं शक्नोमि। कथं तया सह भाषितव्यम् ? कथं तस्यां प्रेतव्यम्? "

कुट्टानः उत्थाय लेखनफलकस्य समीपमगच्छत्। तस्मात् एकं भूर्जपत्रं गृहीत्वा लेखनीं मषीपात्रं च सन्निहितं अकरोत्। कस्मै अपि लेखमेकं लिखितुं

समकल्पयत्। अनुपदमेव पत्रलेखनम् उपसंहृत्य शय्यां गतः नेत्रे न्यमीलयत्। सन्दर्भरहिताः बहवो भावाः तस्य मनसि प्रादुरभूवन्। "यद्यहं अस्मिन् क्षणे मृतः, ततः किं स्यात्? आरात्रि न कः अपि ज्ञायेत। भोजनकाले वीरभद्र भट्टरः अत्र मा दृष्टुम् आगच्छेत्। राज्ञः द्वितीयपुत्रः तिरुमल नायकः मम परममित्रम्। मम मरणवार्तां श्रुत्वा सः काम् अवस्थां गच्छेत् खलु ! एतां वार्तां प्राप्य मे मातापितरौ आगच्छेयुः। मम माता न जीवेत्। हन्त ! कः वा ज्ञायेत मम मृतेः कारणम् ! किं वा मे प्रेयसी चिन्तयेत्? किं वा मे पत्नी कुर्यात्? रुद्यात् वा ? नैव रोदिष्यति। मम तस्याः च कः वा सम्बन्धः? तथापि यावज्जीवं तया वैधव्यम् अनुभोक्तव्यमेव खलु! मयि तस्याः ईषदपि वा प्रेम स्यादेव। नो चेत् कुतः तस्यां रात्रौ मम कण्ठे मालां अर्पयेत्" ?

कुट्टानस्य भाववाहिनी अविरतं वहन्ती कथञ्चित् विरामं प्राप्नोत्। कुट्टानः उत्थाय उपाविशत्। तस्य मनः निर्वृतम् इव आसीत्। लेखनफलकं गत्वा लिखितुं आरभत। प्रथमं "प्राणेश्वरि" इति सम्बोधनम् अलिखत्। किन्तु तस्य मनः तत् न अङ्गीचकार। तत् त्यक्त्वा " कुलकामिनि" इति अलिखत्। तं पत्रं विदार्य अन्यं गृहीत्वा तस्मिन् " कुलकमिनि" इति सम्बुध्य ततः स्वं प्रेमवृत्तान्तम् अलिखत्। ततः तत्सर्वं निरर्थकं मन्यमानः तं पत्रं अपि अदारयत्। गृहे एव स्थितां भार्यां प्रति पत्रलेखनं तस्य निरर्थकं प्रत्यभात्। एकवीरया सह भाषितुं युक्तमिति अमन्यत। अनुपदमेव "किमिति" ? इति प्रश्नः उदभूत्। चिन्ता न प्रसृता। तदन्तरे द्वारि शब्दं श्रुत्वा तांदिशं तस्यां दिशि अवालोकयत्। वीरभद्र भट्टरः द्वारोद्घाटनेन अन्तः आगत्य तस्मै लेखम् एकम् अदात्।

कुट्टानः – "किमेतत्"?

भट्टरः – "भवतां पितृपादानां सकाशात् आगतः लेखः"

कुट्टानः – "किमिति" ?

भट्टरः – "पठ्यताम्"।

कुट्टानः – "उच्यताम् "।

भट्टरः – "भवतां मनः अस्वस्थं इति अलिखम् "।

कुट्टानः – "मनः कथम् अस्वस्थम् "?

भट्टरः – "चतुर्भ्यः दिनेभ्यः रुग्णः अस्मि इति वदथ खलु"।

कुट्टानः – "अथकिम्। रुग्णं तु मे शरीरम् "।

भट्टरः – "भिषजः नाड्यां कः अपि दोषः नास्ति इति वदन्ति खलु"।

कुट्टानः – "ततः"?

भट्टरः – "भवतां मातृदेवी परमेश्वरसमुद्रे भवतां मातुलगृहे वर्तते किल। चत्वारि दिनानि तत्र उषित्वा विश्राम्यतां इति भवत्पितृपादाः आदिशन् "।

कुट्टानः – (चिन्तां अभिनीय) "यदि गन्तव्यं तर्हि कदा " ?

भट्टरः – "अधुना एव। भोजनानन्तरं प्रवहणं आरुह्यते चेत् परश्वः उषसि एव तत्र गन्तुं शक्यते "।

कुट्टानः – "तर्हि प्रयाणाय सर्वं सज्जीकुरुत "।

8

तेषु दिवसेषु वृषभशकटानां चत्वारि चक्राणि विद्यन्ते स्म। राजशकटस्य उपरि वितानमपि भवेत्। सः शकटः इति रथः इति च व्यवह्रियते। राजशकटः विविधैः वर्णैः घण्टाभिः च अतीव शोभते। मार्गाणि सम्यक् निर्मितानि आसन्। प्रधानानां पट्टाणानां शिलानिर्मिताः पन्थानः आसन्। इतरत्र रथानां चक्राहत्या कल्पिताः एव पन्थानः। मार्गेषु अतीव चोरभीतिः आसीत्। तिरुवत्तूरुः मथुरायाः ईशान्यदिशि आसीत्। परमेश्वरसमुद्रः तिरुवत्तूरुमथुरयोः मध्ये अवर्तत। तस्मिन् काले देशनाम्नाम् अन्ते "नाडु" "समुद्रः" "मङ्गलम्" इत्यादयः वर्तन्ते स्म। मथुरायाः परमेश्वरसमुद्रः पञ्चदशक्रोशेषु आसीत्। दशक्रोशेषु

अतीतेषु चोरभीतिः आसीत्, मथुरायाः समीपे न।

यदि कः अपि मथुरानगरात् बहिः गच्छति, यदि वा कः अपि आगन्तुकः अन्तः आगच्छति, तर्हि अधिकारिणः विज्ञापितव्याः। एतमधिकारं पालयितुं कश्चन राजपुरुषः अधिकृतः आसीत्। तस्मिन् सायंकाले एव वीरभद्र भट्टरः तं अधिकारिणं सन्दृश्य कुट्टान सेतुपति महाराजः परमेश्वरसमुद्रं गमिष्यति इति तं विज्ञापयामास।

एकवीरायाः आगमनानन्तरं कुट्टानस्य एषः एव प्रथमः अवसरः कुत्रापि गन्तुम्। एकवीरा तेन सह नेतव्या वा न वा इति प्रश्नः उदभूत्। भट्टरः सविनयं "प्रभो ! ताम् अपि नेतुम् उचितम्" इति विज्ञापितवान्। कुट्टानः तु " मध्येमार्गं चोरभयम् अपि अस्ति। दिनद्वयगम्यः मार्गः। यदि सा नेताव्या तर्हि परिवारः दासीजनः च प्रस्थातव्यः भवेत्। तत्र च चतुर्दिनपरिमितः एव वासः। तदर्थं एतावान् प्रयासः अनावश्यकः" इति अवदत्। सर्वे अङ्गीकृतवन्तः।

रात्रौ सार्धयामे अतीते सर्वे प्रस्थिताः। पञ्च शकटानि। मध्यस्थे शकटे महार्घानि उपधानानि आस्तीर्णानि। तस्मिन् कुट्टानः एकः एव विश्रान्तः। तस्य अग्रे द्वे शकटे, पृष्ठतः च द्वे शकटे आस्ताम्। चतर्षु एतेषु शकटेषु एकैकस्मिन् चत्वारः भटाः आसन्। षोडशभटैः एतैः सह पञ्च सारथयः अपि अविद्यन्त। सर्वेपि ते आयुधहस्ताः। सर्वेषां नायकः कुट्टानः। यद्यपि सः वयसा नातिपरिणतः, तथापि तस्य बाहुबलं, विवेकः च मथुराराज्ये प्रसिद्धौ एव। शकटानि अग्रे गतानि। वीरभद्र भट्टरः इतरैः सेवकैः साकम् अन्तःपुररक्षार्थं मथुरायां एव स्थितः।

शकटानि गोपुरद्वारम् अगच्छन्। दुर्गकवाटः पिहितः आसीत्। तत्रत्याः भटाः कवाटम् उद्धाटयितुं न अङ्गीचक्रुः। सैन्याध्यक्षः मथुरायां नास्ति इत्यतः प्रधानी तस्य कार्यभारं निर्वहन् आसीत्। तस्य आज्ञां विना दुर्गद्वाराणि राजकुमाराणां कृते अपि न उद्धाट्यन्ते। कुट्टानः सेवकम् एकं वीरभद्र भट्टरस्य सकाशं प्राहिणोत्। भट्टरः तस्यां रात्रौ प्रधानिनः सम्मुखात् आज्ञापत्रम् आनीतवान्। द्वारि रक्षकभटाः अत्यन्तं जागरूकाः अतिष्ठन् । कवाटे उद्धाटिते पञ्चशकटानि निमेषाभ्यन्तरे बहिः अगच्छन्। वीरभद्र भट्टरस्य "भर्तः ! आज्ञा दीयताम्" इत्येताति वचांसि झटिति पिहितस्य कवाटस्य ध्वनौ अलीयन्त।

शकटानि तमसि गन्तुमारभन्त। कुट्टानः मृदुषु उपधानेषु अशेत। मार्गः उत्खातरहितः आसीत्। तथापि सः निद्रां न अलभत। तस्य भावनाशक्तिः प्रसरन्ती आसीत्। "कथं मे पिता मम प्रेयस्याः स्थानं प्रति मे गमनम् अङ्गीकृतवान्? किं सा तत्र नास्ति ? कुतः वा न भवेत्? अपि मे पिता भार्यया सह गार्हस्थ्यजीवनं नयन् अहं पुनः तान् प्रेमभावान् न वहेयम् इति अमन्यत? गते मासत्रये एकवीरा गृहे एकाकिनी न अवर्तत किल। मम प्रस्थानानन्तरं का तस्याः स्थितिः भविष्यति? मम अनुपस्थित्या किं सा रोदिष्यति? परमेश्वरसमुद्रगमनानन्तरं किमहं मे प्रेयसीं द्रष्टुं शक्ष्यामि? कदाचित् तस्याः पितरौ तां मे दृष्टिगोचरीभवितुं न अनुजानीयुः। सा केनापि ऊढा भर्तृगृहं गता स्यात्। किं सा मां परित्यज्य अन्यं परिणयेत् ? कुतो न परिणयेत्? किमहं न पर्यणयम्? अहं तु अस्वतन्त्रः खलु। किं सा स्वतन्त्रा"? अद्यन्तरहिता इयं चिन्ता समाप्तिं न अगच्छत्।

कुट्टानः – "कियान् अध्वा अतीतः"?

भटः – "एकः क्रोशः अतीतः"।

कुट्टानः – "क्रोशः अतीतः ? न अहं निद्रां लभे। आल्वारुम् आकारय। कथां काञ्चित् कथयिष्यति"।

पृष्ठतः शकटात् आल्वारुः आगतः। शकटम् अनुसृत्य गच्छन् सः स्वबाल्ये पितामह्या श्राविताः कथाः सर्वाः अकथयत्। किञ्चित् दूरे अतीते कुट्टानः आल्वरुणा अविज्ञातम् एव अस्वपत्। ततः आल्वारुः स्वस्य शकटं गत्वा अशेत। सेवकाः पर्यायैः जागृताः आसन्। प्रभाते ते शोलापुरं प्रापुः। तत्र एकं सरः कमलैः कल्हारैः च शोभते स्म। तत्र सर्वे शकटानि अवतीर्य, काल्यानि निर्वर्त्य, पुनः प्रातिष्ठन्। दिनस्य प्रथमे यामे अतीते शकटानि तिरुवेङ्गडनल्लूरं प्राप्नुवन्। तत्र पाण्ड्यराजभिः निर्मिता धर्मशाला अवर्तत। मथुराराजानः पाण्ड्यराजभिः निर्मिताः धर्मसंस्थाः सर्वाः अपि तथैव निर्वहन्तः आसन्। शकटानि धर्मशालायाः पुरतः स्थापितानि। तस्यां एकस्मिन् प्रकोष्ठे कुट्टानस्य वस्तूनि सर्वाणि निधाय, तत्रैव तस्य उपधानानि अपि अस्तीर्य सेवकाः तं प्रकोष्ठं सज्जीकृतवन्तः। इतरे सेवकाः भोजनादिकानां संभरणे व्यग्राः अभूवन्।

कुट्टनः कवाटं पिधाय प्रकोष्टे उपविश्य स्वपेटिकाम् उद्घाट्य तस्याः चन्दनदारुनिर्मितां मञ्जूषाम् अगृह्णात्। तस्यां चत्वारः भागाः सन्ति। एकस्मिन् भागे शुष्काणि मल्लिकाकुसुमानि वर्तन्ते। द्वितेये मृत्, अवशिष्टयोः भागयोः कस्तूरी च स्तः। पुरा यदा कुट्टानः आत्मनः प्रेयसीम् उपगतवान्, तेषु दिनेषु एकदा प्रातः ताम् अनुसृत्य तस्याः गृहान्तिकम् अगच्छत्। सत्वरं गच्छन्त्याः तस्याः वेण्याः मल्लिकास्रक् स्रस्ता भूमौ अपतत्। तां स्रजं कुट्टानः गृहीत्वा अनर्घवस्तुमिव गोपायितवान्। तान्येव मञ्जूषायाः प्रथमभागस्थानि मल्लिकापुष्पाणि। अपरस्मिन् दिवसे सा देवतायतनस्य प्राग्भागे पुष्पवाटिकायाम् उपविष्टा। ततः तस्याः गमनानन्तरं कुट्टानः तत्प्रदेशात् मृदं संगृह्य तस्यां चन्दनचूर्णं मेलयित्वा तां द्वितीये भागे गोपायितवान्। तृतीया च कस्तूरी। सः एकदा तस्यै कस्तूरीं प्रेषयामास। सा च तस्याः अर्धं गृहीत्वा परिशिष्टं पुनः तस्मै प्रत्यर्पितवती। सा एव एषा।

कुट्टानः मञ्जुषां नेत्रयोः अर्पयित्वा, मृत्तिकां तिलकयित्वा कस्तूरीं अधराभ्यां अस्पृशत्। तस्य नयनयोः स्रस्तं बाष्पं तस्यां पपात।

कुट्टानाय आहारः न अरोचत। किञ्चित् अतीते मध्याह्ने पुनः शकटानि अयोजयन्। आतपे प्रयात्य तानि अस्तं गच्छति सूर्ये तिरुत्तणिं प्राप्तानि। तत्र पुनः ते भोजनानि अकुर्वन्। एतावता दशक्रोशपरिमितः पन्थाः अतीतः। इतः परं चेरभयम् आसीत्। रात्रौ शीघ्रमेव यात्रा आरब्धा। सर्वे जागरूकाः आसन्।

आन्ध्रभृत्यवंशस्य वा, चोलानां चालुक्यानां वा पालनकाले दक्षिणदेशराजानः समुद्रतीराणि, वाणिज्यम्, अन्यद्वीपैः वा देशैः वा सम्बन्धान् च न अत्यजन्। चालुक्यानां काले, ततः पूर्वं आन्ध्रानां पालने च राजानः समुद्रं तीर्त्वा अन्यद्वीपान् विजितवन्तः। ततः काकतीयानां काले - तेषां राजधानी समुद्रेण वा कया अपि नद्या वा असम्बद्धा निर्मिता आसीत्। तेन पूर्वराज्ञां काले वृद्धिं गतं नौकाजीवनं तेषां काले कुण्ठितम् अभवत्। कोण्डवीडु रेड्डिराज्ञां काले नौवाणिज्यं पुनः व्यजृम्भत। कृष्णदेवरायः अपि नौकाजीवनस्य विषये श्रद्धां न दत्तवान्। अस्माकं शास्त्राणि अपि चतुरङ्गबलेषु नौकाबलं न अगणयन्। तेन कारणेन भारतीयाः राजानः समुद्रविषये जागरूकाः न अवर्तन्त। अतः देशस्य महापत् या अघटत सा समुद्रमार्गेणैव आगता।

मथुराराजानः अपि समुद्रवाणिज्यविषये मतिं न अकुर्वन्। सर्वाणि समुद्रतीराणि पोर्चुगीसानाम् इतरदेशीयानां च वशे अत्यजन्। ततः अन्यदेशीयाः अस्मद्देशीयान् तृणीकुर्वन्त आसन्। यदा यदा इतरदेशीयाः अस्माकं देशम् आगच्छन्, तदा तदा दयावन्तः अत्रत्याः राजानः तान् यथाविधि सत्कृत्य, अतिथिगौरवेण तेषाम् आवश्यकानि सर्वाणि कार्याणि समपादतन्। ते च आतिथेयिनः एव गृहे चौर्यम् अकुर्वन्। इतरदेशेभ्यः नानाजातीयाः आगत्य देशे सर्वविधाम् अशान्तिम् उत्पादयन्तः आसन्। समुद्रतीरपट्टणानि सर्वाणि मथुराराज्ञां वशे न आसन्। दस्यवः देशे चौर्याणि कृत्वा तीरपट्टणेषु आश्रयं लभमाणाः आसन्। अधिकसंख्याकाः दस्यवः विदेशीयाः एव। यूरोपखण्डे जीविकाम् अलभमाणाः जनाः इतरदेशान् आश्रयन्ति स्म। न तत् अयुक्तम् । किन्तु ते भारतदेशे स्वमतं व्यापयितुम् आरभन्त।

रात्रौ यामद्वयं यावत् शकटानि दुर्गमेण अरण्यमार्गेण गच्छन्ति आसन्। सर्वे जागरूकाः अवर्तन्त। मार्गे विशालः तटाकः, तं परितः अविरलः वृक्षसमूहः च अविद्यत। तत्मीपं गच्छत्सु शकटेषु चोराणां बृन्दमेकम् आपतत्। भटाः सर्वे करवालान् उवद्धृत्य सन्नद्धाः अजायन्त। कुट्टानः शकटात् सिंहकिशोरः इव निष्पत्य चोरैः अयुद्ध्यत। सर्वेषु पलायितेषु, खड्गाहतः एकः चोरः तु भूमौ निपत्य उत्थितुम् अशक्तः अतिष्ठत्। भटाः करदीपिकां प्रज्वाल्य तं पर्यशीलयन्। सेवकाः तं अभिज्ञाय "परंगिः, परंगिः" इति उच्चैः अवदन्। तस्य करचरणानि बद्ध्वा तं शकटम् आरोपयन्। एतद्धटनायाः हेतोः ते प्रभाते विलम्बेन परमेश्वरसमुद्रं प्रापुः।

9

श्वेतं पुरुषं दृष्ट्वा परमेश्वरसमुद्रजनाः कुतूहलेन संहताः तं द्रष्टुमागताः। परमेश्वरसमुद्रः अतीव अल्पः जनपदः। यदि सः तिरुवत्तूरुगमनमार्गे न अभवत्, तर्हि तस्य शिलानिर्मितः मार्गः न अभविष्यत्। तिरुवत्तूरुतः मथुरां वा, मथुरातः तिरुवत्तूरुं वा गच्छतः अश्वान् गजान् अपि द्रष्टुं कुतूहलेन धावतां परमेश्वरसमुद्रजनानां श्वेतजातीयदर्शनकुतूहले न किमपि अश्चर्यम्। सर्वे

भोजनार्थं गताः। बालकाः तु शकटं परिवृत्य एव स्थिताः।

कुट्टानस्य मातुलपुत्रः अतिवीरवर्मा पञ्चविंशतिवर्षदेशीयः। उत्साहवतः तस्य मुखे राजश्रीः स्फुटं चकस्ति। सः गृहस्य चतुश्शालायाम् उपविश्य "सूर्यः अस्तमेति। परंगिम् आनयत" इति आज्ञप्तवान्। सेवकैः आनीतः परंगिः विनीतः प्राविशत्। वीरवर्मा "किम् एतस्मै भोजनं दत्तम्" ? इति अपृच्छत्। सेवकाः "दत्तम्" इति प्रत्यवदन्। "किमेतस्य क्षतं चिकित्सितम्" ? "आम्। चिकित्सितम्"। कुट्टानस्य मातुलः अम्बष्ठम् आकार्य तस्य क्षतचिकित्साम् अकारयत्।

अतिवीरवर्मा तं "किं त्वं द्राविडभाषां जानासि" ? इति अपृच्छत्। सः "जानामि" इति समादधौ।

अतिवीरवर्मा – "किं ते बाधा उपशान्ता" ?

परंगिः – "उपशान्ता"

वीरवर्मा – "अपि भवतः देशे ईदृशाः चिकित्सकाः सन्ति"?

परंगिः – "न सन्ति"।

वीरवर्मा – "कः तव देशः" ?

परंगिः – "इटली"

वीरवर्मा – "कुतः इयं चौर्यवृत्तिः अवलम्बिता त्वया"?

परंगिः – "अहं क्रैस्तवः। अस्माकं मतगुरुः "दक्षिणभारतदेशे चौर्यं कर्तुं उचितम्। भारतीयाः धनिनः। अतः तद्देशे चौर्ये कृते न कः अपि दोषः अस्ति" इति अवदत् "।

वीरमर्मा – "असत्यं मा वद। क्रैस्तवं मतम् अतीव उत्तममिति वदन्ति खलु। अपि त्वं तं मतं अधिकृत्य किमपि जानासि" ?

भोजनार्थं गताः। बालकाः तु शकटं परिवृत्य एव स्थिताः।

कुट्टानस्य मातुलपुत्रः अतिवीरवर्मा पञ्चविंशतिवर्षदेशीयः। उत्साहवतः तस्य मुखे राजश्रीः स्फुटं चकस्ति। सः गृहस्य चतुश्शालायाम् उपविश्य "सूर्यः अस्तमेति। परंगिम् आनयत" इति आज्ञप्तवान्। सेवकैः आनीतः परंगिः विनीतः प्राविशत्। वीरवर्मा "किम् एतस्मै भोजनं दत्तम्" ? इति अपृच्छत्। सेवकाः "दत्तम्" इति प्रत्यवदन्। "किमेतस्य क्षतं चिकित्सितम्" ? "आम्। चिकित्सितम्"। कुट्टानस्य मातुलः अम्बष्ठम् आकार्य तस्य क्षतचिकित्साम् अकारयत्।

अतिवीरवर्मा तं "किं त्वं द्राविडभाषां जानासि" ? इति अपृच्छत्। सः "जानामि" इति समादधौ।

अतिवीरवर्मा – "किं ते बाधा उपशान्ता" ?

परंगिः – "उपशान्ता"

वीरवर्मा – "अपि भवतः देशे ईदृशाः चिकित्सकाः सन्ति"?

परंगिः – "न सन्ति"।

वीरवर्मा – "कः तव देशः" ?

परंगिः – "इटली"

वीरवर्मा – "कुतः इयं चौर्यवृत्तिः अवलम्बिता त्वया"?

परंगिः – "अहं क्रैस्तवः। अस्माकं मतगुरुः "दक्षिणभारतदेशे चौर्यं कर्तुं उचितम्। भारतीयाः धनिनः। अतः तद्देशे चौर्ये कृते न कः अपि दोषः अस्ति" इति अवदत्"।

वीरमर्मा – "असत्यं मा वद। क्रैस्तवं मतम् अतीव उत्तममिति वदन्ति खलु। अपि त्वं तं मतं अधिकृत्य किमपि जानासि" ?

परंगिः – "एसुक्रीस्तुः रक्षकः"।

वीरवर्मा – "भवतः मतस्य विषये भवान् सम्यक् न जानाति"।

परंगिः – "न जानामि"।

वीरवर्मा – "कुतः वाक्ये वाक्ये शिरः चालयसि"?

परंगिः – "कुतः न जानामि? जानाम्येव। एसुक्रीस्तौ विश्वासे कृते मोक्षः प्राप्यते। अतः परं किं ज्ञातव्यम्"?

वीरवर्मा – "तव देशे युष्माकं मतविषये त्वत्समानाः ज्ञानिनः कति सन्ति "?

परंगिः – "बहवः सन्ति"।

वीरवर्मा – "एतद्देशीयान् बोधयितुम् अत्र आगच्छन्तः मतगुरवः कुतः युष्मान् न बोधयन्ति? कुतः ते अत्र आगच्छन्ति?

परंगिः – "आहारार्थम्"।

सर्वे उच्चैः अहसन्। सेवकाः जनान् अपसारयितुं बहु प्रयासं कुर्वन्तः आसन्। परंगेः चेष्टाभिः, तस्य वचोभिः च जनाः चमत्कृताः अभूवन्।

अतिवीरवर्मा आल्वारुम् आहूय "एतं किं करिष्यन्ति" ? इति अपृच्छत्।

आल्वारुः – "मथुरां नीत्वा राजपुरुषाणां वशीकरिष्यामः"।

वीरवर्मा – "वराकः त्यज्यताम्"।

आल्वारुः किमपि न अवदत्। परेद्युः प्रभाते फरंगिः त्यक्तः अभवत्। सः सर्वैः तैः जनपदैः परिचितः एव आसीत्। ग्रामात् बहिः गत्वा सः आत्मानम् अनुसरन्तं जनम् अवोचत् "अहं मम देशं गत्वा, ततः सैन्यम् आनीय भवद्देशस्य सर्वस्वं हरिष्यामि"। सर्वे बालकाः व्यहसन्। एकः ज्येष्ठः अवदत् "अथकिम्। एतत् खलु दुर्जतिलक्षणम्"।

10

कुट्टानस्य मातुः नाम मङ्गाम्बा (मङ्गम्माल्)। तस्याः मुखे सौन्दर्यं, पातिव्रत्यं, मौग्ध्यम् – एतत् त्रयं सम्मिलितम्। सा परमशान्ता।

तस्मिन् दिने तिथिः एकादशी आसीत्। अतः मङ्गाम्बा दिने उपोष्य रात्रौ पिष्टाहारं भुक्त्वा गृहस्य पश्चादङ्गणे कटम् आस्तीर्य अशेत। तस्याः चरणसन्निधौ कुट्टानः उपविष्टः। वायुः न प्रसरति इत्यतः पत्राण्यपि न चलन्ति स्म।

मङ्गाम्बा – "कुमार! अपि एकवीरा कुशलिनी" ?

कुट्टानः – "आम् "।

एषः मात्रा पृष्टः प्रथमः प्रश्नः। प्रातः प्रभृति सः स्वमातरं न अपश्यत्। सायंकाले सा पश्चादङ्गणे शयाना तम् आकारितवती। सः आगत्य निषण्णः अभवत्।

मङ्गाम्बा – "तस्याः पितरौ दूरे स्तः। सा अस्माभिः एव स्नेहेन पालयितव्या। सा अतीव सुकुमारी। सुष्ठु अधिगतविद्या इति श्रूयते। त्वया ज्ञातं स्यात्। तां प्रेम्णा लालयसि खलु? जायापत्योः भवतोः मम उपदेशस्य का आवश्यकता? त्वयि सा अपि प्रेमवती खलु "?

कुट्टानः लज्जावनतः "प्रेमवती एव " इति अवदत्। एतद्वाक्यं तस्य मुखात् अप्रयत्नं निस्सृतम्। सः मनसि "किं सा सत्यमेव मयि प्रेमवती"? इति अचिन्तयत्। स्वकण्ठे तया अर्पितं पुष्पदाम तस्य स्मृतिपथम् आगच्छत्। कुट्टानः तं प्रसङ्गं परिवर्तयितुकामः त्वरया अवदत् "मातः। कतिदिनानि गतानि भवत्याः अत्र आगतायाः? रामनाथे पितृपादानां कुशलवार्ताः न ज्ञायन्ते। वीरभद्र भट्टरः पत्राणि मह्यं न दर्शयति। केवलं वार्ताः एव कथयति"।

मङ्गाम्बा – "त्वम् एककः एव अस्माकम् अपत्यम्। तात ! तव पितुः तुभ्यम् अकथनीयानि रहस्यानि कानि स्युः? यदि त्वं तथा मन्यसे तर्हि भट्टरं पृच्छ।

मन्ये सः पत्राणि तुभ्यं दर्शयेत् "।

कुट्टानः – "मातः ! न अहं तेन अभिप्रायेण इदम् उक्तवान्। मम चिन्ता तु युवयोः कुशलवार्ताः न ज्ञायन्ते इत्येव। त्वाम् अदृष्ट्वा नाहं स्थातुं शक्नोमि"।

अकारणमेव महावीरस्य कुट्टानस्य नयनयोः अश्रूणि अस्रवन्। एकः बिन्दुः मङ्गाम्बायाः पादे अपतत्। सा अवगत्य, उत्थाय उपविश्य, पुत्रम् आलिङ्ग्य तस्य कपोलम् अचुम्बत्।

यद्यपि कुट्टानस्य हृदयं मातुः विषये अतिकोमलं, तथापि तस्य एतानि अश्रूणि सम्पूर्णतया मातरि प्रेम्णा एव सृतानि इति वक्तुं न शक्यते। सः आत्मनः वञ्चितप्रेम स्मृत्वा दीनः अभवत्। सा दीनता एव तस्य वचांसि अपि व्याप्नोत्।

मङ्गाम्बा तस्याः आलिङ्गनं श्लथयामास।

कुट्टानः – "मातः! वायुः न प्रसरति। किमहं वीजयानि"?

मङ्गाम्बा – "तात ! मा वीजय। समीचीनं स्यात्, यदि एकवीरा अपि आनीता त्वया। वत्सां पश्येयम्। अपि सा कृशा अजायत "?

कुट्टानः – "यात्रा दुष्करा इति अहं तां न आनीतवान्"।

पुत्रः वधूम् अधिकृत्य सोत्साहं न भाषते इति मङ्गाम्बा अवगतवती। तस्मात् याथार्थ्यं अधिगन्तुम् इच्छन्ती तम् अपृच्छत् "तात ! अपि एकवीरा भवतः वचसां प्रत्युत्तरं ददाति, उत भवता भाषिता तूष्णीमास्ते"? एषः प्रश्नः कथम् उत्तरयितव्यः इति कुट्टानः न अजानात्।

मङ्गाम्बा – "तात ! युवयोः पारस्परिकं प्रेम, सुखजीवनं च अतिरिच्य किमन्यत् आवां कांक्षावहे? मम चत्वारिंशत् वर्षाणि अतीतानि। यदि तव एकः पुत्रः भवेत् तं दृष्ट्वा अहं मरिष्यामि"।

निग्रहीतुम् अशक्यः शोकः पिण्डीभूतः कुट्टानस्य कण्ठे पर्यवर्ततः।

मङ्गाम्बा "मह्यं कथयितुं युज्यते तात। कथय किं युवां सुखिनौ ? ब्रूहि "।

कुट्टानः कथमपि कण्ठात् वचः बहिः आहरन् अवदत् " आवां सुखिनौ एव मातः। कुतः एवं पृच्छसि" ?

मात्रा विसृष्टः कुट्टानः उपरिभूमिकां गत्वा अशेत। शय्यां गतस्य तस्य मनसि एकः एव विचारः "सर्वे एकवीरायाम् अनुरक्तुं मां प्रेरयन्ति। वीरभूपतिः तदेव अवोचत्। अत्र माता अपि तदेव वक्ति। अस्मिन् किञ्चित् रहस्यं स्यात्। मया अभिप्रेतां स्त्रियं परित्यज्य, बलात् मम कण्ठे बद्धायां स्त्रियां कथं रज्यताम् इति मया न ज्ञायते। अनुरागः वा अननुरागः वा किं मम वशे अस्ति? अथ कस्य वशे अस्ति? भगवतः वशे अस्ति। यस्य वशे अस्ति सः भगवानेव मम एतया स्त्रिया परिणयम् अकल्पयत् खलु? भगवान् न अकल्पयत्, मम पिता अकल्पयत्। भगवतः इच्छां विना मम पिता अपि किं कर्तुं शक्नुयात्? तया स्त्रिया सह कः मे सम्बन्धः? यदि न कः अपि सम्बन्धः तर्हि कथम् आवां जायापती अभूव? पूर्वजन्मसु कः सम्बन्धः आसीत् नु।"

एतेषु भावनासोपानेषु कस्मिन्नपि सोपाने कुट्टानः निद्रां गतः।

प्रभातम् अभवत्। प्राक्सती यथा अनन्तकालात् प्रभृति प्रतिप्रभातं चकास्ति तथा एव आद्यापि बालसूर्यस्य अरुणं बिम्बं मुखे तिलकयित्वा, वृद्धा योषित् इव अराजत। तस्याः मञ्जीरनाद इव पतत्रिणां कलकलध्वनिः अश्रूयत। सुप्तोत्थिताः सुवासिन्यः काल्यानि निर्वर्तयित्वा गोमयार्थं प्रतिवेशिनः गोस्वामिनः गृहं गच्छन्ति स्म। कृषिकाः हलानि सज्जीकृत्य क्षेत्रकर्षणार्थं गच्छन्ति। बालकाः गोक्षीरे भागं ग्रहीतुं अल्पपरिमाणानि कलशानि गृहीत्वा, गोदोग्धृणां पितृणां पश्चात् स्थिताः। मातृषु गृहाङ्गणे रङ्गवल्लिकाः कल्पयन्तीषु, बालापत्यानि तासां पटान्तानि गृहीत्वा रुदन्ति स्म। ततः ताः मातरः अर्भकान् पृष्ठेषु आरोप्य रङ्गवल्लिकाः अनुवर्तयन्ति। गोषु दुह्यमानासु गृहस्वामिना दूरे बद्धाः गोवत्साः बन्धनरज्जुं कर्षन्तः मातृणाम् ओधस्सु ग्रीवाः प्रसारयितुं प्रयतन्ते।

परमेश्वरसमुद्रः जनपद इत्यतः सः ग्रामः प्रातःकाले इयतीं शोभां अवहत्। सुप्तोत्थितस्य कुट्टानस्य पुण्यस्त्रीणां मुखारविन्दानि नयनगोचराणि अभूवन्। सः कालकृत्यानि निर्वर्तितवान्।

अत्र आगमनात् प्रभृति कुट्टानः स्वप्रेयसीं द्रष्टुम् एव यतमानः आसीत्। किन्तु अद्य प्रातः उत्थितस्य तस्य सः भावः नातिदृढः आसीत्। तस्य मनः गृहे एकवीरा किं कुर्वन्ती स्यात् इति अचिन्तयत्। सः स्वेन अविदितम् एकवीरा स्वहृदये इयन्तं स्थानं कथम् आक्रामत् इति विस्मितवान्। स्वप्रेयस्याः गृहं गन्तुम् ऐच्छत्। प्रथमं तत्र गमनं समीचीनं न स्यात् इति सन्दिदिहे। ततः तस्मिन् न कः अपि देषः इति निश्चितवान्।

यदा सः तद्गृहम् अगच्छत्, मीनाक्षी – पूर्वस्मिन् दिने अलसत्वेन अग्रथितानां, सम्पूर्णतया विकसितानां च मल्लिकापुष्पाणां मालां ग्रथ्नन्ती चतुश्शालायां उपविष्टा आसीत्। तस्याः सौन्दर्यं वीक्ष्य कुट्टानः पुनः भग्नहृदयः अभवत्। तं दृष्ट्वा मीनाक्षी स्रजं परित्यज्य साश्रुनयना अन्तः अगच्छत्। तस्याः माता आगत्य "अहो! सेतुपते! तात ! कदा आगतः असि"? इति पृच्छन्ती कटम् आनीय आस्तृणोत्।

कुट्टानः अवनतवदनः उपाविशत्। सा "अपि ते पत्नी कुशलिनी? भवतः विवाहार्थं आस्मान् न आहूतवान् आसीः। वयं खलु निर्धनाः। कुतः अस्मान् आह्वयेः" इति अवोचत्। कथं सा भाग्यशालिनी जानीयात् यत् तस्याः एतैः वाक्यैः कुट्टानस्य हृदयं परशुभिः इव भिद्यते। सा पुनः अवदत् "मे पुत्र्याः मीनाक्ष्याः कृते अनुरूपं वरं कमपि अन्वेषय तात। यदि सङ्कल्प्यते, तत् कियत्कार्यम् भवतः। अन्विष्य-अन्विष्य मम भर्ता विषण्णः सञ्जातः। अद्यापि सः गृहे नास्ति। वरान्वेषणाय एव कुत्रापि गतः....मन्ये राजवल्लीपुरम्"। कुट्टानस्य बुद्धिः परिभ्रमन्ती आसीत्। सः तस्याः अन्तिमानि वचांसि न अश्रुणेत्। "आगामिनि माघमासे कथमपि तस्याः उद्वाहः निर्वर्तितव्यः। एतावता एव बहु विलम्बितम्। त्वमेव अस्माकं जामाता अभविष्यः। कुतः अस्माकं तादृशानि भागधेयानि? अलभ्यफलेषु वाञ्छया हस्तप्रसारणं खलु एतत्"।

कुट्टानः अवनतं वदनं न उत्थापितवान्। मीनाक्ष्याः माता अमायिकहृदया। एतादृश्यः स्वच्छान्तःकरणाः महिलाः बहवः सन्ति भारते। किञ्चित्कालानन्तरं उत्थाय कुट्टानः परितः अवालोकयत्। मीनाक्षी कुत्रापि न दृष्टा। शनैः पदानि गणयन् सः बहिः अगच्छत्। तस्मिन् सायङ्काले एव मातुः अनुज्ञां प्राप्य मथुरां प्रति निरगच्छत् च।

चतुर्दश्यां प्रातः कुट्टानः मथुरां प्राप्तवान्। प्रभाते चतुर्दशीशेषस्य सम्पूर्णत्वात् अमावस्या प्राप्ता।

शकटम् अवरुढः कुट्टानः सपदि अन्तःपुरं प्राविशत्। शयनप्रकोष्ठे एकवीरा कुट्टानस्य पर्यङ्के शेत्वा किमपि चिन्तयन्ती आसीत्। तं दृष्ट्वा शय्यायाः अवरुह्य हेमपात्रस्थेन जलेन तस्य पादौ प्रक्षाल्य सौवर्णपुष्पैः अङ्कितेन स्वपटान्तेन अमार्जयत्। यदि एतत् पुरा घटितम् अभवत्, तर्हि कुट्टानेन सा तृणीकृता अभविष्यत्। किन्तु इदानीं कुट्टानः किमपि न अवोचत् । एकवीरा उत्थाय अधोमुखी अतिष्ठत्। तस्याः मुखावलोकनेन कुट्टानः अवगतवान् यत् चिरात् तस्याः कपोलयोः सन्तताश्रुधाराः स्रवन्तः आसन्।

मुहूर्तं तूष्णीं स्थित्वा सः "एकवीरे" इति तां समबोधयत्। विवाहस्य चतुर्षु मासेषु एषः प्रथमः अवसरः कुट्टानस्य तां नाम्ना सम्बोधयितुम्। तच्छ्रवणेन मेघगर्जितेन भीता राजहंसीव सा भूमौ अपतत्। तस्याः गात्रम् उत्पुलकम् अजायत। अमन्दवायुना कम्पमाना कदलीव सा आपदचूडम् अवेपत। आजानुदीर्घाभ्यां हरिन्मणिमयस्तम्भानां कुलस्वामिभ्यां बाहुभ्यां कुट्टानः ताम् उत्थाप्य स्ववक्षसि स्थापितवान्।

एकवीरा महानन्दार्णवे निमग्ना अभवत्। आलिङ्गनं श्लथीकृत्य कुट्टानः निश्चलः स्थित्वा, तस्याः मुखे दृष्टिं संस्थाप्य, इत्थं वक्तुम् आरभत। "एकवीरे ! मम एतेन सम्बोधनेन त्वं महान्तम् आनन्दम् अनुभवसि इति अहं वेद्मि। मम आलिङ्गने त्वया प्राप्तं पारवश्यमपि दृष्टवान्। न मया कदापि ज्ञातं यत् त्वं मयि एवम् अनुरक्ता। मयि ते यत्किञ्चित् प्रीतिः स्यात् एव इति मया सम्भावितं, परन्तु तस्याः गाढतां नाहम् अजानाम्। यथा त्वं उत्तमा साध्वी न तथा अहम् उत्तमः पुरुषः। त्वं मयि यावन्तम् अनुरागं दर्शयसि नाहं तस्य सहस्रांशम् अपि त्वयि दर्शयामि। न दर्शयितुं पारयामि। नाहं त्वयि प्रेम्णा त्वां नाम्ना समबोधयम्। अस्मिन् जन्मनि आवाम् एकत्र समागताः। त्वयि मे प्रीतिः नास्ति इत्यतः कोपः अस्ति इति मा चिन्तय। त्वद्विषये मम न कः अपि भावः अस्ति।

किन्तु एतत् वच्मि। अस्मिन् जन्मनि आवां दम्पती सञ्जातौ। अहं कथमपि प्रयस्य त्वयि अनुरागं वोढुं यतिष्ये। स प्रयत्नः कियति काले सफलः भविष्यति इति न ज्ञायते। एकस्मिन् मासे अपि न अतीते अहं त्वयि अनुरक्तः स्याम्,

अथवा दशसु वत्सरेषु स्याम्। अहं त्वयि अनुरक्तो भवेयं वा न वा, मे भार्या तु त्वम् एव। यावत् मे कण्ठे प्राणाः भविष्यन्ति तावत् मम एतं शरीरम् अन्यायत्तं न करिष्ये। अहं ते वाग्दानं करोमि। यद्यपि एतैः वचनैः ते प्रयोजनं नास्ति, तथापि इदं वच्मि। यतः- मम प्रेम्णः विषये संशयितुं युज्यते, न तु मम धर्मवर्तने। यदि वक्षि– "त्वदनुरागे मयि न अवस्थिते किं मे तव धर्मवर्तनेन" इति, तर्हि अहं ते वचनं ददामि त्वयि प्रेम साधयेयम् इति। मयि दयां विश्वासं च कुरु।

मम अस्याः स्थितेः हेतुम् अपि श्रुणु। मम मातुलस्य ग्रामः परमेश्वरसमुद्रः इति जानासि खलु। तस्मिन् ग्रामे मम मातुलगृहस्य समीपे एकं गृहम् अस्ति। तद्गेहिनः निर्धनाः। न त्वादृशाः न वा अस्मादृशाः धनिनः। तेषाम् एका कन्या अस्ति। तस्याः नाम मीनाक्षी। आवयोः विवाहात् पूर्वं सा मयि, अहं च तस्याम् अनुरक्तौ अभूव। मम इष्टं विरुद्ध्य त्वया मे विवाहः कृतः। गते दिने अहं परमेश्वरसमुद्रमेव अगच्छम्। तस्याः अपि विवाहः भविष्यति। दैवगतिः चित्रा। वयं किं कर्तुं शक्ताः? तस्यां मम यः अनुरागः वर्तते तं सर्वं नाशयिष्यामि। ततः त्वयि प्रेमभावं वर्धयिष्ये।

मा अन्यथा भावय। मम मनसि अस्फुरत् यत् इदं त्वत्तः न गोपनीयम्। कः कस्मिन् स्निह्यति इत्येतत् कथं ज्ञायते? यतः त्वं मयि इयन्तम् अनुरागं दर्शयसि, ततः त्वं मयि एव अनुरक्ता इति अहं सम्भावयामि। यदि त्वं इतःपूर्वं कस्मिन् अपि पुरुषे अनुरक्ता अभवः, तर्हि आवयोः परिणयः तुभ्यं कियन्तं दुःखम् अकल्पयिष्यत्। तथैव ममापि स्थितिः इति अवधारय"।

एकवीरायाः नयनयोः उन्मत्तदृष्टिः अजायत। सा स्थातुम् अशक्ता अभवत्। तत् अवगत्य कुट्टानः शनैः तां पर्यङ्के शाययित्वा, कलशोदकं तस्याः मुखे प्रोक्ष्य उत्तरीयेण अवीजयत्। तस्याः शिरः स्वस्य अङ्के आरोपयत् च। सर्वं इदं कुट्टानः निर्व्याजमेव कृतवान्। एकवीरा अबुद्ध्यत। यदा सा नेत्रे उन्मीलितवती तदा तस्याः शिरः पत्युः अङ्के आसीत्। सत्वरम् उत्थाय सा पर्यङ्कात् अवरोढुम् उद्युक्ता अभवत्। कुट्टानः ताम् उपवेशयित्वा पुनः अवोचत्। "मम एकं मित्रम् अस्ति। तस्य नाम वीरभूपतिः। सः प्रायः अस्माकं गृहम् आगच्छति। अन्तःपुरस्थायाः भवत्याः तं द्रष्टुम् अवकाशः नास्ति। सः अतीव सज्जनः। सः

सर्वं इदं वृत्तान्तं जानाति। सः मम अनुरागं मीनाक्ष्याः परिवर्त्य त्वयि बद्धुं माम् आदिष्टवान्। सः एव मम मनसि इमं भावम् अकल्पयत्। अहं तस्य अत्यन्तं कृतज्ञः"।

एकवीरा कथं जानाति वीरभूपतिः कः इति। कुट्टानः कथयति सः आत्मनः सखा इति। कुट्टान पुनः अवदत् "एकवीरे ! यद्यत् कथनीयम् अस्ति तत्सर्वं अहम् अकथयम्। किमन्यत् उच्यताम्? न मे त्वयि क्रोधः द्वेषः वा अस्ति। त्वया सह भाषितुं संशयः अपि नास्ति। यथा अहम् इतरैः गृहजनैः सम्भाषे तथैव त्वया सहापि भाषिष्ये। मम तु एका एव प्रर्थना। मयि स्थितम् अनुरागं मा क्षीणीकुरु। एकवीरे ! मन्ये मम वचांसि अत्यन्तं कठिनानि। किं ब्रवीषि "?

एकवीरा कुट्टानस्य कण्ठे बाहू प्रास्य, तस्य स्कन्धे शिरः आरोप्य "अद्य एव अनुरक्तः भव। अद्य एव अनुरक्तः भव" इति वदन्ती अरोदीत्। एकवीरा स्वयं न अजानात् कुतः सा एवम् अवदत्। पश्चात् सा "वरम् अभविष्यत् यदि अहं तूष्णीम् आसम्" इति अचिन्तयत्।

कुट्टानः – "न मे शक्तिः अस्ति तथा कर्तुम्। किं करवाणि? मर्षय माम्। तथापि किं परिहीयते? त्वया सम्भाषिष्ये। आवयोः इदं रहस्यं नान्यैः ज्ञातव्यम्।"

कुट्टानः क्रमेण निश्चलः अभवत्। तस्य नेत्रयोः अश्रूणि आगतानि। वचांसि क्रमेण कठिनतराणि अजायन्त। सः उत्थाय द्वारदेशम् अग्च्छत्। एकवीरा गच्छतः तस्य पदानां स्थिरत्वम् अपश्यत्, किमपि न अवोचत् च। सः कवाटम् उद्घाट्य गन्तुं प्रवृत्तः अपि अशक्तः, परावृत्य अपश्यत्। एकवीरा अग्रे गत्वा तस्य हस्तौ अगृह्णात्। तस्याः नेत्रे अश्रूणि अवर्षताम्। कुट्टानः "एके ! उक्तं खलु मया। यदा अहं त्वाम् उपसर्पिष्यामि तदा परिशुद्धहृदयः एव आगमिष्यामि। अच्छं प्रेम अनुभोक्तुं योग्या असि। कुतः व्यामोहं वाञ्छसि"? इति उक्त्वा द्वारम् अतिक्रम्य अगच्छत्। एकवीरा शय्यायाम् अपतत्। तस्याः हृदये "धर्मं चर" इतीदं वाक्यं प्रतिध्वनत् आसीत्।

कुट्टानः भोजनानन्तरं स्वप्रकोष्ठं गत्वा भूर्जपत्रं एकम् आदाय तस्मिन् " पराभवनामा संवत्सरः, वैशाख अमावस्या " इति अलिखत्। तं पत्रं – यस्यां मीनाक्ष्याः प्रेमचिह्नानि गुप्तानि तस्यां चन्दनपेटिकायां निक्षिप्तवान्। तस्मिन् दिने अमावास्या तिथिः इत्यतः पाठशालायाः अवकाशः आसीत्। कालं यापयितुम् अशक्तः कुट्टानः शकटेन वीरभूपतेः गृहम् अगच्छत्। सः गृहे न आसीत्। राजवल्लीपुरं गतः इति श्रुतम्। सः प्रतिवेशिनां गृहे कुट्टानस्य कृते लेखमेकं दत्वा अगच्छत्। तस्मिन् वीरभूपतिः- स्वपिता पत्रं प्रैषयत् इति, विवाहप्रयत्नः इव प्रतिभाति इति, कथमपि पञ्च-षण्मासानि यावत् पुनः आगन्तुम् अवकाशः न भवेत् इति, स्मर्यताम् इति च अलिखत्। मित्रवियोगः कुट्टानस्य दुस्सहः प्रत्यभात्। गृहं प्रतिनिवृत्य सः स्वप्रकोष्ठे पुस्तकानि सर्वाणि समीचीनतया श्रेणिषु विभज्य अन्यस्यत्। कथमपि कालः न गच्छति। शयित्वा स्वप्तुम् अयतत, किन्तु निद्रां न अलभत। किञ्चित्समयानन्तरम् उत्थाय, स्नात्वा, यावत् अल्पाहारं स्वीकृतवान् तावत् सायङ्कालः अभवत्। ततः सः क्रीडोद्यानं गत्वा, नित्यपरिपोषणेन विकसिते तस्मिन् अपि आनन्दम् अलभमानः तिरुमल नायकं द्रष्टुम् अगच्छत्।

आसन्नायां सन्ध्यायाम् एकवीरा क्रीडोद्यानम् अगच्छत्। क्रीडामृगशावकः ताम् अन्वसरत्। एकवीरा करवीरकलिकाः अपचित्य मृगशावकस्य मुखे अर्पितवती। सः द्वित्राः खादित्वा शिरः चालयन् अन्यतः अगच्छत्। हस्ते स्थिताः कलिकाः एकवीरा भूमौ अक्षिपत्। सा अतीव कर्मकुशला। पुष्पमालिकानां ग्रथने तस्याः अनन्यसाधारणं कौशलम् आसीत्। करवीरमन्दारमल्लिकाजातीपुष्पाणि अपचित्य सा मालाम् एकाम् अरचयत्। तस्याः मालिकायाः चमत्कारम् एकवीरा एव जानाति। तस्याः एकस्मिन् सूत्रे आकृष्टे सा माला ह्रस्वीभवति, अन्यस्मिन् आकृष्टे दीर्घीभवति च। यदा ह्रस्वीभवति तदा मल्लिकाः जातयः च मन्दारान् करवीरान् च स्थगयन्ति। यदा दीर्घीभवति तदा माला तनुः भवति, सर्वाणि पुष्पाणि च दृश्यन्ते। एकवीरा तां स्रजं अन्येभ्यः अदर्शयन्ती स्वप्रकोष्ठे गोपायितवती।

तस्मिन् दिने तस्याः रूपम् अपूर्वमासीत्। तस्याः मुखं विवाहात् पूर्वं इव न चकास्ति स्म, नापि विवाहानन्तरम् इव शोककलुषितम् आस्ते। सा - नातिपुष्टा नातिकृशा, न पङ्कसंसर्गात् गोधूमवर्णाक्ता न वा नारिकेलोदकवत् स्वच्छा

पुष्यमासीया नदी इव आसीत्। पुष्पोद्गमस्य प्रारम्भे वा अवसाने वा असम्पूर्णशोभा मल्लिकालता इव अदृश्यत। कस्तूरीतिलकेन फाललोचनं, शिरोभरणेन अर्धचन्द्रं, ललाटस्थैः स्वेदबिन्दुभिः गाङ्गझरशीकरं च बिभ्राणा सा पार्वती इव अराजत।

रजनी समागता। वैगैपुलिनेभ्यः प्रतिनिवृत्तः कुट्टानः भुक्त्वा बहुकालं यावत् किमपि पठन् अतिष्ठत्। रात्र्याः सार्धैकयामः अतीतः। एकवीरा एकां दासीं दृष्ट्वा- "मद्वचनात् महाराजम् आह्वय" इति अवदत्। सा बहिः आगत्य अन्यासु दासीषु कलकलम् असृजत्। प्रातः स्वामी परमेश्वरसमुद्रात् आगतः एव अन्तःपुरं प्राविशत्! सम्प्रति एष सन्देशः! सर्वाः आश्चर्यचकिताः अभूवन्। अद्यावधि ताभिः यत्सम्भावितं तत् असत् स्यात् । एतौ दम्पती परस्परानुरागिणौ दृश्येते। कुतः तर्हि पूर्वस्मिन् दिने सा माला छिन्ना भूमौ क्षिप्ता? तस्य प्रणयकोपः हेतुत्वेन सम्भावितः।

सा दासी कुट्टानस्य प्रकोष्ठद्वारि अतिष्ठत्। कुट्टानः कवाटशब्दं श्रुत्वा "कः अत्र भोः" इति अवदत्। दासी "भर्तः! भट्टिनी.....आकारयति" इति अवोचत्। कुट्टानः विना अन्यं वचनं पुस्तकं त्यक्त्वा अन्तःपुरम् अगच्छत्। तस्य मार्गः प्रशस्तायाः कस्तूर्याः सौरभेण वासितः अभवत्। अन्तःपुरदासीजनः निस्तब्धः साश्चर्यः च अतिष्ठत्। प्रकोष्ठस्य पुरतः निषण्णः बालहरिणः नेत्रे निमील्य, मध्ये मध्ये रोमन्थयन् स्वपिति।

कुट्टानः प्रकोष्ठे पर्यङ्के उपाविशत्। एकवीरा अधोमुखी स्रजं हस्तेन धृत्वा दीर्घां तां सूत्राकर्षणेन ह्रस्वाम् अविरलां च कृत्वा, पुनः दीर्घीकृत्य भावभिरामं तस्य मुखम् अवालोकयत्।

कुट्टानः – "कः इमाम् अग्रथ्नात्"?

एकवीरायाः नयनयोः भावेन सा एव ताम् अग्रथ्नात् इति स्पष्टम् अभवत्। सा मालां ह्रस्वीकृत्य तां तस्य कण्ठे आर्पयत्। कुट्टानः तां प्रशंसन् दक्षिणहस्तेन तां परामृशत्। व्यतिरेकसूत्रं अज्ञातं तस्य हस्ते लग्नम्। माला दीर्घीभूता, मल्लिकाः, जातयः करवीराः मन्दाराः च व्यस्ताः अभूवन्। ततः तौ द्वौ पृथक् पर्यङ्कयोः

शयित्वा निद्राम् अगच्छताम्।

प्रातः प्रकोष्ठात् निर्गतं कुट्टानप्रभुं – रात्रौ अधिकतरं जागरणेन आरक्तमञ्जुलविशालनेत्रं, दीर्घया नवीनपुष्पमालया अलङ्कृतवक्षसं च दृष्ट्वा, परिचारिकाः चकितनेत्राः, सस्मितास्याः, लज्जादरहासाधराः ससम्भ्रमदत्तमार्गाः च अभूवन्। उद्देशपूर्वकं धृतेन कृतकमन्दहासेन एकवीरा ताः इतः अपि पर्याकुलाः अकरोत्। किन्तु असंस्कृतभावाः ताः तस्याः वदने निगूढां विचारमुद्रां न अजानीयुः।

दिनानि गतानि, मासाः अतीताः, ऋतवः अतिक्रान्ताः। किन्तु कुट्टाने न कापि परिवृत्तिः। गच्छता कालेन एकवीरा स्वशरीरात् एकैकम् आभरणं विसर्जयन्ती आगता। कतिपयदिनेषु तस्याः गात्रे मङ्गलसूत्रं कृष्णमणीः च विहाय न अन्यत् भूषणं परिशिष्येत्। दिने दिने सा स्वच्छदेहा अभवत्। कृशं तस्याः शरीरं पाण्डुरम् अजायत, अर्धनिमीलिते नेत्रे नूत्नां सुषमाम् अवहताम्।

प्रतिदिनं कुट्टानः श्रीखण्डमञ्जूषाम् उद्घाटयति, तां दीर्घं विलोकयति, भूर्जपत्रे आत्मना लिखितं पठति, दिनानि गणयति, स्वहृदयं च परिशीलयति स्म। तस्मिन् न कः अपि विकारः। तां स्वपेटिकायां निक्षिप्य किमपि पुस्तकं पठति, पाठशालां गच्छति, सायं वैगैसिकतातलेषु एककः निषीदति। सूर्यास्तमयानन्तरं गृहं प्रत्यागच्छति। तस्य मनः परमेश्वरसमुद्रे, शरीरं मथुरायां च अभूत्। यदि कुत्रापि एकवीरा दृश्यते, तां प्रति किमपि वक्ति। किन्तु तत्सम्भाषणस्य कृत्रिमता अवगम्यते एव।

13

यद्यपि तिरुमल नायकः कुट्टानस्य मित्रं, तथापि सः राजकुमारः, कुट्टानात् अधिकः च। तस्मात् तेन सह मैत्री युज्यते, परन्तु परस्परव्यथाः आवेदयितुं वा, सम्पूर्णं दिवसं तेन सह यापयितुं वा न युज्यते। गृहे एकवीरा अस्ति नाम। परन्तु तया सह कुट्टानस्य कः सम्बन्धः? किं सा तेन सह सुहृत् इव भाषितुं

शक्नुयात्? तस्य हृदयप्रेम्णः भाजनं भवेत्? अतः कुट्टानः दिनानि यापयितुं न अशक्नोत्। आप्रातः आरात्रि कालः कथं गच्छेत्? दिनानि क्रमेण तस्य दुस्सहानि अजायन्त।

कुट्टानः वीरभूपतेः पुनरागमनं वरं स्यात् इति अमन्यत। सः सैन्याध्यक्षस्य पुत्रः, तिरुमल नायकस्य सुहृत् च इत्यतः सम्पूर्णं प्रत्यनम् अकरोत्। राजास्थाने स्थानापतिः माघमासे दिवङ्गतः अभवत्। स्थानापतिपदं, गणकपदं च न वंशपरम्परया अधिष्ठीयेते। अतः स्थानापतिपदे वीरभूपतिं नियोजयितुं कुट्टानः प्रयत्य सफलताम् असाधयत्। नूतनाः गणनाः चैत्रमासेन आरभ्यन्ते। तावता वीरभूपतिना आगत्य अधिकारः स्वीकर्तव्यः।

कुट्टानः वीरभूपतयेः सन्देशं प्रैषयत्। माघमासे वीरभूपतेः विवाहः सम्पन्नः। विवाहदिनेषु एव एषा उद्योगवार्ता अपि प्राप्नोत्। सर्वे वीरभूपतेः जीवने शुभः कालः आगतः इति आहुः। विवाहः महता आनन्देन निर्वर्तितः।

स्थानापतिपदं राज्ये प्रधानेषु अधिकारेषु अन्यतमम्। तस्य वर्तनं प्रतिवर्षं दशसहस्रं "पन्नु" नाणकानि। "पन्नु" इत्येतत् मथुरानायकानां काले उपयुज्यमानायाः सुवर्णमुद्रायाः नाम।

यथा यथा चैत्रमासः उपस्थितः, तथा तथा कुट्टानः समाश्वस्तः अभवत् यतः-वीरभूपतिः आगमिष्यति।

वीरभूपतिः आगतः, स्वम् अधिकारं प्रविष्टः च। तस्मै महासौधम् एकं दत्तम्। सः तस्मिन् वसितुम् आरभत। चैत्रमासे देव्याः मीनाक्ष्याः कल्याणमहोत्सवः सम्पन्नः। वैशाखस्य शुक्लपक्षः अतीतः। वीरभूपतेः भार्या मथुराम् आनीता। कृष्णप्रतिपत् प्रयाणाय शुभतिथिः। अतः तस्मिन् दिने तां प्रस्थाप्य तृतीयायां मथुरां प्रापयन्।। सा मथुरायां एव अस्ति।

भूतपूर्वः स्थानापतिः माघमासे दिवं गतः। माघफाल्गुणमासयोः गणनाः सर्वाः अपरिष्कृताः तथैव सञ्चिताः आसन्। चैत्रवैशाखमासयोः वीरभूपतिः अतीव कार्यव्यग्रः आसीत्। वैशाखस्य अन्ते तस्य कार्यभारः ईषत् लघुः जातः। नूतनतया उद्योगं प्रविष्टः अपि, सः तथा व्यग्रः भूत्वा कार्याणि निरवहत् इति तिरुमल

नायकः सन्तुष्टः अभवत्। सः युवराजः तम् अधिकृत्य मुद्दुवीरप्प नायकाय, राज्ञे च निवेदयामास। एतेन कुट्टानः अतुष्यत, वीरभूपतिः अपि सोत्साहः अभवत्।

एकदा कुट्टानः सुप्तोत्थितः कालकृत्यानि निर्वर्त्य प्रातर्वायुषु मन्दं वहत्सु सौधाङ्गणस्थे मण्डपे उपाविशत्। पुरोहितः तस्य पुरः स्थित्वा "प्लवङ्गनामसंवत्सरः, वैशाखामावस्या" इति अवदत्। पञ्चाङ्गं कक्षे निधाय, भस्मरेखाविराजितेन मुखेन शुक्रम् इव स्थितं तं पुरोहितं वीक्ष्य कुट्टानः भगवान् तस्य रूपेण आगत्य, आत्मानं किमपि स्मारयति इति अचिन्तयत्। दिग्भ्रान्तः कुट्टानः तेन उक्तं वासरं न अश्रुणोत्। ततः उत्थाय सः स्वप्रकोष्ठं गत्वा, पेटिकां उद्घाट्य, तस्याः श्रीखण्डमञ्जूषां उद्धृत्य, ततः भूर्जपत्रम् अगृह्णात्। तं पठतः तस्य अश्रुबिन्दुः एकः तस्य उपरि अपतत्। मञ्जूषायां स्थितां शुष्कस्रजं बहिः क्षेप्तुम् ऐच्छत्। किन्तु तस्य मनः न अङ्गीचकार। पुनः सर्वाणि तानि वस्तूनि तस्याम् एव निक्षिप्य, सत्वरं अन्तःपुरम् अगच्छत्। एकवीरा निराभरणसुन्दरेण वपुषा स्वच्छानि वस्त्राणि परिधार्य, प्रकोष्ठस्य द्वारि अतिष्ठत्। कुट्टानः तस्याः पुरः अतिष्ठत्। तस्य भावम् अजानती सा अन्तः गत्वा शय्यायाः मूले अतिष्ठत्।

एकवीरा – "सेतुपतयः किमर्थम् अपि वा आगताः"

कुट्टानः – "एके ! अद्य वैशाखामावस्या "।

एकवीरा – "प्लवङ्गनामसंवत्सरः शनिवासरः च"।

कुट्टानः – "एतेन दिनेन संवत्सरः सम्पूर्णः"।

एकवीरा–"द्वादशमासाः" इत्युक्त्वा हस्तेन भित्तिम् अदर्शयत्। तत्र द्वादश कृष्णवर्णानि बिन्दूनि आसन्। कुट्टानः लज्जावनतशिराः शनैः द्वारदेशम् अगच्छत्। तस्य पृष्ठतः एकवीरा गीतम् एकम् अगायत्। तत् गीतं तेषु दिनेषु द्रविडदेशे सर्वैः जनैः प्रायः गीयमानम् एव। तद्गीतं जनापवादभीतेन रामेण अरण्ये त्यक्तायाः शोकार्तायाः सीतादेव्याः वचांसि। कुट्टानः मन्त्ररुद्धः भुजङ्गः इव चलितुं न अशक्नोत्। परावृत्य गत्वा ताम् आलिङ्गितुम् ऐच्छत्। तदन्तरे

का अपि दासी किमपि प्रष्टुम् एकवीरायाः सकाशम् आगता। कुट्टानः स्वप्रकोष्ठम् अगच्छत्। पर्यङ्के शयित्वा मुखं शय्यायां निक्षिप्य, किमर्थम् आत्मना एतावत् कालं जीवितव्यम् इति अचिन्तयत्। "मीनाक्ष्याः किम् अभवत् नु ! सा कं पर्यणयत् नु ! अथवा अलं तस्याम् अधुना अपि आशाबन्धनेन"। कुट्टानः सेवकं शब्दाप्य "स्थानापतेः गृहं गत्वा तं निवेदय यत् अहम् अद्य तद्गृहे भोजनार्थम् आगमिष्यामि" इति आदिदेश। सेवकः गतः।

पेटिकाम् उद्धाट्य सेतुपतिः श्रीखण्डमञ्जूषायाः जीर्णस्रजं, मृत्तिकां कस्तूरीं च उद्धृत्य अन्यत्र न्यक्षिपत्। केवलं भूजपत्रं तस्यां न्यस्तवान्। तां चन्दनमिश्रितां मृत्तिकां हस्ताभ्यां परिमृह्य तया मुखम् उपलिप्य दर्पणे स्वप्रतिबिम्बं दृष्ट्वा "दाक्षायणीशोकसन्तप्तः शिवः इव अस्मि" इति अचिन्तयत्। वसनाञ्चलेन मृखं परिमृज्य अवशिष्टानि प्रेयसीचिह्नानि अन्यत्र गोपायितवान्।

कुट्टानवीरभूपती तस्य गृहे पाचकेन परिवेषितम् अन्नम् अभुङ्क्ताम्। कुट्टानस्य मनसि विषादच्छन्ने अपि सः वीरभूपतेः सान्निध्ये सोत्साहः एव वर्तते स्म । भोजनसमये सः द्वित्रिवारं वीरभूपतिं तस्य भर्यां अधिकृत्य किमपि प्रष्टुम् ऐच्छत्। किन्तु विमनस्कतया तूष्णीम् आस्त। अद्य यावत् कुट्टानः वीरभूपतेः विवाहविषये किमपि न अपृच्छत्। स्वयं वीरभूपतिः अपि किमपि न अवोचत्। तयोः तूष्णींभावस्य हेतू स्तः। कुट्टानः आत्मनः दुःखे निमग्नः तद्विषये किमपि न अपृच्छत्। वीरभूपतेः स्वभार्याम् अधिकृत्य किमपि वक्तुम् उत्साहः नासीत्।

भोजंनानन्तरं द्वौ अपि राजभवनम् अगच्छताम्। कुट्टानस्य कथमपि कालक्षेपः भवेत्, दिनात्ययः स्यात्। मुखशालायां बहवः लेखकाः तालपत्रेषु लेखनीभिः ग्रन्थानि अनुलिखन्ति स्म। तेषां वर्तनानि राज्ञा एव दीयन्ते। ताति च ग्रन्थानि राज्ये पुस्तकभाण्डागारान्, अन्याः पाठशालाः प्रति च प्रेष्यन्ते।

तौ द्वौ ततः अचलताम्। अग्रे सन्ध्यामण्डपः अदृश्यत। कुट्टानस्य मनसि कस्तूरीरङ्गप्प नायकस्य घोरमृतिः अस्फुरत्। ततः सः सैन्याध्यक्षस्य पुत्रः, स्थानापतिः च तिरुमल नायकस्य समीपम् अगच्छताम्। तिरुमल नायकः मुद्दुकृष्णप्प नायकस्य द्वितीयः पुत्रः। तस्य दीर्घे नेत्रे रक्तरेखाभिः विराजेते। तस्य वक्षः विशालं सत् दुर्गस्य आयसकवाट इव लक्ष्यते स्म। दीर्घौ आजानुलम्बिनौ तस्य बाहू आयसस्तम्भौ इव कठोरौ स्तः। तस्य मुखं पश्यतः

कस्यापि – सः एव मथुराराज्यस्य राजा भवितुम् अर्हति इति अभिप्रायः, तस्य ज्येष्ठः भ्राता मुद्दुवीरप्प नायकः युवराजः अस्ति खलु इति संशयः च युगपत् जायेते। तिरुमल नायकस्य वदनं प्रसन्नगम्भीरं सत्, तेन मनसि कृतः निश्चयः न केनापि परिवर्तयितुं शक्यः इति अवगमयति स्म। तिरुमल नायकः द्वाविंशतिवर्षदेशीयः। किन्तु तस्य पिता वा ज्यायान् भ्राता वा तस्मै अनिवेद्य किमपि न कुरुतः। कार्तान्तिकाः तस्य काले मथुराराज्यं परमोत्कृष्टां दशाम् अनुभवति इति अवदन्। मुद्दुवीरप्प नायकः असूयारहितः भ्रातुः अभ्युदयमेव अवाञ्छत्।

तिरुमल नायकः कुट्टानस्थानापतिभ्यां कञ्चिकालं सम्भाष्य “सैन्याध्यक्ष ! किञ्चित् वक्तव्यम् अस्ति” इति वदन् कुट्टानम् एकान्तप्रदेशम् अनयत्। तत्र राजकार्यं एकं चर्चित्वा, कुट्टानः वीरभूपतिना सह सायंकाले वैगैतीरम् अगच्छत्। बहुकालानन्तरम् अद्य पुनः तौ परस्परांसनिक्षिप्तहस्तौ, निदाघपरिशोषितायाः वैगैनद्याः परिक्षीणे प्रवाहे आगुल्फं पादौ प्रक्षाल्य, जलं गण्डूषयामासतुः। भूमेः ऊष्म निस्सृतम्। द्वौ अपि सुहृदौ नदीजलेन मुखं प्रक्षालितवन्तौ।

14

वीरभूपतिः वैगैनद्याः प्रतिनिवृत्तः कुट्टानं विसृज्य गृहं गत्वा, स्नातः भोजनं कृत्वा, उपर्यकायां शीतपवने अशेत। रात्रौ गतायां तस्य भार्या अपि आगता। सा तस्य नातिदूरे निषण्णा नागवल्लीदलानि पुटीकृत्य ददन्ती आसीत्। सः ताम्बूलसेवनं कुर्वन्नपि सोत्साहः न आसीत्। ततः स उत्थाय उपविश्य “अलम्” इति अवदत्। सा ताम्बूलदानात् विरता।

वीर – “मम पादयोः पीडा जायते। सेवकं शब्दापय ”।

भार्या – “अहं संवाहयामि”।

वीर – “अपि त्वं मां स्पृशसि” ?

भार्या – "सेवकभावे न कश्चित् दोषः अस्ति। यूयं वारं वारं तथैव वदथ। प्रभो ! न मे तस्मिन् इच्छा अस्ति। किं भार्याभर्तृसम्बन्धे तदेव प्रधानम्। मम मनसः तु तत् तथा न प्रतिभाति। कि करवाणि"?

वीर – "सनातनानां ऋषीणां सम्प्रदायः एषः। "प्रजायै गृहमेधिनाम्" इत्युक्तम्। सन्तानार्थित्वात् एव मानवस्य विवाहपरिकल्पनम्। मम पितरौ अतीव वृद्धौ। सर्वं मम जीवनं तौ तोषयितुम् एव व्यययामि। मया उक्तं खलु? त्वया सह मम अयं विवाहः अपि तौ तोषयितुमेव कृतः। चत्वार मासाः गताः। त्वं तु तथैव यथापूर्वं मयि विमुखा असि। नाहं तव अस्य वैमुख्यस्य कारणं जानामि। बहुवारं पृष्टा अपि त्वं प्रत्युत्तरं न ददासि"।

भार्या – "स्वामिन्। नाहं भवत्सु विमुखा। कुतः तथा सम्भावयथ ? अहं भवत्सु अनुरक्तापि अस्मि। पत्नीधर्मं पालयन्ती अहं भवद्भिः सम्भाषिष्ये, मया करणीयाः सर्वाः परिचर्याः अपि करिष्ये। किन्तु केनापि कारणेन मम तस्मिन् कार्ये विरक्तिः सञ्जाता। नाहं सन्तानं इच्छामि। सन्ततिः किमर्थं ? इदं जन्मैव दुःखभूयिष्ठम्। अस्मिन् अपत्यानि प्राप्य तान्यपि दुःखभाजनीकर्तुं न उचितम्। "

वीर– "यदि तव एषः सिद्धान्तः सर्वजनसमाचरणीयः, तर्हि सृष्टिरेव अन्तं गच्छेत्। परमेश्वरस्य लीला कथम् अतिक्रम्यते भवत्या "?

भार्या – "क्षणभङ्गुरस्य एतत्सुखस्य कृते किमर्थं एषः प्रयासः? कुतः न वयं नित्यानन्दाभिलाषिणः स्याम? अस्मिन् दुर्मोहे पतिताः वयं नंक्ष्यामः इति कदा अवगम्यते अस्माभिः" ।

वीर – "तर्हि किमर्थं विवाहं पर्यकल्पयः? एतान्येव वचांसि युष्मत्पितरौ उद्दिश्य किं न कथितानि? त्वाम् उद्वहन् कः अपि पुरुषः लोकरीत्या त्वयि सुखं प्राप्तुं यतेत एव। कुतः त्वं त्वद्भर्तुः अपकारिणी संवृत्ता? कुतः न प्रथमम् एव योगिनी सञ्जाता "?

भार्या – "मम पितरौ मम विनतिं न अश्रुणुताम्। पतित्वात् यूयं श्रुणुत। यदि भवन्तः सत्यमेव मयि प्रेमभावं वहथ तर्हि – मम इच्छानुसारं वर्तनात्परं किमन्यत् प्रियं कुरुथ "?

वीर – "मन्ये मत्तः अधिकं कमपि परिणेतुं तव इच्छा आसीत्। नोचेत् कुतः ईदृशं परितापं जनयेः"?

भार्या – "मत्कृते भवतां सम्बन्धः एव अत्यधिकः। केन सम्भावितं यदहं स्थानापतेः गृहिणी भविष्यामि। मम पितरौ निर्धनौ इत्यतः भवद्भिः सह मे विवाहः महता भाग्येन एव सम्पन्नः। केवलं सज्जनत्वात् एव भवद्भिः अस्माकं सम्बन्धः अङ्गीकृतः"।

वीर – "तत्र न किञ्चिदपि अस्माकं सज्जनत्वम्। विवाहात् अनन्तरमेव मम एतत्पदप्राप्तिः ज्ञाता। ततः पूर्वं वयमपि युष्मादृशाः एव खलु। मया एतत्पदं मम मित्रस्य प्रसादेन प्राप्तम् "।

भार्या – "कः असौ सुहृत् "?

वीर – "किं न जानासि ? अद्य अस्माकं गृहे भोक्तुं आगतः खलु ? "

भार्या –कः अपि भवतां सखा आगत इति "श्रुतं मया। किन्तु न ज्ञातं कः असौ इति "।

वीर – "तस्य नाम कुट्टानः। उदयन सेतुपति दलवायिनः पुत्रः "।

तस्य भार्या विद्युल्लेखा इव ततः निर्गता। वीरभूपतिः केनापि कार्येण गता इति अमन्यत।

रात्रेः यामद्वयम् अतीतम्। वीरभूपतिः उत्थाय अन्तः प्राविशत्। दीपः चन्द्रमाः इव प्रभाः विकिरति। तस्य भार्या खट्वायां शयिता। तस्याः सुवर्णप्रभे देहे सौवर्णाभरणानि न पृथक् लक्ष्यन्ते। तस्याः मुखं सौन्दर्यश्रिया भासते स्म। वीरभूपतिः सा सुप्ता इति मत्वा, समीपं गत्वा अपश्यत्। तस्याः नयनयोः अश्रूणि स्यन्दन्ते। सः तस्य हेतुं न अजानात्। बहूनि दिनानि अतीतानि तस्याः पितृगृहेण वियुक्तायाः। तस्मात् एव सा विषण्णा इति अमन्यत। चतुः पञ्चदिवसाभ्यन्तरे तां परमेश्वरसमुद्रं प्रेषयितुं निश्चितवान्।

तस्याः दिव्यसुन्दरविग्रहं पश्यन् सः मनः निग्रहीतुं न अशकत्। तस्य मनसि तां चुम्बयितुं स्पृहा अजायत। अद्यावधि सः न कदापि ताम् अस्पृशत्। सा तेन सह

मधुरं भाषते। आवश्यकतायाम् ईषदिव स्मितं करोति। तावन्मात्रम् एव। यदि सः तां स्प्रष्टुं प्रयतते तर्हि सा सपदि रौद्रमूर्तिः जायते। अतः विवाहदिनात् आरभ्य वीरभूपतिः तस्याः अभीष्टमेव अनुपालयन् आसीत्। सम्प्रति चुम्बनेन सा प्रबुध्यात् नु ! तस्य हृदयम् अवेपत। कीदृशी तस्य स्थितिः ! गृहस्य पश्चादङ्गणे धननिक्षेपः अस्ति। स्पृष्टः चेत् सः सर्पः भूत्वा दष्टुम् आयाति। तदेकदृष्ट्या ताम् एव पश्यतः वीरभूपतेः मनोनिग्रहः शिथिलः जातः। अनन्यस्पृष्टयोः, कुसुमसुकुमारयोः तस्याः अधरयोः तस्य श्मश्रुणी भ्रमरौ इव अचलताम्। सः परवशः अभवत्।

तस्य भार्या न निद्राति स्म। भर्ता आत्मानं चुम्बितवान् इति तया अवगतम्। तथा अनुरागवति तस्मिन् प्रणयभावं अवहन्तीम् अत्मानं सा अनिन्दत्। तदा नेत्रे उन्मीलयितुं सा न ऐच्छत्। प्रसुप्ता एव सा आत्मना चुम्बिता इति भर्ता भावयेत् इति तस्याः आशयः।

वीरभूपतिः शनैः स्वप्रकोष्टं प्रविश्य, कवाटं पिहितवान्। मञ्जूषाम् उद्घाट्य तस्याः स्वस्य पूर्वप्रणयिन्याः लेखं गृहीत्वा अपठत्। का अपि वा सा आत्मना पुनः न दृष्टा। सः स्वमनसः तस्याः रूपं संगृह्य, चित्रे ताम् आलिखत्। सा प्रतिकृतिः अपि तस्याम् एव मञ्जषायाम् अस्ति। स तां तथैव किञ्चित्कालं निरीक्ष्य पुनः ताम् अन्तः न्याधात्। सः फाल्गुणे मासि स्वपत्न्याः अपि चित्रं रचयामास। तदपि उद्धृत्य विलोक्य, द्वे अपि चित्रे एकत्र अस्थापयंत्। ततः भार्यायाः प्रकोष्ठं गत्वा ताम् आकारितवान्। सा तु प्रबुद्धा अपि तस्य प्रतिवचनं न अदात्। सः शय्यायाः समीपं गत्वा "प्रिये" ! इति तां समबोधयत्। सा तूष्णीं आसीत्। सः वामहस्तेन तस्याः पादं गृहीत्वा अचालयत्। सा उत्थाय पर्यङ्के निषण्णा अभवत्।

भार्या – "किं मां वृथा बाधध्वे? पुनर्विवाहं कर्तुं भवतः अहम् अनुमन्ये। स्वामिन् ! अहमपि तत्र आगमिष्यामि। मां मर्षयत"।

वीर – "केन एतत् प्रार्थ्यते? किमहं कदापि पुनः परिणेष्यामि इति त्वाम् अवदम्? किं निरर्थकं भाषसे"?

सा वीरभूपतिः रुष्टः इति अमन्यत।

भार्या – "मां क्षमध्वम्। किमर्थं मां प्राबोधयत" ?

वीरभूपतिः – "किञ्चित् कार्यं अस्ति। इतः आगच्छ" इति वदन् गन्तुं प्रवृत्तः। सा अपि तम् अन्वसरत्। उभौ अन्यं प्रकोष्टं प्राविशताम्। वीरभूपतिः तस्यै द्वे अपि चित्रे दर्शयित्वा "अनयोः उभयोः का सुन्दरतरा? " इति अपृच्छत्। सा अन्यस्याः प्रतिकृतिं निर्दिश्य "कस्याः चित्रं एतत्"? इति अपृच्छत्। वीरभूपतिः तस्याः चित्रं निर्दिशन् "अपि जानासि एतत् कस्याः इति" ? इति अवदत्। सा "न वेद्मि। कथयत कस्याः इति" इति अब्रवीत्। सः"तामेव पृच्छ" इति अवोचत्। सा तच्चित्रं स्वस्याः एव प्रतिकृतिः इति अवबुद्ध्य "केन इदम् आलिखितम्" ? इति अपृच्छत्। वीरभूपतिः "अनेन ते दासेन" इति अवदत्। सा तं प्रणम्य "मर्षयत माम्" इति अब्रवीत्। वीरभूपतिः तां उत्थापयितुं तस्याः करौ ग्रहीतुं प्रायतत। किन्तु सा तं न अन्वमन्यत।

ततः सा पुनः "का एषा द्वितीया आलिखिता" ? इति अपृच्छत्। वीरभूपतिः तस्यै सर्वं तं वृत्तान्तम् अकथयत्। सा साश्चर्या अभवत्। सः तं लेखम् अपि तस्यै अदात्। सा तत् पठित्वा अपृच्छत् "तस्याः नाम किम्" ? वीरभूपतिः तत्पत्रस्य अधः लिखितं नाम तस्यै प्रादर्शयत्। सा तत् नाम वारं वारं पठित्वा, चिरं तत् चित्रं अवालोकयत्, अपृच्छत् च "अपि भवन्तः पुनः तद्ग्रामं न गतवन्तः"?

वीर – "न कदापि"।

प्रातः कुक्कुटाः अकूजन्त।

15

प्लवङ्गनामसंवत्सरः गतः, कीलकनामकः आगतः। सः वैशाखमासः। उदिते

सूर्ये अमावस्या आगमिष्यति। तस्यां रात्रौ कुट्टानः स्वप्तुं न अशक्नोत्। तस्य हृदये का अपि भीतिः अजायत। यामद्वयानन्तरं शयनात् उत्थाय एकाकी पादचारी स्थानापतेः गृहं गन्तुं प्रवृत्तः। द्वारि सुप्तः सेवकः उत्थाय अपृच्छत् "प्रभो कुत्र गन्तव्यम्" ? कुट्टानः विना प्रत्युत्तरम् अग्रे अचलत्। सेवकः खड्गपाणिः तम् अन्वसरत्। स्थानापतेः गृहे प्राप्ते सेवकः खड्गं कोशे निधाय "प्रभो! किमहं कवाटं खटखटायेयम्" ? इति अपृच्छत्। कवाटः उद्घाटितः, वीरभूपतिः प्रबोधितः च। सः सुप्तोत्थितः आगत्य कुट्टानं दृष्ट्वा "तात! कथम् अस्मिन् समये आगतः असि" ? इति वदन् तम् आलिङ्गितवान्। तौ द्वौ सौधाग्रभागम् अध्यारोहताम्। कुट्टानस्य सेवकः प्रतिनिवृत्तः, स्थानापतेः गृहकवाटः च पिहितः आभवत्।

द्वावपि सुहृदौ उपर्यकायां निषण्णौ। कुट्टानः नयनयोः अश्रूणि मोचयन् आसीत्। वीरभूपतिः तं सान्त्वयन् "सखे! मयि तिष्ठति, कुतः त्वम् एककः दुःखम् अनुभवसि ? अहं मम दुःख सोढुं शक्नोमि, तवापि वेदनायाम् अशं ग्रहीतुं पारयामि। मे कथय" इति अब्रवीत्। कुट्टानः "श्वः संवत्सरद्वयस्य पूर्तिः भविष्यति" इति अवोचत्।

वीरभूपतिः – "न अवगतं मया"।

कुट्टानः – "एतावतः दिवसान् इदं रहस्यं त्वत्तः अगोपायम्। एतत् ते न कथनीयम् इति तु न अचिन्तयम्। किन्तु कदापि ते न अकथयम्। पराभवनाम्नि वत्सरे वैशाखामावस्यायां अहं मे पत्नीं अवदं -"मम पूर्वप्रणयिन्याः मनः निवृत्य त्वयि अनुरक्तः भविष्ये" इति। "वीरभूपतिनामा मम मित्रं माम् एवं कर्तुं उपादिशत्" इत्यपि अकथयम्। भ्रातः! एवं कर्तुं प्रयतिष्ये इति उक्तवतः मम वर्षद्वयं अतीतम्। न किञ्चिदपि मया साधितम्। अद्यापि मम प्रेयसी एव मे हृदये साम्राज्यं पालयति। श्वः सूर्योदयं कथं पश्येयम् इति मम मनसि भीतिः जायते" एवं वदन् कुट्टानः लोचने कराभ्यां पिधाय व्यलपत्। वीरभूपतेः अपि लोचनयोः अश्रुबिन्दवः न्यपतन्। सः "कुट्टान! समाश्वसिहि। समाश्वसिहि। यदि त्वादृशः विद्वान् वीरः च दुःखं सोढुं न शक्नोति तर्हि अस्यां जगति कः अन्यः शक्नोति" इति अवदत्।

कुट्टानः – "भ्रातः ! एतानि अन्तःपुररहस्यानि कस्मै अपि न कथनीयानि।

तत्रापि सत्कुलप्रसूतत्वात् अस्माकं स्त्रियः अवरोधे वर्तितव्याः। कस्मैचिदपि किमपि न वक्तव्यम्। त्वां विना कम् अन्यम् अहं वक्तुं पारयामि ? यद्यहं स्वतन्त्रः, यदि वा अहं मम पत्न्याम् अनुरक्तः, तर्हि अहं त्वां मम अन्तःपुरम् अनैष्यम्। अहं त्वयि तथा विश्वस्तः"

वीरभूपतिः कुट्टानस्य करं गृहीत्वा गद्गदया वाचा "जानामि, जानामि" इति अवदत्।

कुट्टानः पुनः अवदत् "कथम् अहमेतं दुःखाग्निम् उपशमयेयम् ? मम भार्यापि अन्तःपुरे म्लायते। कियत्कालम् एताम् अपकीर्तिं सहेयम्"? तस्य कण्ठात् रोदनध्वनिः उच्चैः निरसरत्। वीरभूपतिः तम् आलिङ्ग्य तस्य शिरः स्वस्य उरसि कृत्वा हस्तेन आमृशत्।

वीरभूपतिः – "कुट्टान! कथम् एतावन्मात्रेण एव इत्थं परिदूयसे? कियान् महाग्निः मया अन्तर्निगीर्णः ! तस्मिन् दिने मया कथितं वृत्तान्तं स्मरसि वा? तेन सह अन्या एका दुरवस्था मम शिरसि आपतिता। सा भवते न निवेदिता यतः – अहं मद्दुःखस्य संयोजनेन त्वद्दुःखं वर्धयितुं न ऐच्छम्। दिने दिने भवतः विषण्णवदनदर्शनम् एव अलम् इति अचिन्तयम्। किन्तु अद्य तव इदं दुःखं पश्यतः मम तद्रहस्यं हृदये गोपायितुं शक्तिः नास्ति। श्रुणु।

पूर्वं पितुः सकाशात् लेखं प्राप्य अहं ग्रामं गतवान् इति जानासि खलु। यदा एव अहं गृहम् अगच्छं मे पिता मम विवाहार्थं कन्याम् एकां निश्चितवान्। अहं तत् निराकृत्य यावज्जीवं ब्रह्मचर्यं पालयामि इति अवोचम्। मे पिता तत् न अङ्गीकुर्यात् इति मया ज्ञायते। तथापि मम अभिप्रायं निवेदयितुम् एव अहं तथा अब्रुवम्। विवाहः सम्पन्नः। सा कन्या अतीव रूपवती। मम पूर्वपरिचितायाः कन्यायाः एषा रूपवत्तरा इति सन्देहः अपि जायते। किन्तु सा मयि अनुरक्ता, अहम् एतस्याम् अनुरक्तः। एष एव भेदः। विवाहकाले न कदापि सा शिरः उन्नमय्य माम् अवालोकयत्।

विवाहस्य पञ्चमे दिने सा प्रकोष्ठद्वारि अतिष्ठत्। तां पश्यतः मम सा कापि अप्सरःकान्ता इव अलक्ष्यत। तस्यां निशि सा मदन्तिकं नैव आगच्छत्। तिसृषु अपि रात्रिषु मया सह न अभाषत। संलपन्तं मां न आलपति। तां स्प्रष्टुं उद्यते

मयि सक्रोधं ईक्षते। कुट्टान ! त्वं मां जानासि खलु ? नाहं पशुप्रायः। अतः तस्यां धृष्टत्वं अवलम्बितुं नाहम् ऐच्छम्। ताम् अनुनयन् "प्रिये! कुतः मयि विमुखा असि? यदि त्वं विरागिणी, तर्हि किमर्थं मां अनेन विवाहेन अबध्नाः ? कुतः मत्पितरौ वञ्चयसि"? इत्यादि अवदम्।

तस्याः ग्रामे त्रिरात्रे अतीते मद्ग्रामम् आगच्छाव। क्रमेण सा मया सह भाषितुम् अरभत। किन्तु मां तां स्प्रष्टुं न अनुमनुते। अद्यावधि नाहं तां जानामि। अपि एतद्रहस्यम् इतरेभ्यः कथनीयम् ? त्वं तु मे प्राणबन्धुः इति हेतोः तुभ्यम् इदं कथयामि। एतत्स्मरणेन मे हृदयं विशीर्यते। पुरातनेन दुःखेन सार्धं भगवान् मे नूत्नम् इदं दुःखं समपादयत्। यदा सा मया सह भाषितुम् आरभत, तदा कतिपयदिनानन्तरं सा क्रमेण आत्मनः...."

अत्र वीरभूपतिः व्यरमत। सः किमपि वक्तुं सन्दिहानः इव अदृश्यत। कुट्टानः तस्य हस्ते स्वहस्तं निधाय तस्य पञ्चाङ्गुलीनाम् अन्तरे स्वस्य पञ्चाङ्गलीः प्रसार्य गृहीत्वा अवदत् "वीर ! मां वक्तुं संशयितव्यं वा? मया ज्ञातं किमपि त्वया ज्ञातात् न अतिरिच्यते। अस्मात् मुखात् ते रहस्यस्य बहिर्गमनात् पूर्वम् एतत् शिरः भुवि पतेत्"।

वीरभूपतिः निःश्वस्य अब्रवीत् "कुट्टान ! न मे त्वद्विषये सा भीतिः अस्ति। अस्यां जगति त्वां विना कः अन्यः मे बन्धुः? किन्तु तया यदुक्तं तत् मे मुखात् बहिः न आगच्छति। अथवा कुतः न आगच्छति? वक्ष्यामि। श्रुणु। सा आत्मनः संसारवाञ्छा एव नास्ति इति अवदत्। तस्याः लोकेन सह सम्बन्धः नास्ति इति अवोचत्। तर्हि किमर्थं बिवाहम् अकरोः इति अपृच्छम्। सा अकथयत् स्वपितरौ कारितवन्तौ इति। एषा परमयोगिनी माम् आपतिता। अनेन मे किमपि दुःखं नास्ति इत्येव सम्भावय। किन्तु मम पित्रोः मनोरथः एवं फलितः। तदेव अहं वच्मि। नाहं भवन्तं अपि मे दुःखे अंशभागिनं कर्तुं एतत् कथयामि। मम आशयः तु त्वं भवदीयां व्यथां विस्मरेः इति।

अद्य यावत् मत्पत्नी तथैव प्रवर्तते। गृहे सा समीचीनतया व्यवहरति। परिचारिकासु सतीषु अपि स्वयमेव मत्सपर्यां करेति। ताम्बूलं ददाति। एषा व्यथा मे मनसि शल्यवत् गाढं निखाता। यदा यदा अहं तस्याः मुखं प्रेक्षे तस्याः सप्रयत्नं कृतस्य स्मितस्य अन्तस्तत्त्वं मया ज्ञायते एव। न कदापि सा मया

स्प्रष्टव्या। यदि स्पृष्टा, तर्हि सा उरगाङ्गनेव मां सक्रोधं अवलोकयति। कुट्टान ! पुरुषः सन्नपि अहं तस्याः सविधे स्त्री एव संवृत्तः।

किं कुर्याम् ? किं तां तिरस्कृत्य अन्यां परिणयानि? एतावता मया आरब्धे द्वे प्रणययात्रे निष्फले सञ्जाते। तृतीयाम् अधिकृत्य कथं गगनसौधानि निर्मास्यामि ? मे दुःस्थितिं पश्यसि खलु ? तस्याः आज्ञाकारी एव जातः अहम् ! तस्याः मन्दहासेन एव सन्तुष्टः च"।

एवं वदन् वीरभूपतिः स्वस्य नैसर्गिकं धैर्यं परित्यज्य सकरुणं व्यलपत्। कुट्टानः अपि दुःखाभिहतः अभवत्। कञ्चित्कालं तौ द्वौ तूष्णीं आस्ताम्। ततः कुट्टानः शनैः "कः ते श्वशुरस्य ग्रामः"? इति अपृच्छत्। वीरभूपतिः "परमेश्वरसमुद्रः" इति प्रत्युवाच। कुट्टानस्य शरीरे वृश्चिकस्पर्शात् इव रोमाञ्चः अजायत। सः सहसा उत्थाय "वीर! किं ते श्वशुरस्य नाम"? इति अपृच्छत्। वीरभूपतिः प्रत्यब्रवीत् "दोड्डदेवराजः।

कुट्टानः – "किं ते भार्यायाः नाम" ?

वीरभूपतिः "मीनाक्षी" इति प्रत्युत्तरम् अदात्। कुट्टानः "हन्त" ! इति आक्रुश्य भूमौ पतन् इव अलक्ष्यत। वीरभूपतिः उत्थाय तं बाहुभ्यां परिगृह्य शायितवान्। कतिपयनिमेषानन्तरं कुट्टानः प्रतिबुद्ध्य सत्वरं गन्तुं उद्युक्तः "अहं गच्छमि" इति अवदत्। वीरभूपतिः तं "किमेवं सवृत्तः" इति अपृच्छत्। कुट्टानस्य कण्ठात् रोदनमिश्रिता गद्गदा वाक् निस्सृता "किमपि नास्ति, किमपि नास्ति" इति। एवं वदन् एव कुट्टानः वेगेन अगच्छत्।

अग्रे लोहकारस्य उद्ध्माने सम्प्रतप्तः आयसपिण्डः इव सूर्यः उदियात्। घण्टिकार्धे कुट्टानः स्वं सौधम् अगच्छत्। गृहं प्रविशन् एव अन्तःपुरम् अगच्छत्। प्रकोष्ठे भित्तिकायां बिन्दुद्वयं रुधिरम् उदवमत्। द्वितीयवत्सरपूर्तिं सूचयितुम् एकवीरया विन्यस्तं तैलमिश्रितस्य कुङ्कुमस्य चिह्नं तस्य स्वहृदयात् तया उद्धृतं रुधिरम् इव अलक्ष्यत।

16

राजा महाव्याधिग्रस्तः अभूत्। तस्य जीवितं संशयापन्नम्। अतः सैन्याध्यक्षः सपदि आगच्छेत् इति रामनाथदुर्गं प्रति वार्ता प्रेषिता। राज्ये आयव्ययादीनि परिशील्यन्ते। स्थानापतिः प्रातः एव राजास्थानम् अगच्छत्। रात्रौ अपि विलम्बेन गृहं गतः। प्रातः कुट्टानः महत् दुःखम् अनुभवन् गृहं गतः। तस्य स्थितिः कीदृशी इति वीरभूपतिः न ज्ञातवान्।

कुट्टानस्य व्यथायाः हेतुः वीरभूपतिना न अज्ञायत। स्वभार्यायाः नामश्रवणस्य अनन्तरमेव सः तथा दुःखातुरः अभवत् इति तस्य न अस्फुरत्। स्वस्य दुरवस्थां ज्ञात्वा एव कुट्टानः दुःखी जातः इति सः अमन्यत।

वीरभूपतिः गृहम् आगत्य भोजनम् अकृत्वा एव कुट्टानस्य गृहम् अगच्छत्। कुट्टानः गाढं स्वपिति। वीरभूपतिः कञ्चन सेवकम् आकार्य "अद्य ते स्वामी कथम् आसीत्"? इति अपृच्छत्।

सेवकः –"आर्य! अद्य प्रातः प्रभृति स्वामी किमपि न खादितवान्, न वा स्नातवान्। तस्य समीपं गन्तुं वयं सर्वे भीताः अभूम। तस्य अक्षिणी अङ्गारः इव आरक्ते आस्ताम्। दिवसं यावत् गृहे उद्याने च कार्यातुरः इव परिभ्रमन् आसीत्। एकयामपरिशिष्टे दिने निद्रां गतवान्। अधुना रजन्याः प्रथमयामः अतीतः। न इदानीं अपि सः निद्रायाः उत्थितः। अभोजनेन ग्लानिः जायते। भवन्तः अपि वा तं प्रबोधयन्तु"।

वीरभूपतिः कुट्टानः न प्रबोधयितव्यः इति तम् आदिश्य गृहम् आगच्छत्। सा रात्रिः निश्शब्दं, प्रशान्तं गम्भीरं च अगच्छत्।

दिवस आगतः। तेन सह ज्येष्ठमासः अपि आगतः। श्लक्ष्णस्य प्रातस्सन्ध्यामेघस्य यवनिकाभ्यन्तरे उदितः सूर्यबिम्बः ईषत् उग्दतः सन् स्वच्छकिरणसमूहैः जगति प्रभाः प्रासारयत्।

तस्मिन् दिने राजा किञ्चिदिव स्वस्थः अभवत्। स्थानापतिः मा आगच्छतु इति वार्ता प्रहिता। राज्ञः स्वास्थ्यं सैन्याध्यक्षाय अपि सन्दिष्टम्।

दिनस्य प्रथमे यामे अतीते कुट्टानः प्रबुद्धः। उत्थाय, पर्यङ्के एव कञ्चित्कालं शान्तः उपविश्य, तदनु स्नानादिकानि निर्वर्तितवान्। वीरभद्र भट्टरम् आकार्य, आपणं गत्वा द्विशतपन्नुमूल्यवतीं शाटिकां, हरिद्रां कुङ्कुमं च तत्क्षणम् आनेतुं तं समादिशत्।

तानि वस्तूनि आनीतानि। श्रीखण्डमञ्जूषायाः भूर्जपत्रम् अपनीय म्लानकुसुमानि, कस्तूरां च तथैव संस्थाप्य, तां मञ्जूषां, शाटिकां, हरिद्राकुङ्कुमे च गृहीत्वा वीरभूपतेः गृहम् अगच्छत्। पूर्वेद्युः सम्पूर्णतया भोजनाभावात् सः गन्तुं न अशक्नोत्, किन्तु शकटम् अधिरोढुं न ऐच्छत्।

वीरभूपतिं शाटिकां हरिद्राकुङ्कुमादीनि च दृष्ट्वा किमेतत् इति अपृच्छत्। कुट्टानः अवदत् "क्रमेण सर्वं अभिधास्यामि। मा त्वरस्व"। सः पुनः अवदत् "अद्य अहम् अत्रैव भोक्ष्यामि"। वीरभूपतिः बाढमिति अवोचत्।

कुट्टानः – "आवां द्वौ एव भोक्ष्यावः। आवयोः भोजनं तव भार्यया एव परिवेषणीयम्"

वीरः – "तां पृच्छामि। तया अङ्गीकार्यं किल? त्वम् असि सैन्याध्यक्षस्य पुत्रः। सा त्वत्सम्मुखम् आगमिष्यति वा न वा।

कुट्टानः– "अहमेव एनां प्रार्थयामि। भ्रातुः दर्शने कः देषः? अवरोधजनस्य अपि न भ्रातृणां बन्धूनां च सन्निधिः परिहरणीयः खलु"।

द्वौ अपि उपरिभूमिकायां वीरभूपतेः शयनप्रकोष्ठं प्राविशताम्। मीनाक्षी प्रत्युत्थिता अतिष्ठत्। कुट्टानं प्रत्यभिज्ञाय साकूताभ्यां नेत्राभ्यां तम् अपश्यत्। कुट्टानस्य नयने नूत्नतया श्वशुरगृहं गतां भगिनीं पश्यतः भ्रातुः नेत्रे इव सोदरस्नेहं सूचयन्तं मन्तहासम् अवहताम्। विशालयोः तस्य लोचनयोः अन्ते बाष्पबिन्दुभिः अपूर्यन्त।

वीरः – "मीने! तव एषः भ्राता अद्य त्वद्धस्तपरिवेषितं भोजनम् इच्छति। त्वम् एनं न जानासि खलु। एषः एव कुट्टान सेतुपतिः। एषः मे परमप्रेमभाजनमिति मया उक्तपूर्वं खलु। मया भुज्यमानं एकैकम् अन्नकणम् अस्य प्रसादात्

लब्धमेव"।

मीनाक्षी स्तम्भीभूता अतिष्ठत्। तस्याः नयनयोः अश्रूणि अपतन्। तौ द्रष्टुम् अशक्ता शिरः अनामयत्।

कुट्टानः– "भगिनि! कुतः त्वं निस्तब्धा तिष्ठसि? किमिदं न प्रार्थनीयम्? तव पत्युः मम च स्नेहः तादृशः। अतः त्वं मम भगिनी असि। कः ते सन्देहः? मम मनसि त्वया परिवेष्यमाणम् अन्नं भोक्तुम् इच्छा जाता। अतः एव अहम् आगतः। यदि त्वं न अङ्गीकरोषि तर्हि अहं गमिष्यामि"।

मीनाक्षी दीर्घं निःश्वस्य अवदत् "भ्रातः! परिवेषयामि। मम निस्तब्धतायाः अन्यत् कारणम् अस्ति। तदहं पश्चात् कथयिष्यामि"

गतेषु दिवसेषु न कः अपि न कदापि मीनाक्षीं तथा सोत्साहाम् अपश्यत्। तयोः भोजनानन्तरमपि सा महोत्साहवती आसीत्। सापि भुक्त्वा आगता। तौ उपरिभूमिकायां प्रकोष्ठे रत्नकम्बले असीनौ अभवताम्। कुट्टानः मीनाक्षीं ताभ्यां सह उपवेष्टुं निरबध्नात्। सापि निषण्णा। ततः कुट्टानः वीरभूपतिं प्रति एवं वक्तुम् आरभत। "भ्रातः! अहं ते किञ्चित् कथयानि। तत् भवतः दुःखकरं वा आनन्ददकरं वा इति न ज्ञायते मया। तत् कथनीयं वा न वा इत्यपि न ज्ञायते। तत् शंसितुं मे भगिन्याः मीनाक्ष्याः अनुज्ञा आवश्यकी....." इति वदन् सः मीनाक्षीं अपश्यत्। सा अवनतं शिरः चालयित्वा स्वस्याः अङ्गीकारम् अज्ञापयत्।

कुट्टानः– "वीर! त्वादृशः धीरः बुद्धिमान् च पुरुषः एतस्य श्रवणानन्तरम् अपि पूर्ववदेव वर्तिष्यते इति आशयेन इदं वच्मि। ते अहं किमपि वृत्तं शंसिष्ये। मा बिभेहि। आत्मानं निगृहीष्व। किं कथयानि"?

वीरभूपतिः शिरः चालयामास

कुट्टानः – "पुरा अहं कस्याम् अपि कन्यायाम् अनुरक्तः आसम् इति त्वाम् अवदं खलु। आत्मानं धारय... सैव एषा"।

वीरभूपतेः शिरः अभ्रमत्। सः "हा" ! इति उच्चैः आक्रोशत्। मीनाक्षी अविरलम्

अश्रूणि वर्षन्ती आसीत्।

कुट्टानः – "वीर ! किम् एतदेव ते धैर्यम्? समाश्वसिहि। न किमपि अनिष्टम् आपन्नम्। सर्वं एतत् भगवतः विलसितम्। किं वा वयं कुर्मः ? अहं ते परमाप्तः। अस्मिन् जगति मदृते कः अन्यः अस्ति त्वयि स्निग्धः। कुतः इयम् अधीरता? कुतः वा शोकः? भ्रातः ! तावत् मे शिरः छिद्यात् यावत् त्वां किमपि अशुभम् आपद्येत"।

वीरभूपतिः किञ्चिदिव प्रकृतिं गतः।

कुट्टानः – "परह्यः त्वं त्वदीयं वृत्तम् अकथयः। अहं पाताले पातितः इति अचिन्तयम्। अकस्मात् श्रुतया एतद्वार्तया मम शिरः अभिद्यत। इदानीम् एतच्छ्रवणेन यादृशी ते स्थितिः, तादृशी एव तदानीं मे स्थितिः अपि। ततः गृहं गत्वा.....किं कार्यम्? न किञ्चिदपि मे अस्फुरत्। आत्मानं ब्रह्महत्याशतपातकितमिव अपश्यम्। वीर! मयि उन्मादः आपतितः इव अलक्ष्यत। तदातु उन्मत्तः एव अभवम्। परन्तु भगवान् सुन्देरेश्वरः मयि सकरुणः आसीत्। ह्यः मध्याह्ने महाकल्लोलम् एतम् अतीतवान् आसम्।

त्वं मे परमसुहृत् असि। त्वत्तः अन्यः न कः अपि अस्मिन् लोके मयि प्रीतिमान् अस्ति। कथम् अहं तादृशस्य भवतः भार्यायाम् अनुरक्तः आसम्। मे हृदयं भगभगायमाने पावके पतितम् इव अदह्यत। विषसंलिप्ताग्रेण छुरिकासहस्रेण विदीर्यमाणं चेत् अपि, तत् न तथा बाधाम् अनुभवेत्। कथञ्चित् अनेन व्यथाप्रवाहेण अव्यापन्नः अहं तस्य पारम् अगच्छम्। अस्याः विषये मम मनसि वर्तमानम् अनुरागं सर्वम् अपि सोदरवात्सल्यत्वेन पर्यवर्तयम्।

वीर! न मे भगिन्यः सन्ति। तं लोपं भगवान् इत्थं पूरितवान्। सत्यं वच्मि। अहं भवतोः अनुरागयुक्तं दाम्पत्यमेव द्रष्टुम् इच्छामि। इतःपरं पूर्ववृत्तन्तः मम स्मृतिगोचरः न भविष्यति। यतः ह्यः अहं मनसा पर्याप्तां नरकबाधाम् अन्वभवम्। सा बुद्धिः मम मानसात् अपगता। सम्प्रति अहम् इमां मम भगिनीम् अवधारयामि। एनां तथा सम्भावयितुम् अहं शक्तः अभवम्। वीर! विना काममपि दुश्चिन्ताम् अहम् इमां आलिङ्गितुं समर्थः अस्मि। यदि मे कापि भगिनी स्यत् तर्हि यथा ताम् अहं परिष्वजेयं तथा इमामपि। ह्यः मया

अनुभूतया महाबाधया, मत्कृतेन तपसा च अहम् ईदृशं स्थैर्यं प्राप्तवान्।

वीर! त्वम् अस्मिन् जन्मनि मत्कृते किं किं नाकरोः, यदर्थं अहं त्वयि कृतज्ञः स्याम् ! घोरात् पातकात् अरक्षः। मम धर्मपत्न्यां प्रणयं वोढुं मार्गम् आदिशः। किमन्यत् करणीयमस्ति? त्वं मे आचार्यस्थानीयः....”। कुट्टानः रुदन् वीरभूपतेः चरणौ अस्पृशत्। वीरभूपतिः तं निवार्य “कुट्टान! मे पुराकृतपुण्यवशात् त्वं मम सुहृत् अभवः। किं मे त्वया सह साम्यम्? त्वं ऋषिः असि। अहं तु केवलं मनुष्यः। त्वं भुवम् अवतीर्णः सुन्दरेश्वरः असि” इति वदन् अश्रूणि अमोचयत्।

कुट्टानः शाटिकां हरिद्राकुङ्कुमे, मञ्जूषां च मीनाक्ष्यै दत्वा “भगिनि! बुद्धिमती विद्यावती च असि। किं ते मया वक्तव्यम्। एतां परिधारय” इति अवोचत्। सा अश्रूणि प्रमृज्य, तां शाटिकां धृत्वा अगत्य कुट्टानं भर्तारं च अवन्दत। भर्तारं प्रणमन्ती सा तस्य पादौ हस्ताभ्यां पर्यमृशत्।

17

मीनाक्षी “भ्रातः! दिनद्वयं तिष्ठ”। इति अब्रवीत्। वीरभूपतिः अपि तं गन्तुं न अनुमेने। अतः कुट्टानः आपञ्चमि वीरभूपतेः गृहं त्यकुं न अशक्नोत्। तस्य मनः एकवीरां द्रष्टुम् उत्सहते। सः एतत्सर्वं तस्यै कथयितुम् ऐच्छत्। मीनाक्ष्याः प्रार्थनां निराकर्तुं अक्षमः सः तत्र अतिष्ठत्।

तृतीयायां तिथौ राजा बलवत् अस्वस्थः अभवत्। शीघ्रम् आगम्यतां इति पुनः सैन्याध्यक्षाय वार्ता प्रहिता। किन्तु सः आगन्तु अशक्तः अभवत्।

मुद्दुकृष्णप्प नायकस्य सिंहसनारोहणात् पूर्वं मारवदेशः चोरणाम् आस्पदम् आसीत्। रामनाथः मथुरारामेश्वरयोः मध्ये अस्ति। रामनाथसमीपे कश्चित् महान् ह्रदः अस्ति। तस्य नाम “पाण्ड्यकम्मै”। सः पुरा पाण्ड्यराजभिः निखातितः इति श्रूयते। तं ह्रदं परितः पदं कृत्वा चोराः पथिकान् मुष्णन्ति स्म। विश्वनाथ नायकस्य कालात् प्रभृति सः मार्गः तथैव आसीत्। किन्तु मुद्दुकृष्णप्प नायकः तन्मार्गविषये कृतश्रद्धः, सैन्याध्यक्षं तत्र प्रेषयित्वा तां दिशं स्वाधीनाम् अकरोत्। मथुरानायाकानां रामनाथदेशस्य स्वाधीनता

अत्यन्तम् आवश्यकी। सर्वः अपि समुद्रतीरदेशः पोर्चुगीसदेशीयानां वशे अवर्तत। पोर्चुगीसराजप्रतिनिधिभिः नियुक्ताः पुरुषाः वेलामूलस्थग्रामेषु पट्टणेषु च करं, पोतवणिजां लब्धिषु अंशं च गृह्णन्तः आसन्। तेषु तेषु देशेषु अपराधदण्डनाद्यधिकारः सर्वः तेषामेव वशे आसीत्। वस्तुतः तत्तद्देशराजसु न केनापि स अधिकारः तेभ्यः दत्तः।

सर्वे धीवराः प्राच्यसमुद्रतीरस्थाः च जनाः पोर्चुगीसपालकानाम् एव प्रजाः इति प्रथा अकल्प्यत। निरक्षरास्यान् एतान् तीरवासिनः पोर्चुगीसपालकाः स्वमतबोधकद्वारेण स्वल्पैः पारितोषिकैः आकृष्य, तान् क्रैस्तवत्वेन परिवर्तयित्वा, तेषां साहाय्येन देशे चौर्यादीनि अकार्याणि कुर्वन्तः आसन्। तं राजकीयदुर्जनत्वं निवारयितुं मथुराराजभ्यः मारवदेशस्य सुव्यवस्था आवश्यकी अभवत्। तस्मिन् काले रामेश्वरं गच्छतां तैर्थिकाणां सर्वस्वापहरणम् अपि क्रैस्तवमतस्य अभिवृद्धिकारकम् इति अमन्यत। सैन्याध्यक्षः उदयन सेतुपतिः तद्देशस्य सुस्थितिं साधयितुं विश्वावसुनाम्नि वत्सरे तत्र प्रेषितः अभूत्।

तत्र गतः सेतुपतिः प्रथमं रामेश्वरगामिनः मार्गस्य भद्रतायै रामनाथे पोगलूरौ च दुर्गे निर्माय, तत्र पर्याप्तं सैन्यं अस्थापयत्। तैर्थिकान् बृन्देषु सङ्घटितुं आदिश्य, एकैकेन बृन्देन सह कतिचन सैनिकान् प्रेषयितुम् आरभत। प्रतिदिनं प्रातः सायं च एकैकः यात्रिकसमूहः रामनाथात् प्रतिष्ठते। एकैकेन सङ्घेन सह पञ्चाशत्संख्याकाः सैनिकाः अपि गच्छन्ति। एते सैनिकाः परस्मिन् दिने रामेश्वरात् प्रतिनिवर्तद्भिः यात्रिकैः सह प्रत्यागच्छन्ति। ततः परस्मिन् दिने पुनः तैर्थिकसङ्घौ रामनाथात् प्रतिष्ठेते। इत्थं सः प्रथमं यात्रिकाणां सौकर्यं व्याधात्। तदनु तत्र तत्र निरङ्कुशवृत्तीन् धीवरनेतॄन् क्रमेण विनीय कालय्यार् कोयिल्, पट्टमङ्गलं इत्यादिषु स्थानेषु समर्थान् अधिकारिणः अस्थापयत्। ततः सः रामनाथं परितः अरण्यं छेदयित्वा तत्र पाण्ड्यकम्मैजलेन कृषिं अकारयत्। सेतुपतेः पालने सः देशः क्रमेण चोरभयरहितः भूत्वा तृणकाष्टजलसमृद्ध्या शान्तः अजायत। विदेशीयानां धृष्टत्वं अपि तत्कालीनत्वेन निरुद्धम्। किन्तु सेतुपतिः मतविषये किमपि कर्तुं न अकशत्।

राज्ञः अस्वास्थ्यहेतोः राजधानीम् आगन्तुं सन्दिष्टः सैन्याध्यक्षः भीतः अभवत्। राज्ञः स्थितिः कीदृशी स्यात् वा। यदि सः मरिष्यति तर्हि अस्मिन् प्रान्ते

आत्मना कृतः सर्वः अपि यत्नः वितथीभविष्यति। प्रायः नूत्ने राजनि पदम् आगते सामन्ताः स्वातन्त्र्यं प्रकटयन्ति, शत्रवः च पूर्वराज्ञा जितानि अत्मनां भूमिभागानि स्वाधीनीकर्तुं यतन्ते। अतः राजधान्यां बहुकार्यव्यग्रः सैन्याध्यक्षः अत्र न आगमिष्यति इति विज्ञाय, अमुमेव अनुकूलम् अवसरं मत्वा च, पूर्वं आत्मना विनीताः नेतारः यदि स्वातन्त्र्यं वहेयुः, तर्हि तेषां पुनः निग्रहः दुष्करः भविष्यति। इत्थं विचार्य सैन्याध्यक्षः स्वपुत्रं कुट्टानम् आत्मनः राजधानीगमनात् प्रागेव तत्र उपस्थातुं सन्दिदेश। स्वस्य स्थाने पुत्रं प्रतिष्ठाप्य एव गन्तव्यम् इति तस्य आशयः। तेन तत्क्षणं राजधानीं प्रति आगन्तव्यम् इत्यतः कुट्टानः तत्क्षणं रामनाथं प्रति गन्तव्यः आसीत्।

ज्येष्ठशुक्लपञ्चम्याम् एव कुट्टानः मथुरायाः प्रातिष्ठत्। एकवीरां द्रष्टुमपि अवकाशः न लब्धः।

सैन्याध्यक्षः दशम्यां मथुरां प्राप्नोत्। राजा मुद्दुकृष्णप्प नायकः पर्यङ्के शयानः एव स्वस्य द्वौ पुत्रौ, सैन्याध्यक्षं, प्रधानिनं, रायसं च सम्मुखे उपवेश्य राज्यं पुत्रयोः हस्ते अर्पितवान्। स्वस्य ज्येष्ठपुत्रं वीरप्पनायकं अभिषेक्तुं अदिदेश। द्वितीयं, महाकार्यदक्षं तिरुमल नायकं – भ्रातारि सर्वथा भक्तिमता भाव्यम् इति, कस्तूरीरङ्गप्पवत् न प्रवर्तितव्यं इति, तथा कृते सति, राज्यं बहुधा विभक्तं सत् शत्रूणां सुसाध्यं भवेत् इति च प्रोवाच । पितुः पादयोः उपविष्टः सालप्राशुः तिरुमल नायकः सद्यः उत्थाय करवालं हस्ते धृत्वा –भ्रातरं सेवेय इति, तस्य अनन्तरमपि तत्सन्ततिम् एव राज्ये अभिषिञ्चेयम् इति च प्रत्यजानात्। ततः राजा सैन्याध्यक्षं प्रधानिनं रायसं च- यथा आत्मनि तथा आत्मनः पुत्रे अपि भक्तिमद्भिः भाव्यम् इति, तेषां राजभक्तिः एव राज्यस्य पुरोगमनहेतुः इति च उक्त्वा, सैन्याध्यक्षेण कृतान् महाकार्यान् परिकीर्तयन् तस्य राजभक्तिं च बहुधा प्रशशंस। ते च यथापूर्वं राज्यं रक्षेम इति प्रतिज्ञाम् अकुर्वन्। तेन राजा स्वस्थचित्तः अभवत्। ततः पूर्वमेव सर्वे सामन्ताः विविधैः व्याजैः आमन्त्रिताः अभूवन् । सायं राजा तान् सर्वान् एकैकशः आहूय, तेभ्यः अपि तथैव वचः गृहीता, तस्मिन् एव दिने वीरप्पनायकं राज्ये अभिषेचयामास। सर्वे नूत्नं राजानम् अभ्यवादयन्। तत्परः दिवसः एकादशी आसीत्। तस्मिन् दिने चन्द्रोदयसमये मुद्दुकृष्णप्प नायकः पञ्चताम् अगच्छत्।

राजसौधं रोदनध्वनिभिः अपूर्यत। सैन्याध्यक्षः तिरुमल नायकः च सर्वान् समाश्वासयताम्। चन्दनकाष्ठैः घृतसेचनेन च वृद्धराजकलेवरः अग्निसात्कृतः अभवत्। महाराजः वीरप्पनायकः गवां सहस्रम् अग्रहारशतं च ब्राह्मणेभ्यः अदात्।

सामन्तानां प्रधानाधिकारिणां च राजभक्त्या राज्ये यथापूर्वं शन्तिः एव अभवत्। नूत्नस्य राज्ञः प्रासादः सामन्तराजभिः प्रदत्तैः उपायनैः पूर्णः अजायत। न ज्ञायते वृद्धस्य राज्ञः मरणकृतः शोकः कुत्र निलीनः, मथुरा तु नूतनस्य राज्ञः पट्टाभिषेकोत्सवस्य आनन्दचिह्नैः एव विराजते।

एकस्मिन् दिने वीरभूपतिः उदयन सेतुपतिं स्वगृहे अभ्यवहाराय निमन्त्रितवान्। वीरभूपतिः वयसा अवरः। वृद्धः नरपतिः अपि- वीरभूपतिः मासत्रयात् पूर्वमेव उद्योगं प्रविष्टः अपि अतीव दक्षतया कार्यभारं निरवहत् इति तं प्रशंसितवान्। उदयन सेतुपतिः इतः पूर्वं कदापि तं न अपश्यत्। केवलं जानाति यत् तस्य इदं स्थानापतिपदं कुट्टानः स्वयं तिरुमल नायकेन दापितवान् । तं पश्यतः उदयन सेतुपतेः अतीव आनन्दः अजायत यत् सः युवा, बुद्धिमान् च इति।

उदयन सेतुपतेः भोजनं मीनाक्षी स्वयं पर्यवेषयत्। सैन्याध्यक्षः मीनाक्षीं जानात्येव। तां दृष्ट्वा अश्चर्यचकितः सः वीरभूपतिम् अपृच्छत्। स्थानापतिः सर्वं तं वृत्तान्तं संक्षेपेण अकथयत्। मीनाक्षी "पितृव्य ! अपि जानासि मे भ्रातुः मयि कियती प्रीतिः इति" इत्यवदत्। स्वपुत्रस्य गार्हस्थ्यजीविते शुभः कालः आगतः इति सेतुपतिः सन्तुष्टः अभवत्। इतःपरं स्नुषापुत्रयोः वियोगः न घटितव्यः। सः तद्दिवसीयां तिथिम् अपृच्छत्। "अषाढबहुलचतुर्दशी"।

18

मीनाक्षी सेतुपतीनां भवनं प्रति गतागतानि कुर्वन्ती आसीत्। एकवीरायां तस्याः प्रगाढा मैत्री अजायत। एकवीरापि द्वित्रिवारं स्थानापतेः गृहम् आगता।

यदा यदा सा तत्र आगता, तदा तदा वीरभूपतिः गृहे न आसीत्। राजकार्यैः व्याकुलः सः गृहम् आगन्तुम् अपि अवकाशं न प्राप्नोति स्म। सप्ताहं यवात् प्रतिदिनं सः "अद्य न आगम्यते", "अद्य न आगम्यते" इति केवलं सन्देशान् एव गृहं प्रेषयन् आसीत्। कुट्टानः स्वस्य मीनाक्ष्याः च प्रणयवृत्तान्तकथनानन्तरं दिनत्रयं यावत् तेन सहैव अतिष्ठत्। पश्चात् सः रामनाथं गतवान्। ततः मीनाक्षीवीरभूपत्योः चर्यासु बहूनि परिवर्तनानि अजायन्त।

वीरभूपतौ मीनाक्ष्याः अनुरागः दिने दिने उपचीयमानः आसीत्। सा सर्वदा तस्य सन्निधौ एव तिष्ठति स्म। तेन सह भाषमाणायाः तस्याः मुखे अव्यक्ताः स्वर्गवाञ्छाः प्रकटीभवन्ति। तेषु चतुःपञ्चषदिनेषु द्विवारं सा स्वयं तम् आलिङ्गितवती। किन्तु वीरभूपतौ किमपि चलनं न आजायत। सः इतः पूर्वमिव तया सह भाषितुमपि न प्रयतते स्म। आत्मनः अभ्याशे उपविष्टां तां ततः गन्तुम् आदिशति। समीपम् आयान्तीं तां दृष्ट्वा कार्यव्यग्रः इव तं प्रदेशं त्यजति। यदा सा तं परिष्वजते तदा रम्भापरिष्वङ्गे निश्चलः नियतेन्द्रियः च शुकः इव तिष्ठति। तस्य एष तूष्णींभावः मीनाक्षीं न व्याकुलयति स्म। तस्मिन् तस्याः अनुरक्तिः दिने दिने वर्धते।

आत्मानं प्लावयन्तं तं प्रेमप्रवाहं सोढुं वीरभूपतिः अशक्तः अभवत्। प्रणयं द्योतयन्तीभिः तस्याः चेष्टाभिः तस्य मनः विचलितम् अभवत्। मीनाक्षीसेतुपत्योः पारस्परिकं प्रेम तस्य मनः आवृणोत्। तत् अधुना सोदरप्रेमत्वेन परिणतं खलु? परन्तुं शारीरकं संयोगं विना अपि तौ एव जायापती भवितुम् अर्हतः। तयोः प्रेम वैयर्थ्यं न गच्छति। यावत् तौ जीवतः तावत् तत् न परिमृज्यते। यद्यपि तयोः अधुनातनी स्थितिः यथार्था, तथापि मीनाक्ष्याः प्रथमं प्रेम, तस्याः हृदयमुकुलं कुट्टानेन एव आघ्रातम्। सम्प्रति तत् अनन्यभोग्यम्.... वीरभूपतिः न निद्रातुं शक्नोति, न वा भोक्तुम्। निरन्तरं मीनाक्ष्याः साहचर्यं सोढुम् अक्षमः सः राजसौधं गत्वा तत्र एव वसति।

गृहं अनागतस्य वीरभूपतेः सप्ताहम् अतीतम्। मीनाक्षी तत्कृते राजसौधं गन्तुं मनः कृत्वा, तथा कर्तुं न साम्प्रतम् इति निरचिनोत्। "कति वा दिनानि सः तत्र वत्स्यति ? शीघ्रमेव आगमिष्यति। इयता सङ्घमर्यादा न अतिक्रमणीया" इति अचिन्तयत्। यदा यदा सा वीरभूपतिं ध्यायति तदा तदा तस्याः मुखं

रेखासौष्ठवाङ्कितं, अक्षिणी ज्योतिरास्थाने, गात्रं च पुलकाङ्कुरितं जायते। अस्मिन् महाप्रेम्णि मग्ना सा आत्मानं प्रति वीरभूपतेः भावं न अजानात्। स्वस्याः कल्मषं सकलं कुट्टानस्य तपसा परिक्षालितम् इति, बुद्धिशालिना वीरभूपतिना तत्सन्निवेशस्य समुन्नतः अर्थः अवश्यम् अवगतः स्यात् इति च अमन्यत। तस्य निरन्तरं राजसौधे एव निवासस्य कार्यव्यग्रता एव हेतुः स्यात् इति अचिन्तयत्। राज्ञः मृतस्य कतिपयानि एव दिनानि गतानि इत्येषा स्थितिः अपि तस्याः तं भावं द्रढयामास।

श्रावणशुद्धदशमी। विहायसि जलदाः कृष्णसारमृगाः इव, अगुरुधूमाः इव, भल्लूकाः इव करिकलभाः इव (क्रमेण) समुत्पतन्ति, व्याप्नुवन्ति, स्थिराः तिष्ठन्ति, घीङ्कुर्वन्ति च। प्राच्यां दिशि व्याप्तः जीमूतः प्रान्तस्थान् दश अन्यान् अम्बुवाहान् समाश्लिष्य वृष्टप्रायः इव अलक्ष्यत। किन्तु सद्यः एव उत्थितः प्रचण्डः वायुः तं पुनः एकादशधा विभाजयामास। भानुः कदाचित् श्लक्ष्णमेघान्तरितः मन्दरश्मीः प्रदर्शयति। सपदि पुनः एकः तमालगुल्मसङ्काशः वारिधरः तं पिधाय अन्तरयति।

एकाकिन्याः मीनाक्ष्याः मनोविनोदः न आसीत्। वीरभूपतेः असन्निधानेन सा वियोगातुरा न अभवत्। अनुक्षणं तमेव प्रतीक्षन्त्याः तस्याः वपुः पदे पदे प्रतिनवरोमाञ्चेन कण्टकितम् अजायत। अत्रान्तरे सा एकवीरायाः सकाशं गन्तुं मतिम् अकरोत्। अद्यावधि सा दशवारम् एकवीरायाः गृहं गता स्यात्। मीनाक्षी एकवीरायाम् अतीव स्निग्धा। तत्स्नेहस्य कः अपि हेतुः अस्ति। तां पश्यन्त्याः एव मीनाक्ष्याः स्वजीवितं सर्वं स्मृतिपथम् आयाति। स्वस्याः जीवितरहस्यं निखिलं गुलिकाकारं सत् एकवीरायां निलीनं वर्तते इति मीनाक्ष्याः प्रतिभाति। किन्तु कुतः एकवीरायाः तस्यां प्रेम स्यात् ? तस्यै मीनाक्षी स्थानापतेः पत्नी। स्थानापतिः स्वभर्तुः मित्रम्। तस्य एतत् पदं स्वभर्त्रा दापितम्। अतः मीनाक्ष्याः स्वस्यां प्रेम स्यात्। आत्मनि तथा स्निह्यन्त्यां मीनाक्ष्यां तदनुरूपः स्नेहः एकवीरायाः मनसि न आसीत्। तथापि लोकमर्यादानुसारं यावदभिलषितं तावत् तस्यां स्नेहं व्यञ्जयन्ती आसीत्। अतः एव ततः पूर्वं कदापि गृहात् बहिः न गता एकवीरा द्वित्रिवारः स्थानापतेः गृहम् अगच्छत्। कञ्चिदेव कालं तत्र स्थित्वा पुनरागता। मीनाक्षी स्वगृहं सर्वं तस्यै दर्शयितुम् ऐच्छत्। किन्तु

एकवीरा तस्य अवकाशम् अदत्वा यथा गता तथा निवृत्ता।

मीनाक्षी स्वभावेन बुद्धिमती, परेङ्गितज्ञा च। किन्तु सम्प्रति सा केनापि पारवश्येन आविष्टा वर्तते। आत्मनः प्रथमं प्रेम, तस्य परिणामः, पितृनिरोधात् घटितः अनभिलषितः विवाहः, स्वस्याः इच्छाम् अनुवर्तमानः भर्ता, दैवेन कुट्टानस्य समागमः, तस्य महत्तरः त्यागः.....अद्भुतः एतासां घटानानां सन्निवेशः तस्याः मनः विमूढं अकरोत्। परिणयदिनात् आरभ्य पत्युः विषये आत्मना कृतः अपराधः तां बाधते। तदितरं किमपि चिन्तयितुं अशक्तं तस्याः मनः स्वस्य सकलां शक्तिं तस्मिन् एव विषये न्यक्षिपत्। रात्रिन्दिवं सा वीरभूपतिमेव ध्यायति। आत्मनः विषये एकवीरायाः व्यवहारः कीदृशः इति सा नैव अजानात्। अतः पुनः तस्याः सकाशं गन्तुम् इच्छन्ती चोदकं शकटं सज्जीकर्तुम् आदिशत्।

स्वयमपि केशानि प्रसाध्य, नवां शाटिकाम् आभरणानि च धृत्वा, प्राङ्गणे स्थापितं शकटम् अधिरोढुं बहिरागता। सा प्रातः एव केनापि सेवकेन तस्यां रात्रौ गृहम् आगन्तव्यम् इति वीरभूपतिं सन्दिदेश। सम्प्रति सः सेवकः आगत्य स्थानापतिः तस्यां रात्रौ गृहम् आगमिष्यति इति वार्ताम् अकथयत्। तं विसृज्य मीनाक्षी शकटम् अधिरुढा। शकटे निषण्णायाः मीनाक्ष्याः नयनयोः अग्रे वीरभूपतिः अदृश्यत। श्वेतवर्णं वपुः। शान्तं वदनम्। स्वच्छं तदाननं श्मश्रुभ्यां द्विरेफाध्यासितेन कमलेन सादृश्यं भजते। आजानू बाहू। सुन्दरे नेत्रे। सदा स्मेरं मुखम्। मीनाक्षी आत्माना धृतस्य हैमपुष्पाङ्कितस्य सितवर्णराङ्कवस्य अधः कुञ्चिताभ्यां बाहुभ्याम् उरःपञ्जरं निपीडतन्यी नेत्रे निमील्य शकटस्य एकस्मिन् कोणे निलीना अतिष्ठत्। शीतः वायुः प्रावरणपटान्तरालात् सद्यः अन्तः प्राविशत्। मीनाक्षी नेत्रे दृढं निमील्य ततः अपि कोणे निलीना आसीत्।

सः शकटः राजदत्तः। सर्वेभ्यः प्रधानाधिकारिभ्यः राजा एकैकं शकटम् उपायनीकरोति। स एव एषः। सः चतुश्चक्रः नूत्नतया वर्णरञ्जितः च। नन्दीश्वरप्रतिमौ द्वौ वृषभौ तस्मिन् युक्तौ। शाकटिकः महता यत्नेन तौ निगृह्णाति। शकटस्य कूबरे, बलीवर्दयोः स्कन्धदेशे आस्तीर्णयोः रक्तवर्णप्रावारकयोः च स्थानापतेः नाम विलिखितमस्ति। तयोः विषाणयोः तीक्ष्णे अग्रे काञ्चनवलयाभ्याम् अलङ्कृते आस्ताम्- मुकुरशकलैः,

किङ्किणीभिः घण्टिकाभिः च प्रसाधिताभ्यां केशनिर्मितशिरोग्रीवबन्धनदामभ्यां, ग्रीवयोः घण्टिकापट्टाभ्यां चरणेषु केशरचितरज्जुभिः च प्रकाशमानौ तौ वृषभौ दक्षाध्वरध्वंसवेलायां वीरभद्रम् अनुधावन्तौ नन्दीश्वरभृङ्गीश्वरौ इव फेनम् उद्गिरतः। देव्यै पार्वत्यै राज्ञा हिमवता प्रहितः सुदायः इव, संत्सरारम्भे देव्याः मीनाक्ष्याः कल्याणार्थं परिगुम्फितः मण्डपः इव सः शकटः राजमार्गे लीलया अगच्छत्।

यानं सेतुपतीनां गृहाङ्गणं प्रविश्य, मन्दम् अन्तःपुरप्रदेशम् अगच्छत्। एकवीरा गवाक्षात् मीनाक्षीं दृष्ट्वा प्रासादात् अवतीर्य तां प्रत्युद्गता। मीनाक्षी एकवीराम् अपश्यत्।

तस्मिन् दिने एकवीरा धवलशाटिकां धृतवती। तस्याः शिरोजानि अभ्यञ्जनसंस्कृतानि इव निस्तैलानि दृश्यन्ते। तस्याः नयनयोः किमपि लोलत्वं चकास्ति। तत् मोहनत्वम् इति वक्तुम् उचितम्। तस्याः कञ्चुलिका अपि सौवर्णसूत्रेण विन्यस्तैः पुष्पैः अङ्किता, श्वेतवर्णा एव। तदा सा सितवर्णकादम्बिनी इव, धवलवर्णकेतकीपत्रमिव च विभाति।एकवीरां पश्यन्त्याः मीनाक्ष्याः सा इतः पूर्वं कदापि आत्मना दृष्टा स्यात् इति अभासत। चकिता पुनः ताम् अपश्यत्। अत्रान्तरे एकवीरा परिचारिकया आनीतं रक्तवर्णराङ्कवं प्रावृणोत्। पुनः सा परिचिता इव अलक्ष्यत मीनाक्ष्याः।

विवाहात् आरभ्य एकवीरा हरितवर्णशाटिकाः धर्तुम् आरब्धवती। सर्वेषु अङ्गेषु सप्ताहाभरणानि* अलङ्करोति। विवहात् पूर्वं सा श्वेतवस्त्राणि एव धारयन्ती असीत्। केशपाशः तैलविरहितः असीत्। विवाहात् अनन्तरं यस्यां रात्रौ सा कुट्टानस्य शय्यायाम् अस्वपत्, तदा एव सा प्रथमतः धवलशाटिकाम् अधारयत्। ततः पश्चात् यस्मिन् दिने कुट्टानेन अवधिः विहिता, ततः अरभ्य प्रतिमासम् अमावस्यायां श्वेतवस्त्राणि धारयन्ती आगता। तेन विहितायाः अवधेः वर्षद्वयम् अतीतम्। एकवीरायाः कुट्टानस्य वचने प्रत्ययः लुप्तः। तस्याः मनः क्रमेण पूर्वं आत्मना अनुरक्ते यूनि परावर्तत् आसीत्। यदा यदा तस्याः मनसि तद्विषयकाः भावनाः समुत्पन्नाः तदा तदा सा धवलाम्बराणि अधारयत्। (*आन्ध्रेषु धनिनां स्त्रियः प्रतिदिनं एकैकम् आभरणसमुदायं धारयन्ति। अर्थात् सप्ताहे सप्तविधाः आभरणसमुदायाः धार्यन्ते। तान्येव सप्ताहाभरणानि इति

कथ्यन्ते।)

एकवीरा तस्य ग्रामं न अजानात्, नवा तस्य नाम। किम् अन्यत् अजानात् सा? चन्द्रसुकुमारं तस्य वदनम् अजानात्, तस्य दीर्घाम् आकृतिम् अजानात्, सूचीसदृशे तस्य नयने अजानात्, द्विरेफपक्षसङ्काशे तस्य श्मश्रुणी अजानात्, अग्रे द्विधा विभक्तं पृष्ठतः संग्रथितं तस्य केशपिञ्छम् अजानात्, आत्मनोः उभयोः मध्ये अच्छेद्यम् स्वच्छप्रेमबन्धं च अजानात्। श्वेतवस्त्रेषु धृतेषु, केशपाशे च निस्तैलीकृते, स्वस्याः सौन्दर्यम् अतिशेते इति सा सुष्ठु जानाति। विवाहात् अनन्तरम् एकवीरा तं युवानं विस्मृतवती। स्वमनसि तस्य स्थाने सा कुट्टानस्य वसतिं निर्मितवती। किन्तु कुट्टानः तस्यां वसतौ न स्थितवान्।

स्वनिर्मिते प्रेमसौधे कुट्टानेन अपावृतात् निर्दयाद्द्वारात् स्वस्याः पूर्वप्रणयी अन्तः प्रविष्टः इति तया न परिज्ञातम्। कुतः आत्मनः धवलवस्त्रेषु आसक्तिः प्रवृद्धा इत्यपि वा न ऊहितम्। तस्य मूर्तिः तस्याः नयनयोः अग्रे सदैव सन्निहिता आसीत्। तथा प्रत्यक्षीभूतां तस्य मूर्तिं वा, तस्याः निरन्तरं सन्निहितत्वं वा अधिकृत्य अपि न तर्कितम्। तस्य स्मृतिः सर्वलोकात् गोपायितं तस्याः धनम्। तत् धनम् अयथार्थं इति तया विदितमेव। तस्य यथार्थत्वसाधनं हि धर्मदूरम्। तस्मात् सा धर्मबद्धा सती तं धनं विसस्मार। धर्मयुक्तं नवं धनम् अभिलषितवती। किन्तु तत् नूतनं धनं तस्याः स्पर्शस्य अतिदूरे आसीत्। एतत् धनद्वयमपि तस्याः अयथार्थं जातम्। प्रथमं मधुरप्रेममयं, द्वितीयं धर्मप्रेममयम्। अत्मनः दूरगतयोः एतयोः धनयोः कतरत् स्वस्याः मनः आधातुं योग्यमिति तया न ज्ञातम्। अवहितचेतस्का सा द्वितीये मनः निदधाति, आत्मना अविदितमेव प्रथमं स्वयम् आगत्य मनः आवृणोति। तत् आवरणं किञ्चित् ज्ञायते, किञ्चित् न ज्ञायते च।

आत्मानं दृष्ट्वा मीनाक्षी किमर्थं चकिता इति चिन्तयित्वा एकवीरा – स्वस्याः सौन्दर्यं दृष्ट्वा सा सम्मुग्धा जाता इति आत्मानं समाहितवती। ततः ते द्वे अपि यथापूर्वं सम्भाषितुम् आरब्धवत्यौ। तत् चकितत्वं मीनाक्ष्या विस्मृतं, न तु एकवीरया। ते द्वे जातीलतानिकुञ्जस्य अधस्तात् एकवीरायाः प्रकोष्ठं गच्छन्त्यौ आस्ताम्। एका जातीकलिका एकवीरायाः उपरि अपतत्, एकं हरिवपत्रं मीनाक्ष्याः उपरि अपवत् च। तत् निकुञ्जं वर्षागमनं प्रतीक्षत् इव विरलानि

पुष्पाणि अवहत्। वर्षम् आह्वयन्ति इव पत्राणि अल्पवातेन चलन्ति। कुञ्जे अन्धकारः व्याप्तः।

नभसि प्रतीच्यां दिशि पङ्कवत् अभिव्याप्तं महान्तं कालमेघं दृष्ट्वा वर्षाशङ्कया शकटचोदकः शकटं दूरस्थां शकटशालाम् अनयत्। वृषभयोः शिरोदामनी शकटचक्रे बद्ध्वा तत्र सेतुपतीनां सारथीनाम् अपत्येषु अष्टवर्षप्रायया बालिकया सह भाषितुम् आरब्धवान्। तस्याः नाम अमृता।

बालिका – "का एषा आगता" ?

शकटचोदकः – "तत्रभवती स्थानापतेः पत्नी"।

सा बालिका स्वस्याः ऊरोः वस्त्रम् अपसार्य शणतन्तुभिः रज्जुं रचयन्ती आसीत्। तैलसंस्कारहीनानि ताम्रवर्णानि च तस्याः केशानि तस्याः मुखम् आवृण्वन्ति। रज्जुं रचयन्त्याः तस्याः ऊरुः व्रणितः अभवत्। अतः सा तत्र लालां विलिप्य, शाकटिकं विलोक्य, सः आत्मानं न पश्यति इति ज्ञात्वा पुनः रज्जुरचनाम् आरेभे। शीतः वायुः एकः तस्याः शिरसः उपरि – शुष्कस्य शरपुञ्जस्य उपरि इव यथेच्छं व्यजृम्भत। सः शीतः वायुः तस्याः नेत्रयोः प्रविष्टः, अश्रुबिन्दून् अकल्पयत्।

शकटचोदकः – "कुट्टान सेतुपति महाराजः कदा आगमिष्यति" ?

बालिका – "कः"?

शकटचोदकः – "स्वामी"।

बालिका– "स्वामी वा? (क्षणं तूष्णीं स्थित्वा) अहं न जानामि"।

विरला वृष्टिः आरभत। सा धारावर्षस्य प्रारम्भः इति शाकटिकः अमन्यत। बालिका उत्थाय पटलप्रान्ते स्थित्वा हस्तौ बहिः प्रसार्य वर्षबन्दुक्लिन्नाभ्यां ताभ्या स्वस्याः मुखं विलिलेप, शकटचोदकं दृष्ट्वा अहसत् च। आपणात् वस्तूनि आनयन् कश्चित् सेवकः क्लेदभीत्या सत्वरं गच्छति। शीकरपातः क्रमेण उपचितः। अश्वशालायां बद्धाः तुरगाः भूमौ पत्रेषु च पततां वर्षबिन्दूनां शब्देन विस्फारितनेत्राः परावृत्य अपश्यन्। एकः अश्वः हेषारवम् अकरोत्। तम्

अनुसृत्य सर्वे अपि वाजिनः हेषाम् अकुर्वन्। बहिः स्थितानि क्लेदासहिष्णूनि वस्तूनि परिचारिकाः अन्तः नयन्ति।

यावत् ते द्वे अन्तः अगच्छताम् एकवीरायाः राङ्कवस्य प्रान्तः क्लिन्नः जातः। ते प्रकोष्ठे दुकूलास्तृते पर्यङ्के न्यषीदताम्। तावत् एका परिचारिका आगत्य एकवीरायाः राङ्कवं गृहीत्वा क्लेदापनयनार्थं वायुपाते प्रासारयत्। यावता अन्या अपरं राङ्कवम् आनयति तावता मीनाक्षी पुनः चकिता अजायत। कुत्र वा एकवीरा आत्मना पूर्वं दृष्टा इति विनिश्चेतुं सा न अशक्नोत्। मीनाक्ष्याः तत् चकितत्वम् एकवीरया अवगतं, किन्तु तस्य हेतुः तया अन्यत्वेन ऊहितः।

मीनाक्ष्याः गार्हस्थ्यवृत्तान्तः एकवीरायाः अविदितः। एकवीरायाः वृत्तान्तः तु मीनाक्ष्या ज्ञायते। तया ज्ञायते इति एकवीरायाः न विदितमासीत्। एकवीरायाः मते-आत्मनोः प्रेमवृत्तान्तयोः परस्परम् अवेद्यत्वात् गूढत्वात् च उभयोः गौरवं समानं, प्रतिपत्तिः च तुल्या इति। मीनाक्षी पत्यौ गाढम् अनुरक्ता स्यात्। नो चेत् कथं सा इत्थम् उत्साहवती भवेत् इति सम्भावना च। मीनाक्ष्याः अभिप्राये – एकवीरायाः रहस्यम् आत्मना ज्ञातम् इत्यतः तयोः प्रतिपत्तिः न समाना। तेन एव कारणेन तस्यां कापि अवज्ञा। किन्तु तस्याम् अवज्ञायां अगौरवम् ईषदपि नास्ति। एकवीरायाः रहस्यं ज्ञातवत्याः मीनाक्ष्याः तस्यां नैसर्गिकी मैत्री जाता। तत् अजानन्त्या एकवीरया तस्याः मैत्र्याः हेतुः न अवगतः।

प्रायः अन्याभिः सह समागमे जाते, स्त्रियः स्वकीयं भोगजातं ताभ्यः प्रदर्शयितुम् इच्छन्ति। गृहारामादीनि, शयनप्रकोष्ठम् आभरणजातं च इतराभ्यः प्रदर्श्य, ततः तासां मनस्सु उन्नतं स्थानं प्राप्तुम् इच्छा स्त्रीणां स्वभावजा। तस्याः गृहिण्याः पत्युः च आनुकूल्यादिकं ज्ञातुम् इच्छा इतरस्त्रीणामपि नैसर्गिकी। यद्यपि एकवीरामीनाक्ष्यौ बहुवारं परस्परं समागते, तथापि मीनाक्षी एकवीरां तद्विषये किमपि न अपृच्छत्। एकवीरायाः मनसि सन्देहः यत् – आत्मनोः अनानुकूल्यं स्थानापतिः जानाति इति पुरा कुट्टानः अवदत्। सः स्थानापतिः तं भार्यायै कथितवान् स्यात्। तस्याः मनसि इदम् एकं कष्टशल्यम्।

तस्मिन् दिने एकवीरा मीनाक्ष्यै स्वं गृहं सर्वम् अपि प्रादर्शयत्। तन्महासौधस्य वैशाल्यं, तत्रस्थं शिल्पम् ऐश्वर्यं च दृष्ट्वा मीनाक्षी अद्भुताविष्टहृदया जाता। अन्ततः एकवीरा तां शयनमन्दिरम् अनयत्। उन्नतं तं पर्यङ्कं, तद्गतां

शिल्पशेभां, भित्तिषु विन्यस्ताः देवतामूर्तीः च पश्यन्त्याः मीनाक्ष्याः सः प्रकोष्ठः स्वर्गः इव अभासत। उभे सोपानपंक्त्या कुट्टानस्य शय्यामधिरुह्य तस्याम् आसीने अभवताम्। बहिः जातीनिकुञ्जे पतन्तः वर्षबिन्दवः पट-पट शब्दं कुर्वन्ति स्म। शीतः वायुः गवाक्षात् सशब्दं प्रकोष्ठस्य अन्तः प्राविशत्। उभयोः राङ्कवौ स्रस्तौ। किन्तु उभे अपि तौ यथास्थानं प्रापयितुं न अयतेताम्। मीनाक्ष्याः मनसि कापि वर्षाकालनीलाभीलशर्वरीमध्यवेलायां गगनपरिव्याप्तकालमेघगर्भभेदिनी सौदामनी प्रास्फुरत्, पुनश्च अन्धकारः व्याप्नोत्। परिक्षालिता अपि कापि पापवाञ्छास्मृतिः तस्याः चेतसि समागता। अन्तः अनुभूयमानेन माधुर्येण धर्मभीतिः परास्ता अभवत्। एकवीरायाः उत्तरीयं तस्याः वक्षसः स्रस्तं, नेत्रे च अर्धनिमीलिते। बहिः कुम्भवृष्टिः पतति। सेतोः अधः जलप्रणालीं पूरयन् कूलङ्कषः जलप्रवाह इव पुनः वेगवान् वायुः प्रकोष्ठम् अपूरयत्। शय्यायां आस्तीर्णः प्रच्छदपटः उत्थाय तयोः उपरि अपतत्। तं शीतसमीरणं सोढुम् अशक्ता एकवीरा स्वं राङ्कवं परिधाय तस्य अन्तः देहं संङ्कोचयामास। तेन शीतमारुतेन पुलकितगात्रा मीनाक्षी आत्मनः चोलकग्रन्थिं विस्रंसयित्वा, ततः वक्षसि पतितेषु वर्षशीकरेषु बाहू प्रसार्य, तं वायुम् आलिङ्गन्ती इव कराभ्यां हृदयं उपगूढवती।

किञ्चिदनन्तरं वृष्टिः व्यरमत। शकटचोदकः शकटम् आनीतवान्। मीनाक्षी बहिः आगत्य तम् आरुढवती, सः च प्रातिष्ठत्। मीनाक्ष्याः नेत्रे एकवीरायाः लोचनाभ्यां समागते। तदेव तस्याः आमन्त्रणम्। अत्र आगमनात् आरभ्य तस्याः प्रस्थानपर्यन्तं ताभ्याम् एकः अपि शब्दः न भाषितः। तत् एकवीरायाः आश्चर्यम् अजनयत्। सेतुपतीनां गृहान् अतिक्रम्य गच्छन्ती मीनाक्षी आत्मानं कस्मादपि कारागारात् बहिः गच्छन्तीम् इव सम्भावयन्ती दीर्घम् उच्छ्वासम् अगृह्णात्। वर्षपातेन रथ्या पङ्किला जाता। राजमार्गस्य पार्श्वयोः जलं पल्वलीभूतम् अतिष्ठत्। इयती वृष्टिः पतिता इति मीनाक्ष्या नैव ज्ञातम्।

वर्षर्तुः सकलमुखैः व्यजृम्भत। गगनकूटस्य सीमासु राशीभूताः शम्पालताः वियति रुचिराः लेखाः व्यलिखन्। जलधराः सर्वतः व्याप्य चतुर्षु अपि दिक्षु अगर्जन्। विहायसि दूरात् श्रूयमणः रिव्विति शब्दः आबद्धपंक्तीनां बलाकानां पक्षैः कृतः वा, सत्वरम् आगच्छता वर्षेण जातः वा इति न ज्ञायते। भूतोच्चाटकेन प्रसभं समाहूता कापि शक्तिः वायुवीथिकाः छित्वा आगच्छन्ती

इव, चण्डवेगाः वायवः महाध्वानेन विजृम्भन्तः इव, नीरवे निशीथे महावातसंक्षोभितस्य जलधेः घोषः श्रवणपथम् आगतः इव च दूरात् श्रूयमाणेन वर्षाध्वनिना जनाः परावृत्य पश्यन्ति। करकाः अन्वेषयन्तः बालकाः नीरसां करकाम् एकां चोषयन्तः, तदाघातकृता बाधां विस्मरन्ति। तत्र तत्र पल्वलीभूते वर्षाजले शारिकामिथुनानि कीचु कीचु स्वनैः पक्षौ क्लेदयन्ति।

शिशिरचन्द्रज्योत्स्ना कलहान्तरिता इव जलदान्तर्निगूढबाष्पा विमुखा अभवत्। केतकीगर्भेषु संभृतेन जलेन तासु खण्डितायाः साश्रुसितापाङ्गभ्रान्तिः अजायत। राजहंसी भीता प्रोषितभर्तृका इव कमलपत्रच्छत्रतले अलीयत। मयूरः स्वाधीनपतिका इव नृत्याभिराममूर्तिः आसीत्। भम्भरे मन्दारपुष्पं कथमपि परित्यज्य आगच्छति, करवीरकुसुमकन्या ईर्ष्याकषायिता अभवत्। कदम्बः वासकसज्जिका इव सालङ्कारः मेघनाथं स्वागतीचकार। बलाकापाङ्गा मेघनीलपटावृता च आकाशलक्ष्मीः कालपुरुषम् अभिससार। कृशीभूतविप्रलब्धादेहयष्टिसदृशेषु पूगीकाण्डेषु पर्णाभ्यन्तरात् जलबिन्दवः अश्रुबिन्दवः इव न्यपतन्। इत्थं वर्षाश्रीः सर्वरसाकृतिः इव मोहनातिमोहना अदृश्यत।

क्षेत्रे हलं कर्षन् कृषकबलीवर्दः मुहुर्मुहुः शिरः चालयित्वा मुखे पतितं वर्षोदकं धुनोति। पृथुना वर्षबिन्दुना लोष्ठेन इव शिरसि ताडिताः कृष्णसर्पाः पार्श्वतः वायुकबलं सन्दश्य, हल्यक्षेत्रेभ्यः क्षेत्रावृतिगुल्मेषु स्थितान् वल्मीकान् प्रति असर्पन्। शैवालमयात् क्षेत्रवापीजलात् बहिः आगत्य पथः पार्श्वे संस्थिताः अधस्तलपाषाणाः इव दृश्यमानाः मण्डूकाः – शबरीवेषधारिण्या वर्षालक्ष्म्या पादयोः धृतस्य क्षुद्रशङ्खमञ्जीरयुगलस्य स्वनः इव रात्रिन्दिवं न्यनदन्। विरते अपि वर्षे अधः पङ्किलत्वेन, उपरि पतङ्गिकानां प्रचलनेन, वायुप्रसारस्य अभावेन च सायं समयेषु कृषिकाः आकुलिताः अजायन्त।

तस्मिन् वर्षे श्रावणमासस्य शुक्लपक्षे एव वृष्टिः व्यजृम्भत। उदतन सेतुपतिः कालय्यार् कोयिल् प्रदेशे दुर्गम् एकं निर्माय तस्य रक्षायै कतिपयं सैन्यं तत्र स्थापितवान्। उदतनसेतुपतेः अकस्मात् राजधानीप्रस्थानेन, कुट्टान सेतुपतेः आगमनेन च राज्ञः व्याधिम् अधिकृत्य किंवदन्त्यः व्याप्नुवन्। ततः तस्यः मृतेः वार्ता अपि सर्वत्र व्यात्पा आसीत्। कुट्टानः युवा आसीत् इत्यतः, तस्य प्रतापम् अजानतां तत्रत्यचोरबृन्दानां तस्य विषये भीतिः न अजायत। एकः पोर्चुगीसदेशीयः इतस्ततः विकीर्णान् चोरगणात् एकीकृत्य एकस्यां निशि अकस्मात् दुर्गं अभिद्रुतवान्। दुर्गस्य अन्तः द्विशतपरिमितं सैन्यम् एव आसीत्। ते एव दुर्गद्वाराणि पिधाय प्रतियेद्धुं आरभन्त। द्विशतसंख्याकाः मथुराराजसैनिकाः निरायुधाः सन्तः, दुर्गस्य बहिः एव अतिष्ठन्।

एषा वार्ता परस्मिन् दिने कुट्टानेन अज्ञायत। तावता दुर्गं चोरैः वशीकृतमेव स्यात् इति वार्ताहराः अवदन्। तत् श्रुत्वा कुट्टानः किमपि न अवोचत्। ते तं तद्विषये किमपि प्रतिकर्तुं पुनः पुनः अर्थितवन्तः। किन्तु सः तदा रामनाथं त्यक्तुम् आत्मनः न उचितम् इति, तस्मिन् प्रदेशे त्यक्ते तत्रापि विप्लवाः भवेयुः इति च तान् समाधाय अयापत्। एषा वार्ता रामनाथे सर्वत्र व्याप्नोत्। ते वार्ताहराः कालय्यार् कोयिल् प्रदेशं प्रतिप्रेषिताः। किन्तु रामनाथे पट्टमङ्गले च दुर्गे युद्धाय सज्जीक्रियेते। राजसैनिकाः सर्वे आयुधान् शातयन्तः, दुर्गं साधनैः पूरयन्तः च युद्धाय सन्नद्धाः अदृश्यन्त।

सर्वे कालय्यार कोयिल् दुर्गं शत्रूणां हस्तगतम् इत्येव अमन्यन्त। अन्तः स्थिताः सैनिकाः निराशाः जाताः। तेषु कतिचित् – दुर्गं शत्रूणां वशं नेतव्यमिति, अन्ये न इति च व्यवदन्। दुर्गस्य बहिः चतुश्शतसंख्याकाः प्रजाः आसन्। तेषां हस्तेषु खड्गादीनि आयुधानि, बन्धूकानि च अविद्यन्त, किन्तु अश्वाः गजाः प्रासाः च न आसन्।

तृतीयदिवसस्य सायंकाले अभिसम्पातः आरभत। जनाः गोपुरद्वारि सङ्गताः दुर्गकवाटं भेत्तुम् अयतन्त। तेषु एकः युवा अतीव उत्साहं प्रदर्शयन् आसीत्। सः सद्यः एव सर्वेषां हृदयाणि आकृष्टवान्। जनाः कवाटं खनित्रैः विदार्य वा, द्विशतजनैः धृतैः बृहद्दारुभिः प्रणुद्य वा भेत्तुम् अयतन्त। यदा ते सर्वे विफलयत्नाः अभूवन्, तदा सः युवा उपायम् एकम् अपश्यत्। गोपुरद्वारस्य

अधः खनित्वा, तं गर्तं बन्धूकोपयुक्तेन स्फोटनचूर्णेन पूरयित्वा, तस्मिन् अग्निः अर्पणीयः इति। सर्वे सन्तुष्टाः तं श्लाघितवन्तः। जनसमूहे ये पोर्चुगीस देशीयाः आसन् ते अपि तम् अस्तुवन्। दुर्गस्य अन्तः स्थिताः सैनिकाः एतम् उद्यमम् अजानन्। ते परस्परं वादप्रतिवादान् कृत्वा अन्ततः गोपुरद्वारम् उद्घाटयितुं निश्चित्य बहिः स्थितान् सैनिकान् अज्ञापयन्। सर्वत्र उच्चैः जयघोषः प्रावर्तत। किन्तु कवाटोद्घाटनात् पूर्वं बहिः स्थितैः जनैः केचन समयाः अङ्गीकर्तव्याः। दुर्गस्य अधिकारी हैन्दवः एव स्यात्। अन्तः स्थिताः सैनिकाः अपि इतरेषु ईदृशयुद्धेषु भागं ग्रहीष्यन्ति। ते तथा कर्तुम् अनुज्ञातव्याः। ईषद्विचारानन्तरं बहिः स्थितेषु योद्धृषु पोर्चुगीसदेशीयाः अपि एतत् अङ्गीचक्रुः।

कृशीभूते सन्ध्यारागे, जगति व्याप्नुवति तिमरे, गोपुरद्वारः उद्घाटितः अभवत्। अन्तःस्थाः सैनिकाः बहिःस्थाः जनाः च प्रथमं संशयाविष्टाः, तदनु स्मेराननाः, किञ्चित्कालानन्तरं स्नेहयुक्ताः च परस्परं समागतवन्तः। द्वौ अपि पक्षौ उल्मुकानां(बृहत्करदीपिकानां) प्रकाशे सभां आयोजयन्। दुर्गं कस्य वशे स्यात् इति, यदि राजसैन्यम् आगत्य दुर्गं निरुध्येत् तर्हि तत् कथं रक्षणीयम् इति च प्रश्नौ समुत्पन्नौ। दुर्गग्रहणसमये यः युवा सोत्साहः आसीत् सः अवदत् यत् – यदि कः अपि दुर्गस्य प्रभुत्वेन निर्णीयते तर्हि सः एव सकलं निर्वक्ष्यति। एतत् श्रुत्वा सर्वे सन्तुष्टाः जाताः। पोर्चुगीसदेशीयाः अन्येषां नायकत्वम् अङ्गीकर्तुं न ऐच्छन्। किन्तु ते केवलं त्रिंशत्संख्याकाः एव आसन्। अतः तैः जनाधिक्यस्य अभिप्रायः अवश्यम् अनुसर्तव्यः अभवत्। अन्ते सर्वे जनाः एककण्ठत्वेन तमेव युवानं दुर्गस्य प्रभुं निर्णीतवन्तः।

परेद्युः सः युवा परिखां सम्यक् सन्धाप्य तां जलेन पूरयामास। दुर्गस्य भित्तिषु शिथिलीभूतान् भागान् पुनः सुस्थान् अकारयत्। दुर्गग्रहणावसरे बहिः एव स्थितान् राजसैनिकान् आहूय तान् इतरैः सह समायोजितवान्। ग्रामीणेषु अपि सैन्ये पदं प्राप्तुम् इच्छतः जनान् आहूतवान्। द्विशतसंख्याकाः जनाः सोत्साहम् आगत्य सेनां समागतवन्तः। तदा सेना सहस्रसंख्याका जाता। ततः सः नायकः तान् सहस्रसैनिकान् दशसु भागेषु विभज्य, राजसेनायां युद्धकुशलान् नव वृद्धान्, आत्मानं च तेषां नेतृत्वेन निर्णीतवान्। त्रिंशत् संख्याकान् तान् पोर्चुगीसदेशीयान् एकस्मिन् भागे कृत्वा, परिशिष्टेषु ये ये सैनिकाः तस्मिन् भागे स्थितिं गौरवकारकं मन्यन्ते तान् सर्वानपि तस्मिन्

अयोजयत्। तस्य भागस्य सः एव नेतृत्वम् अवहत्।

ततः सः तान् अतीव श्लाघयित्वा, दुर्गस्य उपद्रवे आगते ते एव सहायाः भवेयुः इति उद्बोधितवान्। शिष्टेषु नवशतसैनिकेषु अष्टशतं जनान् दुर्गस्य एकैकस्यां दिशि द्विशतम् इति कृत्वा चतुर्षु अपि दिक्षु संस्थाप्य, अवशिष्टान् शतसंख्याकान् आत्मनः सहचरान् अकरोत्। यस्मिन् दले पोर्चुगीसदेशीयाः आसन् तस्मै सः किमपि कर्तव्यं न निर्दिष्टवान्। यदा दुर्गस्य महान् अपायः सङ्घटते, तदा एव ते कार्यं निर्विशेयुः इति अवदत्। ते अपि प्रमत्ताः यथेच्छं ग्रामे सञ्चरन्तः, दुर्गं प्रति गतागतानि कुर्वन्तः आसन्। द्वित्रिदिनानन्तरं सः तान् ग्रामगमनावसरे स्वस्वायुधान् दुर्गे एव त्यक्त्वा गन्तुम् आज्ञापितवान्। गतेषु द्वित्रिदिवसेषु मदिरापानमत्तैः, धृष्टैः च तैः कृतस्य दौर्जन्यस्य कारणेन नायकस्य एषा आज्ञा समुचिता एव अलक्ष्यत।

एकस्यां निशि सः पोर्चुगीससैन्यभागः दुर्गं न प्रत्यागतः। रात्रौ गोपुरद्वारः पिहितः। ते च सैनिकाः स्वायुधान् दुर्गे विसृज्य एव आगच्छन्। तस्यां रात्रौ नायकः पुनः सभाम् कृत्वा, प्रथमं तेषां दुर्गं प्रति अनिवर्तने दोषं निरूपितवान्। ततः सः ते सर्वे गर्वोद्धताः इति, पोर्चुगीसदेशीयाः न विश्वासार्हाः इति, तान् उद्दिश्य स्वेन कृता स्तुतिः अलीका इति, न ते इतरेभ्यः निपुणतराः इति च वदन् क्रमेण परिशिष्टसैन्यं तान् प्रति विमुखम् अकरोत्। दुर्गग्रहणावसरे ये ये नेतारः राजसैन्यस्य विरोधेन युद्धं कृतवन्तः तान् सर्वानपि नायकः तस्मिन्नेव दले निक्षिप्तवान्। तान् अधिकृत्य भाषमाणः सः – ते एव युद्धस्य प्रमुखतया कारणभूताः इति, पूर्वेद्युः राजसैन्यं विरुध्य युध्यन्तः ते अन्येद्युः अस्मान् विरुद्धय अपि चरेयुः इति अवोचत्। सभायाम् अधिकतराः तान् प्रति विमुखाः अजायन्त।

ततः तां सभां विसृज्य सः सैन्यविभागानां नेतृभिः अपरां सभाम् अकरोत्। ते नव नेतारः राज्ञः अत्यन्तं विश्वस्ताः इति तस्य विदितपूर्वमेव। अतः सः तान् सम्बुध्य एवम् अवदत् "अचिरात् उदयन सेतुपतिः प्रासान् आनेष्यति, दशसहस्रपरिमिताम् अपि वा सेनाम् आनेष्यति। राजसैन्यस्य अग्रे स्थातुं वयं न शक्ष्यामः। अतः अस्माभिः पोर्चुगीसानां साहाय्यं वा अङ्गीकर्तव्यं, नो चेत्, राज्ञः शरणमपि वा गन्तव्यम्। एवयोः कतरः मार्गः युष्माकं अभिमतः" ? ते

सर्वे परस्परं मुखानि व्यलोकयन्। नायकः पुनः अवोचत् "यूयं युष्माकं दलैः सह मन्त्रयित्वा, श्वः मे निवेदयत। अहं तु श्वः प्रभाते पेर्चुगीसदलेन सह किञ्चित् साहसं कर्तुं गमिष्यामि। परश्वः सायं प्रतिनिवर्तिष्ये। तावत् दुर्गमिदं वीरय्यप्प नायकस्य वशे भविष्यति"।

वीरय्यप्प नायकः आन्ध्रः, मथुरानायकानां विश्वासपात्रः महायोद्धा, पञ्चाशदधिकवयस्कः च। इत्थं चोराणां वशङ्गते दुर्गे सः महान्तं परितापम् अनुभवति।

परेद्युः प्रातः पोर्चुगीससेनाभागः दुर्गं प्राविशत्। सद्यः एव नायकस्य आज्ञया सायुधः भूत्वा तस्य नेतृत्वे अश्वान् अधिरुह्य दुर्गात् प्रातिष्ठत्। तेषां पृष्ठतः उच्चैः ध्वनिना गोपुरद्वारः पिहितः अभवत्। सः नायकः ऊनत्रिंशद्वार्षिकः, श्यामलशरीरः, ईषदिव ह्रस्वः च। तस्य नेत्रे आयते, श्मश्रुणी द्विरेफपक्षवत् असिते, गात्रम् आयसस्तम्भोपमं च। तस्य सेनानायकत्वम्, अश्वं चालयतः तस्य कौशलं च दृष्ट्वा दुर्गप्राकारेषु स्थिता, तम् अनुसरन्ती च इत्येतत् सेनाद्वयं तद्विषये भयं भक्तिं च अवहत्।

ते दिनस्य यामद्वयपर्यन्तं धनुर्विमुक्ताः शराः इव जवेन अगच्छन्। ततः नायकस्य आज्ञया कुत्रचित् कञ्चित्कालं विश्रम्य, स्वैः सह आनीतं आहारं अभुञ्जन्। पुनः तुरगान् आरुह्य अधिकतरेण वेगेन अगच्छन्। तस्मिन् दले स्थिताः तद्देशीयाः आत्मानः रामनाथं समभिगच्छन्ति इति ज्ञात्वा विस्मिताः अभूवन्। ते नायकस्य साहसं दृष्ट्वा आश्चर्यचकिताः आनन्दमग्नाः च आसन्। तस्मिन् आनन्दे स्वेषु नायकेन कृतं विश्वासं प्रति गर्वः अपि सम्मिलितः अभूत्। सूर्यास्तमयात् पूर्वमेव ते रामनाथं प्राप्नुवन्।

नायकः सैन्यं ग्रामस्य बहिः एव संस्थाप्य एवम् अवदत् "एषः रामनाथः। रामनाथदुर्गस्य प्रत्यङ्गुलं मया ज्ञायते। सम्प्रति अहं कञ्चित् महासाहसं कर्तुं सन्नद्धः अस्मि। यूयं सर्वे अपि रामनाथसैनिकानां वस्त्राणि धृतवन्तः। अतः यूयं दुर्गस्थैः अभिज्ञास्यन्ते इति भीतिः नास्ति। यदि वयम् अस्मिन् यत्ने सफलाः भवेम, तर्हि युष्माकं यशः सर्वासु दिक्षु व्याप्स्यति"। एवमुक्त्वा सः त्रिंशत्संख्याकान् पोर्चुगीससैनिकान् एकदलत्वेन विभज्य परिशिष्टान् सप्तदश सैनिकान् सप्तसंख्यापरिमितानि दशदलानि अकरोत्। तेषु त्रिंशत् जनान्

आत्मानम् अनुसर्तुं, चत्वारि दलानि दुर्गस्य चतसृष्वपि दिशासु रात्रेः द्वितीययामपर्यन्तम् आत्मानं प्रतीक्षितुं च आदिष्टवान्। यदा ते सर्वे व्यस्ताः स्वस्वसङ्केतस्थानान् अगच्छन्, सः षष्टिसैनिकपरिवृतः जवेन दुर्गाभिमुखं प्रातिष्ठत्। गोपुरद्वारः उद्घाटितः एव आसीत्। सः निर्निरोधं दुर्गं प्राविशत्। तेषां पृष्ठतः एव गोपुरद्वारः पिहितः अभवत्। नायकः शरवेगेन राजसौधम् अगच्छत्।

राजसौधस्य अग्रे विशाले बहिःप्रदेशे सहस्रम् आश्विकाः युद्धाभ्यासं कुर्वन्तः आसन्। नायकं दृष्ट्वा ते सर्वे प्रणताः अभूवन्। तत्सेनानायकः तुरगस्थः एव नायकम् अभिगम्य, प्रणम्य "स्वामिन्! का वा आज्ञा" ? इति अपृच्छत्। नायकः कृतस्मितः "सुन्दरेश्वरनायक! ते पोर्चुगीससैनिकानाम् अपेक्षा अस्ति चेत्, एतान् त्रिंशत् जनान् त्वं युष्मत्सेनायां परिगृहाण। शिष्टाः त्रिंशत् जनाः केवलं पदातिनः। न एते सम्यक् शिक्षिताः। एतान् पदातिदले ग्रहीतुं गोविन्दनाथं मद्वाक्येन ब्रूहि" इति अवोचत्। तम् अनुसृत्य आगतानां षष्टिजनानां मुखानि विवर्णानि अजायन्त। ते सर्वे अश्वान् अवरोढुं आदिष्टाः। अग्रे सहस्रम् आश्विकान् पश्यन्तः ते किं कुर्युः? सर्वे अश्वान् अवारोहन्। अन्यः अधिकारी तेषां नामानि अलिखत्। तस्यां रात्रौ दुर्गस्य चतुर्षु द्वारेषु प्रतीक्षां कुर्वन्तः चत्वारिंशत् सैनिकाः च नायकस्य दर्शनं प्राप्य राज्ञः सैनिकदलं समागच्छन्।

सर्वे ते अद्भुतया अनया वञ्चनया मुग्धाः, परवशाः, भीताः च अभवन्। केचन क्रुद्धाः अजायन्त, किन्तु सर्वतः सहस्रशः सैनिकान् पश्यतां तेषां क्रोधः उपरञ्जितेन वस्त्रेण रचितानां पुष्पाकृतीनां वर्णः इव सद्यः स्रस्तः अभवत्। केचित् तस्य नायकस्य याथार्थ्यं न अजानन्। तेषु एकस्य कश्चन राजसैनिकः परिचितः आसीत्। सः एकान्ते "कः अयं नायकः" ? इति तम् अपृच्छत्। राजसैनिकः विस्मितः "किं न वेत्सि? अयं कुट्टान सेतुपति महाराजः। उदयन सेतुपति महाराजस्य पुत्रः" इति अवोचत्। सः केनापि हृदयस्य अन्तः मुष्टिना आहतः इव निश्चेष्टः अजायत। ते शतं जनाः सकलायां अपि तस्यां रात्रौ स्वप्तुं न अशक्नुवन्। तैः साकं शतम् अन्ये जनाः अपि न अस्वपन्।

गतेषु त्रिचतुर्षु दिनेषु मेघाच्छन्ने गगने परेद्युः आतपः अलक्ष्यत। कालय्यार् कोयिल् दुर्गे स्थितानां चतुश्शतं राजसैनिकानां ये ये बन्धवः मित्राणि वा

रामनाथसैन्ये आसन् ते सर्वे द्विशतं जनाः एकैकशः चिताः अभूवन्। तैः परिवृतः कुट्टानसेतुपतिः तस्मिन् सायंकाले प्रस्थाय परेद्युः सायंकाले कालय्यार् कोयिल् दुर्गं प्राप्नोत्। द्विगुणीभूतेन सैन्येन आगते नायके द्वारः सहर्षम् उद्घाटितः अभवत्।

मित्राणि मित्राणि आलिङ्गन्। बन्धवः बन्धून् सस्नेहं कुशलम् अपृच्छन्। एते आगन्तुकाः रामनाथसैनिकाः इति नूतनसैन्ये चतुश्शताधिकाः जनाः जानन्ति। आश्चर्यकरः एषः संयोगः निगूढार्थवान् अजायत। अत्रान्तरे चत्वरे वाद्यमानाः घण्टिकाः – सकला अपि सेना समाविष्टा भवेत् इति असूचयन्। एकादशशतसंख्याकया सेनया नातिविशालस्य तस्य दुर्गस्य सन्निवेशः सङ्कुलितः अभवत्। नायकः तां सभां सम्बुध्य एवम् अवदत् "यूयं सर्वे मया सह आगतं रामनाथसैन्यं दृष्ट्वा विस्मिताः जाताः। यदि युष्माभिः ज्ञायते यत् – इतः गताः शतं सैनिकाः रामनाथसैन्ये पदम् अधिगम्य ह्यः एव मासिकभृतिम् आप्नुवन्, तर्हि यूयं विस्मिततराः भवेयुः।

भवतां संशयं निवारयितुम् अहम् एकां कथां कथयानि। उदयनसेतुपतेः कुट्टानसेतुपतिः नाम पुत्रः अस्ति। श्री मद्दुकृष्णप्प नायक महाराजस्य मरणसमये मथुरां गच्छन् उदयन सेतुपतिः कुट्टान सेतुपतिं रामनाथे अस्थापयत्। कालय्यार् कोयिल् दुर्गे संक्षोभः समत्पन्नः। कुट्टानः स्वयं विप्लवकारिषु एकः भूत्वा तेषां नेतृत्वम् अवहत्। विप्लवकारिणां तस्मिन् भक्तिः अजायत, तस्य च तेषु स्नेहः। अनेन अद्भुतसङ्घटनेन अभिसम्पातिनः सर्वे कुट्टानस्य द्वारेण मथुराराजसैनिकाः अभूवन्। तेषु प्रमुखाः शतं जनाः प्रथमं राजसैन्ये स्थानं अध्यगच्छन्। परिशिष्टाः अद्य अधिगमिष्यन्ति।" एवम् उक्त्वा सः क्षणं तूष्णीम् अभवत्।

रामनाथसैन्यम्, इतरे च केचित् "जयतु कुट्टान सेतुपति महाराजः" इति अघोषयन्। सः पुनः अवदत् "अत्रत्येभ्यः चतुश्शतं प्राक्तनसैनिकेभ्यः, रामनाथात् मया सह आगतेभ्यः द्विशतं सैनिकेभ्यः च वीरय्यप्प नायकः सद्यः एव भृतिं दास्यति"। षट् शतकण्ठेभ्यः उदितः जयघोषः अम्बरम् अस्पृशत्। वीरय्यप्प नायकेन उद्यते हस्ते कोलाहलः अशाम्यत्। नायकः पुनः जगाद "शिष्टान् पञ्चशतं जनान् अद्यप्रभृति महाराजस्य सेनायां गृह्णामः। तेभ्यः अपि

सद्यः एव मासिकभृतिः अग्रे दीयते। तेषाम् उपायनानि च अचिरात् एव मथुरायाः आगमिष्यन्ति" अप्रयत्नं शताधिकसहस्रं जनाः जयजयध्वानैः वायुवीथीनां सहजं शब्दगुणसामर्थ्यं अलोपयन्।

शान्ते सैन्यानां कोलाहले कुट्टान महाराजः नवभ्यः सेनानायकेभ्यः रत्नखचितमुष्टियुक्तान् करवालान् उपायनीकृतवान्। वीरय्यप्प नायकस्य आनन्दाश्रुप्लावितं मुखं सरोवीचिकाशीकराङ्कितं कमलमिव अलक्ष्यत। अन्ये च अष्टौ नायकाः नयनेषु आश्चर्यं, ओष्ठेषु स्फुरणं, हृदयेषु भीतिं, शरीरेषु विनयं, शिरस्सु कृतज्ञतानम्रत्वं च अवहन्। तत्रैव निषण्णेषु सैनिकेषु, सर्वेभ्यः धनम् अदीयत। प्रातःकालं यावत् सा सेना सर्वा स्वप्तुम् अवकाशं न प्राप्नोत्। ततः ईषन्निद्रा, तस्यां सुखस्वप्नः च। तस्मिन् दिने कुम्भवृष्टिः अपतत्। परिखा समुद्रः इव वीचिक्षोभयुक्ता आसीत्।

दिनचतुष्टयानन्तरं कुट्टानः रामनाथं प्रत्यगच्छत्। आत्मना सह रामनाथात् आगतेषु सेनिकेषु पञ्चाशत् जनान्, दुर्गग्रहणसमये प्रमत्तान् द्विशतं सैनिकान्, नूत्नसैनिकेषु त्रिशतं जनान्, अवरोधनवेलायां दुर्गं शत्रुसात्कर्तुं उद्यतान् पञ्चाशदधिकाशतं जनान्, आहृत्य सप्तशतं जनान् अष्टौ नायकान् च रामनाथम् अनयत्। चतुश्शतं कालय्यार् कोयिल् सैनिकाः वीरय्यप्प नायकस्य अधिकारे आसन्। सः प्रस्थास्यन्तं कुट्टानम् उद्दिश्य "नायक! आमन्त्रये" इति अवदत्। कुट्टानः सस्मितम् उवाच "अद्यप्रभृति भवानेव नायकः"।

20

उदयन सेतुपतिः मथुरायां पट्टाभिषेकमहोत्सवेषु समाप्तेषु भाद्रपदशुद्धप्रतिपदि प्रस्थाय पञ्चम्यां रामनाथं प्राप्स्यामि इति पुत्रं सन्दिष्टवान्। कुट्टानः कालय्यार् कोयिल् दुर्गे वृत्तं शासनोल्लङ्घनम् अधिकृत्य पित्रे वार्तां प्रैषयत्। सेतुपतिः तं वृत्तान्तं राज्ञे न्यवेदयत्। राजा च तं प्रतिनिवृत्य गन्तुं त्वरयामास। तिरुमल नायकः तु "तत्र कुट्टानः वर्तते खलु। तद्विषये विचारः मास्तु" इति उक्त्वा, सेतुपतिः पट्टाभिषेकोत्सवानां परिसमाप्तेः अनन्तरमेव गच्छेत् इति निर्णीतवान्। उदयन सेतुपतिः तु गन्तुं त्वरमाणः आसीत्। यथा सः पूर्वं वृद्धस्य राज्ञः आज्ञाम् अतिक्रमितुं न अशकत्, तथैव सम्प्रति तिरुमल नायकस्य अपि वचनम् उल्लङ्घितुं न अपारयत्। एतत् अवगत्य सः विस्मितः अभूत्। ततः

आरभ्य सः यदा यदा तिरुमल नायकेन समागतः तदा तदा तम् आपादमस्तकं सविमर्शं ईक्षमाणः आसीत्।

सा श्रावणबहुलदशमी। धारासम्पातः प्रवर्तते। कुट्टानः रामनाथे राजसौधस्य उपरिभूमिकायां निषण्णः। कालय्यार् कोयिल् दुर्गस्य विजयेन तस्य मनः महानन्दमग्नम् अभूत्। किन्तु तस्य मनसि एकः सन्देहः अपि आसीत्। नूत्नतया पञ्चशतं सैनिकान् ग्रहीतुं तस्य कः अधिकारः अस्तिः ? तस्य पिता कुप्येत्। यदि आत्मा तान् सैनिकान् न गृह्णीयात्, तर्हि पुनः देशे उपद्रवाः भवेयुः इति सः अचिन्तयत्। असन्तुष्टानां पञ्चशताधिकजनानाम् अग्रहणं महत्याः शत्रुसेनायाः उत्थापनेत तुल्यं स्यात्। तथा करणेन तेषां मनस्सु अत्मना कृतायाः वञ्चनायाः प्रत्यपकृतिचिकीर्षायाः बीजावापः भवेत्। अतः सैन्ये तेषां ग्रहणम् अत्यावश्यकम् अभवत्।

सर्वं तं वृत्तं विवृण्वन् कुट्टानः लेखम् एकं विलिख्य, पितरं राजानं च प्रति प्रैषयत्। यदि राजा इमं नूतनं सैन्यं न अङ्गीकुर्यात् तर्हि किं करणीयम्? दूरे विहायसि विद्युल्लता व्यद्योतत। कुट्टानस्य अक्ष्णोः पुरतः एकवीरा साक्षादभूत्। प्रतिरोधापसारणेन क्षेत्रस्य अन्तः प्रवहत् कुल्याजलमिव तस्य मनः वेगेन प्रावहत्। एकवीरया सह आनुकूल्यविरहितं स्वस्य जीवनं, मीनाक्षीवीरभूपत्योः विवाहः, स्वस्य मनःपरिवर्तनं, स्वस्य मनसि एकवीरया धृतं प्रणयमयं रूपं, सम्प्रति तस्याः दर्शने अपि प्रतिबन्धान् कल्पयन्ति राजकार्याणि – सर्वे एते विचाराः एकस्मात् उत्तिष्ठन् अपरत्वेन तम् आवृण्वन्।

गते वर्षद्वये स्वस्य श्वशुरः पुत्रीं द्रष्टुं न आगतः। आत्मनः श्वशुरस्य च पूर्वं न कः अपि सम्बन्धः आसीत्। सः एतं सैन्यं स्वीकुर्यात् वा ! सः अतीव युद्धनिपुणः।

यदा एकवीरा धौतकेशा, श्वेतवस्त्रधारिणी प्रथमतया स्वस्य शयने असुप्यत – सा स्वविवाहस्य मासत्रयानन्तरं संवृत्ता घटना तस्य स्मृतिगोचरा अभवत्। झडिति एका सौदामनी अस्फरत्। सा कुट्टानस्य धवलाम्बरधारिणी एकवीरा इव अलक्ष्यत। यतः सा आत्मनः पत्नी, यतश्च तस्याः ग्रहणे आत्मनः वैमुख्यम् एव प्रतिबन्धकम् आसीत् – कुट्टानः मनसि एकवीरां निस्संशयम् आलिङ्गितवान्। तस्याः भुजौ, कण्ठं, नेत्रे च गाढं पर्यचम्बत्। सा रहोविस्त्रब्धा तस्य वक्षसि विश्रान्ता। तदा अश्वपालकस्य पुत्री अमृता गूढं गवाक्षात् तौ

अपश्यत्....कुट्टानः अहसत्।

पुनः सैन्यस्य विचारः मनः प्राविशत्। पिता कुपितः अभवत्। श्वशुरः तस्य पालने अक्षमतां प्रकटितवान्। आत्मा स्वयं तं सैन्यं पोषयन् आसीत्....

तत्रान्तरे वीरभूपतिः स्मृतिपथमागतः। मीनाक्षीवीरभूपती सुखं जीवतः। आत्मा पुनः भोक्तुं तयोः गृहम् अगच्छत्। मीनाक्षी गर्भिणी वर्तते। आत्मा तस्यै बहूनि उपायनानि दत्तवान्....

पुनः अपरः ऊहः। आत्मा एकवीरा च तस्याः पितुः गृहम् अगच्छताम्। तत्र आत्मा भूलोकस्वर्गसुखानि अनुभवन् आस्ते। स्वपत्नी मुग्धमनोहरापाङ्गैः नूत्नविलासैः च आत्मानं प्लावयति....

महानसात् आगतः एकः असितः मार्जारः शीतार्तः रत्नकम्बलस्य उपरि सङ्कुचितशरीरः स्वपन् केनापि हेतुना नेत्रे उन्मील्य मन्दं "म्याव्" इति शब्दम् अकरोत्।

कुट्टानः विक्षिप्तचित्तः तमपश्यत्। पुनः ध्यानमग्नः अभवत्।

पिता आत्मानं सैन्यं परित्यक्तुम् आदिशत्। आत्मा न अङ्गीकृतवान्। द्वयोः मध्ये विवादः समुत्पन्नः। समस्तं सैन्यम् आत्मनः पक्षे अतिष्ठत्, वृद्धसेनापतयः तु पितुः पक्षे आसन्। तिरुमल नायकः दूरे स्थित्वा पश्यन् आस्ते।

पुनः अन्यः विचारः। मीनाक्षीवीरभूपत्योः मध्ये आनुकूल्यं नास्ति। मीनाक्षी न आत्मनः पत्नी जाता, न वा वीरभूपतेः प्रिया। मीनाक्ष्याः मनोवेदनायाः कारणेन आत्मा शापग्रस्तः अजायत। आत्मनः भार्यायाः च आनुकूल्यं नास्ति। एकवीरा अपि आत्मा इव पूर्वं कस्मिन् अपि अनुरक्ता आसीत्। तेन हेतुना तस्याः आत्मनि प्रीतिः नास्ति।

मीनाक्षीवीरभूपती, आत्मा-भार्या, नूत्नं सैन्यं-पिता, राजा-तिरुमल नायकः, स्वमातुलस्य ग्रामः च कुट्टानस्य मनसि सपदि चक्रभ्रान्तिमापद्यन्त। वर्षः व्यरमत्, सन्ध्या आसन्ना, चत्वरात् घण्टाध्वनिः अश्रूयत।

* * * * *

तस्मिन्नेव दिने मथुरायां अपि कुम्भवृष्टिः अपतत्। एकवीरा शयनकक्ष्यायां द्वारवत् प्रोन्नतात् गवाक्षात् दृश्यमानं जातीलतामण्डपं पश्यन्ती भर्तुः उन्नते तल्पे न्यषीदत्। वर्षबिन्दवः जातीपत्राणाम् अन्तेषु जातीपुष्पेषु च स्थित्वा, मुक्ताफलानि इव व्यलसन्। तथा स्थितम् एकैकं मुक्ताफलं नूत्नेन जलबिन्दुना नुन्नं सत् अधः पतति, तत्स्थाने नूत्नः तिष्ठति। धारासम्पातस्य कारणात् भ्रमराः पुष्पेपु स्थातुम् अवकाशं अलभन्तः वृष्टिसंछन्नाः लतामण्डपस्य उपरि एव परिभ्रमन्ति। शीता एका वायुवीचिका एकवीरां परामृशत्। तस्याः नेत्रे अर्धनिमीलिते अभवताम्। उपरिवस्त्रम् अचलत्, अलकाश्च अकम्पन्त। झटिति तस्याः त्वगिन्द्रियस्य उपरि एकं क्लिन्नवस्त्रम् आस्तृतं सत् सपदि अपनीतमिव अभासत। किन्तु सा न अचलत्।

वर्षधाराः अविरलाः अजायन्त। जातीलतामण्डपे वृष्टिपातेन क्रमेण उच्चैः शब्दः उदपद्यत। जातीपत्रान्तेभ्यः वर्षधाराणां निरन्तरपतनमेव दृश्यते न तु जलबिन्दूनां क्षणकालमपि तत्र स्थितिः। द्विरेफाः लतामण्डपस्य उपरि स्थातुम् अशक्ताः, तस्य अधः अगच्छन्। पुनः अपरः वायुतरङ्गः एकवीरां बलात् अवीजयत्। तस्य वेगेन जातीलतामण्डपः अकम्पत। एकवीरायाः केशपाशः वीतबन्धनः तस्याः भुजयोः अपतत्। उपरिवस्त्रम् अस्रंसत। सा नेत्रे निमीलितवती। तस्याः त्वगिन्द्रियं रक्तप्रवाहदघ्नं वायोः शैत्यम् अमात्। सः च वायुः पुनः पुनः तामेव परामृशत्। सापि यदा यदा वायुः अवहत् तदा तदा तस्य शैत्यम् अमायत।

वृष्टिः ततः अपि निरन्तरा अभवत्। लतामण्डपे वर्षधाराणाम् अविरलः पातः एव श्रूयते, पततां बिन्दूना मध्ये कापि पौर्वापर्यकृता व्यवस्था न ज्ञायते। जाज्वल्यमानस्य उल्मुकस्य घूर्णनेन – यथा तस्मिन् अग्नेः वलयाकृतिः एव परिदृश्यते न तु घूर्णनं, तथा क्लिन्नत्वात् मन्दीभूतनादा भेरी यदि तनुना यष्टिना निरन्तरं वाद्यते तर्हि तस्याः आदिमध्यान्तरहितः एकाकारः निरन्तरः ध्वनिः एव निष्पद्यते। तादृशः निरन्तरायः ध्वनिः तस्मिन् वर्षाहते लतामण्डपे निष्पद्यते स्म। वृष्टेः वेगेन लतामण्डपः कम्पमानः आसीत्। वर्षध्वनिं विना अन्यः न कः अपि ध्वनिः श्रूयते। पुनः अपरः वायुतरङ्गः बलवत् अताडयत्।

लतामण्डपः सौधभित्तिम् आश्रित्य अवनतः अभवत्। तल्पे अस्तीर्णः मच्चिलीपट्टण-लेखनीकलाकृतिमान् प्रावारकः विधूतः सन् दशासु सम्पुटीभूतः अभवत्।

एकवीरायाः मुक्तः केशपाशः तस्याः मुखे वक्षसि भुजयोः च व्याप्य, प्रवाहवेगेन विधूतः शैवालसङ्घातः इव आकुलीभूतः अजायत। एकवीरा – स्वस्य अक्षिपुटे तयोः मांशपेशी च एकीभूय, नयनयोः उपरि यथा संग्रथिताः भवेयुः, तथा दृढं नेत्रे निमीलितवती। निष्कञ्चुकं तस्याः वक्षः धावता वनवराहेन विदीर्णः वेणुनिकुञ्जः इव सोर्ध्वाधोभागम् अकम्पत। तस्याः त्वगिन्द्रियस्य स्पर्शगुणव्याप्तिः चर्म, तदन्तःस्थं कवोष्णं रक्तप्रवाहं च अतीत्य, अस्थीनि अस्पृशत् इति अचिन्तयत् सा। तास्याः बाह्यविषयकं ज्ञानम् अपगतम्। तत्रान्तरे वायुना सह शीताः वर्षबिन्दवः अपि अन्तः प्रविश्य, झञ्झावातारम्भे समुद्रतीरे स्थितस्य जनस्य उपरि आपतन्त्यः सागरोर्मयः इव ताम् अताडयन्। तेन तस्याः पञ्चेन्द्रियाणि स्पर्शगुणत्वमेव आन्पुवन्।

किञ्चित्कालानन्तरं सा कुम्भवृष्टिः शीकरपातत्वेन परिणतः अभवत्। तावता एकवीरा प्रकृतिमागता आत्मानं समवालोकयत्। केशपाशः मुक्तः, वक्षः च दिगम्बरम्! वर्षः विरतः। अल्पः मारुतः च वातुम् आरभत। जातीलतामण्डपस्य पत्राणि पुष्पाणि च वर्षबिन्दूनां भारेण मन्दं चलन्ति। एकवीरा पार्श्वतः अपश्यत्। अश्वपालकस्य दुहिता अमृता आयते तस्याः नेत्रे विस्फार्य तदेकदृष्टिः तामेव पश्यन्ती आसीत्। एकवीरा अत्यर्थं लज्जिता अभूत्। त्वरया केशानि संयम्य, वक्षः राङ्कवेन आवृत्य पुनः तस्याः दिशि आलोकयत्। अमृता तत्र न आसीत्।एकवीरा भीता अभवत्। किमर्थं सा बालिका आत्मानं तथा अपश्यत् ? यदि सा पुनः दृष्टा भवेत्, तर्हि तां तर्जयितुं निश्चित्य एकवीरा पुनः किमपि चिन्तयितुम् आरभत।

बाल्यात् प्रभृति एकवीरा वर्षासु तन्मयत्वं भजति स्म। शैशवे वृष्टौ अवकाशे भ्रमन्ती पित्रा ताडिता अभवत्। कौमारे महामूल्याः शाटिकाः वर्षे क्लेदयित्वा मात्रा निर्भत्सिता आसीत्। एकदा आसारे बहिः स्थित्वा तथैव निश्चेतना अजायत। पूर्वं सा वर्षपातेन शीतवातेन च केवलं परवशा एव अजायत। गते वर्षद्वये तस्यां नूत्नः एकः परिणामः आगतः। मारुतः तस्यै आत्मनः शीततां

मित्वा कथयितुम् आरभत। तस्याः गात्रं क्रमशः वायोः शैत्यस्य वा उष्णतायाः वा परिमाणस्य मापकं विचित्रं यन्त्रम् इव परिणतम्। कस्तूरीलेपः, चन्दनलेपः, कर्पूरचूर्णं, उशीरव्यजनात् आगच्छन् वायुः, मलयानिलः– एतेषां प्रत्येकस्य स्वर्शसुखानुभवं सा सम्यक् विवेक्तुं अशकत्। तेषां शैत्यस्य गूढत्वं, अगूढत्वं, किञ्चिद्गूढत्वं वा सा अधीतस्य पुस्तकस्य अर्थं इव सम्यक् अजानात्।

अमृता पुनः आगत्य तां दृष्ट्वा अधावत्। एकवीरा व्याकुलिता अभवत्।

वर्षासायंसन्ध्या आगता। यावद्दिवसम् अनधिगतसूर्यप्रकाशं रोदः तस्यां वोलायां प्रतीच्यां दिशि कृष्णद्युतीनां मेघानां मध्ये कमपि अस्पष्टं रक्तभासम् अकल्पयत्। शिवरात्र्याः कृष्णपक्षगाढयामिनीवेलायां सन्तताभिषेकैः आर्द्रीभूते गर्भालयस्य अवकाशे, कर्पूरनीराजने प्रज्वालिते, तां ज्वालाम् आवृण्वन् गाढः तस्य कृष्णधूमः इव अलक्ष्यत सा वर्षासायंसन्ध्या।

* * * * *

श्रावणशुद्धदशम्याम् आगमिष्यामि इति सन्दिष्टवान् वीरभूपतिः बहुलप्रतिपदं यावत् गृहं न आगतवान्। तस्मिन् दिने अपि आगत्य, भुक्त्वा पुनः राजभवनम् आगच्छत्। तथा गतः पुनः अद्य बहुलदशम्यां गृहम् आगतवान्। अन्तरा भर्तरि मीनाक्ष्याः प्रेम न्यूनं न अभवत्। नूत्नरुचिभिः व्यञ्जनैः तं भोजयित्वा, स्वयम् अपि त्वरया भुक्त्वा, उपरिभूमिकां गच्छन्तं तं अन्वसरत्। बहिः वृष्टिः द्रुततालतां अधिगता।

मीनाक्षी गवाक्षपक्षान् पिहितवती। शयनागारः अन्धकारबन्धुरः अजायत। वीरभूपतिः पर्यङ्के निषण्णः अभवत्। मीनाक्षी पार्श्वे स्थित्वा नागवल्लीपत्राणां वृन्तानि अपनीय, सुधाक्तानि तानि तस्मै अर्पितवती। सः तु तानि हस्तेन अगृह्णात्। किञ्चित्कलानन्तरं सः ताम्बूलं पर्याप्तमिति अवदत्। मीनाक्षी पुनः अपि एकं पत्रं पुटाकारं विधाय तत् तस्य मुखे अर्पयितुं हस्तं प्रासारयत्। सः मुखं न विवृतवान्। सा तस्य पाश्वे निषण्णा पत्रं तस्य ओष्ठयोः मध्ये न्यस्तुम् अयतत। सः रुष्टः अभवत्। सा विषण्णा अजायत। सः तत् अङ्गीकृतवान्। वर्षः गवाक्षस्य पक्षकावाटान् परशुभिः इव ताडयन् आसीत्।

मीनाक्षी– "एकः मासः अतीतः सम्यक् गृहम् आगतस्य भवतः। किं तावान् कार्यभारः वर्तते" ?

वीरभूपतिः प्रतिवचनम् अदत्वा निद्रातुकामः इव अभिनीतवान्। तत् अवगत्य मीनाक्षी तस्मै शय्यां सज्जीकृतवती। तस्मिन् शयाने सा तस्य पादौ संवाहयितुम् ऐच्छत्। सः ताम् अवारयत्। बहिः वृष्टिः वायुः च एकीभूय गवाक्षं भेत्तुम् उद्यतौ इव अलक्ष्यत। वीरभूपतिः प्रावारकेण आपादमस्तकम् अवकुण्ठिततनुः शय्यायाः मध्ये अशेत। मीनाक्षी तस्य पार्श्वे शयितवती। सा पर्यङ्कस्य प्रान्ते स्थिता, अधः पतिष्यमाणा इव आसीत्। सः तु तस्यै अवकाशं न दत्तवान्। मुहूर्तात् अनन्तरं सा तम् ईषत् अपसर्तुं प्रार्थयत्। सः अपसृत्य पराङ्मुखीभूतः अस्वपत्।

तथा एका घटिका अतीता। वीरभूपतिः गाढं सुप्तः इव अलक्ष्यत। तस्य उच्छ्वासनिःश्वासौ समानौ आस्ताम्। मीनाक्षी तस्य शरीरे हस्तं निधाय, क्षणं स्थित्वा, तम् आत्मनः समीपं बलात् आकर्षत्। सः न अचलत्। सा शनैः एकं हस्तं आधारीकृत्य उत्थाय, प्रावारकम् अपनीय, तस्य मुखं पर्यशीलयत्। तावता वायोः वेगेन गवाक्षे उद्घाटिते, वर्षबिन्दवः अन्तः आपत्य, पर्यङ्कम् अक्लेदयन्। मीनाक्षी उत्थाय यावत् पुनः गवाक्षं पिहितवती तावत् तस्याः मुखे पतितैः वर्षबिन्दुभिः अण्डसन्ततिः आकीर्णा इव अदृश्यत। तस्याः कञ्चुलिका उपरिवस्त्रं च क्लिन्ने अभूताम्। वीरभूपति प्रबुद्धः अभवत्। मीनाक्षी कञ्चुकं शाटिकां च परिवर्तयित्वा आगता। वीरभूपतेः कञ्चुकः अपि शीतः अजायत।

मीनाक्षी– "वायुना गवाक्षः उद्घाटितः अभवत् तेन भवतः निद्राभङ्गः कृतः"।

वीर– (क्षणं तूष्णी स्थित्वा) "न अहं निद्रां गतः"।

मीनाक्षी पर्याकुला आत्मना लज्जायाः प्रथमं सोपानं अतिक्रान्तं इति अचिन्तयत्। किन्तु आत्मना अनुचितं किं कृतम्? आत्मनः वाञ्छा धर्मबद्धा एव इति अमन्यत।

वीर – "राजभवनं गन्तव्यम्"।

मीनाक्षी – "शकटचोदकः न आगतः"।

वीर – "पद्भ्यां गमिष्यामि"।

मीनाक्षी – "क्लिन्नः भविष्यसि"।

वीर – "कार्यभारः बहु वर्तते"

मीनाक्षी सस्मितं किमपि अवदत्। सम्यक् अश्रूयमाणेन तेन कुपितः वीरभूपतिः पराङ्मुखः अभवत्। मीनाक्षी तं समीप्य "कुतः कुप्यते? किं कार्यमपि क्लिन्नं भविष्यति इति अवदम्। क्षम्यताम्" इति अवदत्। वीरभूपतिः निरुत्तरः अभवत्। तत्रान्तरे गृहस्य पश्चाद्भागात् कः अपि ध्वनिः अश्रूयत। मीनाक्षी भीता अभवत्। वीरभूपतिः "पश्चादङ्गणे कः अपि वृक्षः पतितः स्यात्" इति अवोचत्। सा पत्युः निकटे अतिष्टत्। वीरभूपतिः आत्मा कस्याश्चित् कुल्यायाः प्राच्यतटे स्थित्वा प्रातीच्यतटः कथं प्राप्तव्यः इति व्यथमानः इव अस्ति इति अचिन्तयत्। तावता सः भ्रान्तचक्षुः पक्षौ प्राप्य इव प्रातीच्यं तटं गत्वा ततः प्राच्यतटगमनं कथं स्यात् इति चिन्तयति इव। पूर्वं आत्मनः गम्यस्थानं प्रतीच्यां दिशि आसीत्। तत् परिवृत्य प्राचीं दिशं प्राप्तम्, आत्मा तु प्रतीच्याम् आस्ते।

बहिः वृष्टिः कश्चित्कालं मृदङ्गाः वाद्यमानाः इव, कश्चित्कालं कीचकाः पूर्यमाणाः इव, कश्चित्कालं तालपत्राणि आकृष्यमाणानि इव उन्मत्तताण्डवं कुर्वन् आसीत्। तौ कक्ष्यान्तरं प्राविशताम्। मीनाक्ष्याः दृष्टिः स्वस्य चित्रपटे अपतत्। सा दूरे स्थितं वीरभूपतेः चित्रम् अनीय तस्य पार्श्वे न्यधात्। वीरभूपतेः चित्रं स्मेराननम् आसीत्, सः तु चिन्तामग्नः अभवत्। मीनाक्ष्याः चित्रं विमनायमानत्वम् असूचयत्, तस्याः मुखं तु हर्षोत्फुल्लम् आसीत्। पतिः किमपि न अवदत्। मीनाक्ष्याः नेत्रयोः पुरतः कापि यवनिका आक्षिप्ता इव अभवत्। तस्याः दृष्टिः भर्तुः पूर्वप्रणयिन्याः चित्रपटे अपतत्। तच्चित्रस्था श्वेतां शाटिकां धृतवती। तस्याः केशपाशः निस्तैलः आसीत्। तस्याः अलकाः वायुकम्पिताः इव अलक्ष्यन्त। मीनाक्षी भीता इव अस्फुरत्। "स्त्रीसंस्थानं चाप्सरस्तीर्थमारात् आक्षिप्यैनां ज्योतिरेकं तिरोभूत्" इत्यस्मिन् वाक्ये यः

अनुभवः वर्णितः, तस्य साजात्यः अनुभवः तस्याः नेत्रयोः पुरतः साक्षादभूत्।

बहिः विरतः वर्षः पुनः प्रारभत। दिनस्य एकः यामः परिशिष्टः स्यात्। मीनाक्षी आभरणनि अपनीय गृहकर्मव्यग्रा अजायत। वीरभूपतिः अपगतसङ्कल्पविकल्पशक्तिना मनसा पुनः निद्राम् अगच्छत्।

पट्टाभिषेकोत्सवाः वर्षासु एव निरुढव्याः आसन्। उत्सवेभ्यः अपि राज्यस्य सुस्थित्यै नूत्नेन राज्ञा करणीयानां व्यवस्थानां कृते अधिकः समयः अपेक्ष्यते। यासु सायंवेलासु वृष्टिः न आसीत् तासु गजराजाः राजसौधाङ्गणात् रत्नखचितान् सौवर्णसूत्रशिल्पालङ्कृतान् कौशेयपृष्ठास्तरणान् धृत्वा नगरे उत्सवयात्रायै निर्गताः, कर्दमलाञ्छिताः न्यवर्तन्त। उत्तमजात्यश्वनामपि पदानि स्खलन्ति। राजसौधाजिरे भेरीपटहादीनाम् अपि वृष्टिक्लिन्नत्वात्, तेषां शब्दः मन्दीभूतः इव अश्रूयत। विद्वद्ब्रह्मणाः राज्ञा उपायनीकृतान् महामूल्यान् नूत्नराङ्कवान् दर्भासनेषु सङ्गोप्य अपि तेषां क्लेदशङ्काम् अत्यजन्तः विनमितोर्ध्वगात्राः व्रजन्ति। अन्धकारव्याप्तत्वात् असितद्युतयः सायंसन्ध्याः मूर्तीभूतः विषादभावः इव अलक्ष्यन्त।

भाद्रपदशुक्लपञ्चम्यां मथुरातः उदयनसेतुपतेः स्थाने राज्ञः सन्देशः रामनाथं प्राप्नोत्। अपरम् एकं मासं यावत् राजनगरे उदयन सेतुपतेः उपस्थितिः आवश्यकी। राजा कुट्टानस्य शौर्यं, राजनीतिवेत्तृत्वं च श्लाघित्वा तस्मै उपायनानि प्रैषयत्। तिरुमल नायकः अपि सुहृदं स्तुवन् अन्यं लेखम् अलिखत्। षट्छतपरिमितं नूत्नसैन्यं सद्यः राजधानीं प्रापयितव्यम्। पितुः आगमनपर्यन्तं कुट्टानः रामनाथे एव तिष्ठेत्।

दशम्यां गोविन्दनाथस्य नेतृत्वे नूत्नं सैन्यं मथुरां प्रति प्रातिष्ठत्। कुट्टानस्य नाम तद्देशीयानां रक्षणाधिकारिणां, चोराणां, पोर्चुगीसदेशीयानां च सिंहस्वप्नः अभवत्। भाद्रपदमासः कुरवकपुष्पैः साकं समाप्तिं अगच्छत्।

मथुरायाः आकाशे धवलवर्णाः मेघाः पवनकम्पिताः मशकवारिण्यः(musquito nets) इव चलितुम् आरभन्त। दिवा सूर्यप्रकाशस्य दुष्प्रापत्वं न्यूनम् अभवत्। आन्ध्रद्राविडस्त्रियः सायंकालेषु सेवन्तिकापुष्पैः संरचिताः दीर्घाः पुष्पवेणीः वहन्त्यः देव्याः मीनाक्ष्याः आलयं गच्छन्ति स्म। नन्दीश्वरस्य शरीरे लिप्तं तैलं

तस्य विषाणयोः अङ्गुलीः विन्यस्य तन्मध्यात् शिवलिङ्गदर्शनं कुर्वद्भिः भक्तैः निहितेन भस्मना सितवर्णत्वम् आप्नोत्। आकाशे दक्षिणदिशि एकचुलुकाहङ्कारनिश्शेषशोषितपाथोधिपयस्कः मुनिः (अगस्त्यनक्षत्रं) अदृश्यत।

वैगैनदी स्रस्यमाणं भर्तुः अनुरागं ज्ञातवत्याः कान्तायाः मुखमिव तटेषु स्वच्छत्वम् अधिगन्तुम् आरभत। तस्याः रागच्छाया भग्ना अभवत्। कण्ठेकालस्य शिरःकोटीरस्य अलङ्कृत्यै चन्द्रकान्तपुष्पमालाः बाहुल्येन अर्पिताः अभवन्। एकस्मिन् प्रातःकाले शरल्लक्ष्मीः अकस्मात् दिगन्तविशालरम्यदीर्घहासम् अकरोत्। अश्वपालकस्य पुत्री अमृता अपि तस्मिन् एव प्रातःकाले दिगन्तविशालरम्यहासम् अकरोत्।

अमृता व्युत्पन्नमतिः इति ज्ञात्वा कः अपि ब्राह्मणः दशदिनेभ्यः ताम् अध्यापयन् आसीत्। दशसु दिनेषु सा अक्षराणि अभ्यस्य शब्दान् शिक्षयितुं तं त्वरयामास। तेन सः ब्राह्मणः "अतिच्चूडि" ग्रन्थस्य प्रथमं वाक्यं "आरञ्जे विरुम्बु" (धर्मं चर) इत्येतं ताम् अध्यापितवान्। सा च तं वाक्यम् एकवीरायाः सौधकुड्ये अङ्गारखण्डेन अलिखत्। परस्मिन् दिने एकवीरा तं वाक्यं दृष्ट्वा, केनापि कारणेन भीता ततः अधावत्। तत् दृष्ट्वा अमृता हेतुम् अजानाना अपि उच्चैः अहसत्। तस्याः सः हासः शरत्कालस्य तरुणातपेन सह जातीलतामण्डपम् आरुढवान्, सौधकुड्यानां सुधाकान्तिभिः सम्मिलितः अभवत् च।

आतपः तीक्ष्णः अजायत। वर्षासु कर्दमायितेषु, पशुभिः सञ्चरितेषु च प्रदेशेषु भूमिः पशूनां खुरन्यासचिह्नैः सह एव अशुष्यत। दूरे काशपुष्पाणि आतपेन चकञ्चकितानि अशोभन्त। क्षेत्रकुल्यासु नारिकेलोदकवत् प्रसन्नं जलं प्रावहत्। स्रोतसां वङ्केषु(curves) मत्स्योपजीविनः मत्स्यग्रहणसाधनानि अस्थापयन्। हरितं शालिसस्यं श्यामायमानं गुल्मीभूतं च सत् आकाशस्य नीलिम्नः तुल्यत्वम् अवहत्। कुस्तुम्बुरुक्षेत्रेषु सीरोत्कृष्टरेखासु उद्गताः अभिनवाः अङ्कुराः पवनवीथीषु सुकुमारशीर्षाणि अचालयन्। शणक्षेत्रेषु उद्भिदः तरुणत्वकृतम् आल्मत्वं भजन्तः, निशासु पतता अल्पमात्रेण नीहारेण प्रतिदिनं शनैः अवर्धन्त। प्रातःकाले शीतः तरुणातपः, मध्याह्ने निदाधातपः, सायं नात्युष्णः

आतपः, रात्रौ यामद्वयपर्यन्तं श्लक्ष्णमेघराजीनाम् अभ्यन्तरात् प्रकाशन्ती क्षीरोपमा चन्द्रिका, ततः तुषारोद्गमः च शरत्कालदिवारात्रयोः सहजं लक्षणमभवत्।

एकवीरा अमृतां दण्डयितुं कृतमतिः आसीत्, सा च एकवीरायाः दर्शनं परिहरन्ती आसीत्। शरद्रात्रिषु तन्वी तमिस्रा चन्द्रिकया पराभूता पयोदानां पृष्टतः सञ्छन्ना भवति। कदापि तया परिभूता चन्द्रिका तस्याः आत्मानं गोपायति। इत्थं परस्परदर्शनं परिहरन्त्यौ एकवीरामृते शरन्निशायाः साम्यम् अभजताम्।

तासु शरद्यामिनीषु गगने कापि अद्भुता शोभा अलक्ष्यत। कञ्चित्कालं सिताः सान्द्राः च वारिधराः वाताहताः सन्तः – पशूनां नराणां च पादैः अस्पृष्टेषु सैकतेषु बलवता वायुना कल्पिताः सिकतोर्मिमालाः इव, पश्चाद्गच्छता सागरतरङ्गेण तीरस्थायां सैकतभुवि रचिताः तन्व्यः सोपानरेखाः इव, अच्छमीनस्य शरीरोपरिशल्कलानि इव, द्विः प्रसूतायाः मुग्धपुरन्ध्र्याः रहोवेलास्पृष्टं दीपकान्त्यां चकासत् उदरमिव, रम्याः आसन्। कञ्चित्कालं तत्र तत्र अपगतवलयाकृतयः लघवः सितवलाहकाः, तेषाम् अन्तरे असिताम्बुधराः च – सिताः ज्योत्स्नायां प्रकाशमानाः, असिताः च ज्योत्स्नाम् अपाकुर्वन्तः च मिलित्वा हूणदेशीयायाः धेनोः वपुः इव, उत्थितैः आतपत्रानुकारितामरसपत्रैः कमलैः च व्याप्तस्य सरसः उपरिभागः इव, पष्पितः तुम्बीगुल्मः इव, मनोहराः अभूवन्। कञ्चित्कालं च प्रातीच्यपवने वहति, तस्याः दिशः – धौतानि आतपे प्रसारितानि च कार्पासवस्त्राणि इव धवलाः स्निग्धाः च अम्बुवाहाः पवनचोदिताः प्राचीं दिशं प्रति उत्पतन्तः, चन्द्रमसं तारकाः च प्रतीचीं दिशं प्रति प्रधावयन्तः इव अलक्ष्यन्त।

तादृश्यां शरद्यामिन्यां कुट्टानः भार्यां प्रति पत्रं लिखितुं सङ्कल्प्य, चत्वारि पत्राणि लिखित्वा अपि असन्तृप्तः, तानि खण्डशः अकरोत्। कञ्चित्कालं मेघेषु दत्तदृष्टिः शरज्ज्योत्स्नायाम् एकवीरायाः नयनयोः सुषमा अस्ति इति अचिन्तयत्। ततः तस्य मनसि – स्वस्य अनुरागः एकवीरायै अकस्मात् आत्मना एव ज्ञापयितव्यः न तु पत्रद्वारेण इति विचारः उदभूत्। तथा कृत्वा तस्याः गाढतरपरिष्वङ्गस्य अगाधता परिज्ञातव्या इति आशया सः पत्रलेखनात्

विरम्य सकलां रात्रिं तामेव ध्यायन् आस्ते।

तत्र एकवीरा तु स्वस्यां भर्तुः अनुरागोद्भवः स्वप्नगतवृत्तान्तः एव इति निश्चितवती। तेन तस्याः पूर्वप्रेयोमूर्तिः पुनः पुनः तस्याः मनसि स्फुरन् आसीत्। महता प्रयत्नेन अपि सा स्वमनः प्रविशन्तं तं रोद्धुम् अशक्ता अभवत्। किञ्च शरत्कौमुद्याः सितद्युतिभिः, श्वेतशाटिकाधारणात् जायमानेन केनापि विशेषसुखानुभवेन च सः तस्याः मनसि बलात् पदं कुर्वन् आसीत्। सा तं मनसा दृष्ट्वा, ऊहित्वा च सात्त्विकविकाराणां वशं गता आपादमस्तकं पुलकितगात्रा अभवत्। अस्थिपर्यन्तं स्वशरीरस्य अन्तः प्रविशन्तं तं सुखं भावयन्ती सा अकस्मात् आत्मानं विस्फारितनेत्राभ्यां पश्यन्तीं अमृतां मनसि सम्भाव्य भीता अभवत्। "आरञ्जे विरुम्बु" (धर्मं चर) वाक्यं तस्याः श्रवणयोः अध्वनत्। ततः सा कुट्टानं प्रेममूर्तित्वेन, परिणतभावुकत्वेन च भावयन्ती न भूमौ न वा आकाशे इतिवत् परितप्यमाना आसीत्।

प्रातः तरुणातपे दीप्यमाने, गृहाङ्गणे पुष्पितानि कारवेल्ल नागबलपुष्पाणि स्वर्णमुद्राः इव, पटोलिका कुसुमानि रजतमुद्राः इव, वार्ताकुसुमानि इन्द्रनीलमणयः इव, करवीराः मरकतमणयः माणिक्यानि च इव, अकालदोहदेन पुष्पिताः मल्लिकाः सूचीमुखपुष्यरागमणयः इव, रक्तवर्णाः नित्यमल्लिकाः पद्मरागमणयः इव, शुक्लवर्णाः वैक्रान्तमणयः इव च अभासन्त। तेन अङ्गणे धनलक्ष्मीः नृत्यन्ती इव अलक्ष्यत। एकवीरायाः मनसि तु दारिद्र्य ताण्डवमकरोत्।

21

कृष्णानद्याः उत्तरस्यां दिशि आन्ध्रदेशे विजयवाटिकायाः अधः "कूचिपूडि" नामकः ब्राह्मणाग्रहारः अस्ति। तत्र सिद्धप्पनामा ब्राह्मणयुवा अवसत्। सः मन्दबुद्धिः, अलसः, अमायिकः, निरक्षरास्यः च। अतः तद्ग्रामवासिनां सर्वेषामपि सः परिहासभाजनम् आसीत्। तस्मिन्नेव ग्रमे निवसन् एकः ब्राह्मणः स्वदुहितुः योग्यं वरम् आनेतुम् अक्षमत्वात् सिद्धप्पे करुणया च, स्वपुत्री एव तस्य अनुरूपा भवेत् इति मन्वानः तां तस्मै दत्वा विवाहम् अकरोत्।

पाणिग्रहणेन आत्मना वोढव्यं कुटुम्बभारम् अवगत्य सिद्धप्पः अध्ययनकांक्षया कृष्णाम् उत्तीर्य बहुपण्डितशुश्रूषया वेदशास्त्राणि, सङ्गीतं, नाट्यं, भरतशास्त्रं च सर्वङ्कषं शिक्षितवान्। तत्र कूचिपूडिग्रामे श्वशुरौ बहिरङ्गं, जाया मनसि च तस्य अध्ययनपरिसमाप्तिं प्रतीक्षन्ते स्म।

समाप्तविद्यस्य गृहं प्रतिनिर्गच्छतः सिद्धशास्त्रिणः बहुविद्याभ्यासेन परिपक्वं मनः अननुभूतमपि गृहस्थाश्रमम् अनुभूतमिव सम्भाव्य, तुरीयाश्रमासक्तम् अजायत। किन्तु मनसि आवृतः मायालेशः न अपगतः। अतः किमपि विनिश्चेतुं सः न अपारयत्। तैः सङ्कल्पविकल्पैः आकुलितचेताः सिद्धशास्त्री यदा कृष्णातटम् अगच्छत् तदा नदी कूलमुद्रुजा प्रवहति। समीपे उडुपः अपि न आसीत्। भानुः अस्तमेति, कमपि ग्रामं प्राप्तुं पश्चात् गच्छति चेत् योजनमितः अध्वा गन्तव्यः। अपि च गृहगमनकांक्षा अतिशेते। अतः साहसं कृत्वा प्रवाहम् अवगाह्य, बाहुभ्यां नदीं तर्तुं आरब्धवान्। नद्याः आयामस्य अर्धं तीर्णं, सः अतीव श्रान्तः अग्रे गन्तुम् अशक्तः अजायत। प्रवाहमध्यस्थः सः आत्मनः अन्त्यकालः सन्निहितः इति ज्ञात्वा, मोक्षार्थी मनसा सन्न्यस्तवान्। आत्मरक्षार्थं किमपि प्रयत्नम् अकुर्वन्तं, योगमाश्रित्य पाणिपादमपि अचालयन्तं तं तालोत्तालः तरङ्गः एकः जङ्घादघ्ने पयसि अक्षिपत्। विरतप्राणायामः सः सुखेन कृष्णां तीर्त्वा, तस्यामेव निशि कूचिपूडिग्रामं प्राप्तवान्।

जामाता तेजस्वी सकलविद्यापारङ्गतः च भूत्वा प्रत्यागतः इति आनन्दमग्नौ तस्य श्वशुरौ परस्यां रात्रौ गर्भाधानमहोत्सवाय मुहूर्तं निश्चितवन्तौ। गृहारामक्षेत्रदर्शी सिद्धपण्डितः कृष्णानदीगर्भे आत्मना अवलम्बितम् आतुरसन्न्यासं विस्मृतवान्। तस्यां रात्रौ एकान्ते स्वस्याः चेलाञ्चलम् आकर्षन्तं तं भार्या अवारयत्। वस्तुतः न सिद्धः न वा तस्य पत्नी मन्दबुद्धी, किन्तु अन्तर्द्रष्टारौ आस्ताम्। योगिनी सा पत्यौ सन्न्यासिनम् अपश्यत्। सिद्धपण्डितस्य मनसि आत्मनि यतिं पश्यन्त्याः जायायाः वचांसि स्वस्व कृष्णातरणेन सङ्गतानि अभूवन्। तत्क्षणम् अमरुकस्य शरीरे पर्यटन् आदिशङ्कराचार्यः सुरेश्वरस्य वाचा इव सिद्धशास्त्री पत्न्याः वचसा प्रबोधितः अभवत्। शृङ्गारचिह्नैः विरहिते तयोः वपषी निद्रालसत्वेन विरहिते तयोः अक्षिणी ग्रामपुरन्ध्रीणां चर्चाविषयत्वं गत्वा तयोः रहस्यं प्रकटमकुरुताम्।

ततः क्रमसन्न्यस्तः सिद्धः शिष्याणां विद्यादाता अभवत्। पुरा मन्दबुद्धिः सिद्धप्पः यदा सिद्धेन्द्रयोगित्वेन परिणतः अभवत्, तदा समस्तः अपि सः ग्रामः तस्य शिष्यत्वम् अगच्छत्। तस्मिन् निगूढं कविताबीजम् अकस्मात् उदबुध्यत। तद्द्वारेण – वैराग्येन निगृहीताः मूकीभूताः च तस्य शृङ्गारभावाः सर्वे भगवति पर्यवसिताः अभूवन्। तेन परिणामेण सः विचलितः अजायत। तस्मिन् परिपक्वं भरतशास्त्रं, नाट्यं, सङ्गीतं, देश(तेलुगु)भाषाज्ञानं च तस्य मनसि उद्बुध्यमानस्य कविताबीजस्य स्पष्टं रूपं ददुः। तेन अधीतानि षट्छास्त्राणि तस्य मनः अभवन्, अलङ्कारशास्त्रं तस्य बुद्धिः, सत्यभामाकृष्णयोः प्रणयः च तस्य आत्मा। तथा परिणतेन दिव्यकवितारसप्रवाहेण तेलुगुदेशस्य चतसृषु अपि दिक्षु कुचद्वयीभूतसङ्गीतसाहित्या देवी सरस्वती घलङ्घलितचरणकिङ्किणी नाट्यमकरोत्।

सिद्धेन्द्रयोगिनः ग्रन्थे भागद्वयम् अस्ति। तयोः प्रथमः गोल्ल(आभीर)कलापः, अपरः च भामाकलापः। तयोः गोल्लकलापः षट्छास्त्राणां वासभूमिः, भामाकलापः च गालिते अलङ्कार-भरतशास्त्रे। तस्मिन् नाटके श्रीकृष्णदेवस्य प्राधान्यं नास्ति। सत्यभामा एव तस्मिन् प्रधानं पात्रम्।

अस्यां सृष्टौ केवलं त्रयः एव जनाः सत्यभामा शृङ्गाररससर्वस्वस्य आलम्बनविभावः इति अजानन्।

तेषु प्रथमः स्वयं श्रीकृष्णदेवः। सः शृङ्गारसर्वस्वं लुण्ठित्वा स्वाधीनं कृतवान्। तस्य रुक्मिणी वैकुण्ठात् आहृतं निधानं स्यात्, पातिव्रत्यस्य उदाहरणभूता स्यात्, किन्तु सत्यभामा शृङ्गारस्य अधिदेवता। सर्वविधाः नायिकाः, सर्वान् भावान् च सा एव असृजत्। तां सृष्टिं सा माता स्वभर्तुः भगवतः श्रीकृष्णदेवस्य उपायनीकृतवती।

तस्याः आलम्बनविभावत्वम् अवगच्छन् अपरः जनः आन्ध्रकाव्यस्य पारिजातापहरणस्य कर्ता नन्दि तिम्मन्नः। पादताडनमपि शृङ्गाररसत्वेन पर्यवस्यन्त्याः तस्याः देव्याः रसमूर्तिं सः किञ्चिदिव अजानात्। कृत्रिमकवितालक्षणम् उपचिन्वन् सः कालः सत्यादेव्याः शृङ्गारदेवतात्वं ज्ञातुं तस्मै अवकाशं न अदात्। तस्य रचनायां शाखोपशाखाक्रमेण "अयम् आदिः, इदम् अन्तम्" इति ज्ञातुम् अशक्यत्वेन विस्तारितम् अलङ्कारशास्त्रम्

एकस्मिन् एव आश्वासे परिसमाप्तिं गतम्।

तृतीयस्तु सिद्धेन्द्रयोगी । तस्य रचनायाः रहस्यं सः एव जानाति। यदा शृङ्गाररसः भगवन्तं वर्णयति तदा तस्य आलम्बनविभावः (श्रीकृष्णेन साकं) सत्यभामा भवति इति ज्ञातुं सर्वे न शक्नुवन्ति। वङ्गदेशकवी जयदेवविद्यापती तं पदं राधायै अर्पितवन्तः। तस्मिन् शृङ्गारे चैतन्यस्य तन्मयत्वं ध्वनति, न तु शङ्करस्य विज्ञानम्। सिद्धेन्द्रयोगी जयदेवविद्यापती इव केवलं भक्तः न, किन्तु योगी ज्ञानी अपि आसीत्। अतः सः श्रीकृष्णेन साकं सत्याभामामपि शृङ्गारस्य आलम्बनविभावम् अकरोत्। सा सर्वभावानां निकषोपलम् । शृङ्गाररसस्य लेशानपि पोषयन् सिद्धेन्द्रयोगी भामाकलापं शृङ्गाररससर्वस्वत्वेन असृजत्।

नाट्यम्, अभिनयः, भावः, सङ्गीतम् – एतेषां चतुर्णां महासमैक्यं जानन् सः कविः तं ग्रन्थं कूचिपूडि आग्रहारिकेभ्यः तारकमन्त्रमिव उपादिशत्। गच्छति काले सः न केवलं तेषां जीवनाय अपि तु मोक्षाय अपि साधनं भविष्यति इति आदिश्य, तां विद्यां परित्यजन्तः कूचिपूडिब्राह्मणाः मुक्तिदूराः भवेयुः इति शप्त्वा च कांश्चन शिष्यान् तद्विद्यानिपुणान् अकरोत्। ते तेलुगुदेशस्य चतुर्षु अपि दिक्षु प्रदर्शनैः तां विद्यां व्यापयन्तः आसन्। तस्याः विद्यायाः द्वारेण सर्वशास्त्राणां रहस्यानि सर्वजनैः ज्ञायन्ते। तं नाटकं पुनः पुनः पश्यतां जनानां हृदयानि कोमलानि, मनांसि भावपूरितानि, आत्मानः च रसनिमग्नाः अजायन्त। तन्नाटकं तेलुगुजातीयानाम् अध्ययनं विना अधिगता विद्या अभवत्। अज्ञानिनः अपि ज्ञानवन्तः सम्पद्यन्ते। कूचिपूडिब्राह्मणानां भामाकलापः तस्मिन् काले शिशूनाम् अपि पारवश्यम् अजनयत्। भामाकलापाय चन्द्रातपविशदाः शरद्यामिन्यः कामधेनवः इव।

मथुरायां शरज्ज्योत्स्नाः तलतलायमानाः आसन्। सा आश्वयुजपूर्णिमा। मीनाक्षीसुन्दरेश्वरयोः कल्याणमहोत्सवदिवसः। कल्याणमण्डपः वीरभूपतेः गृहस्य पुरतः एव अविद्यत। तस्यां रात्रौ तन्मण्डपस्य अग्रे कूचिपूडिब्राह्मणैः भागवतं (कूचिपूडि नाटकानां अपरं नाम) प्रदर्श्यते*।

(*मुत्तुवीरप्प नायकस्य काले एव कूचिपूडिभागवतं नूतनतया अवतीर्णम् आसीत्। सिद्धेन्द्रयोगी सप्तदशशताब्दीयः। मुत्तुवीरप्प नायकः 1710 तमे वर्षे अभिषिक्तः अभूत्। तवता एव कूचिपूडिभागवतं जनसामान्ये प्रचुरम् आसीत्।

तत्परिसरगतेभ्यः सहस्रग्रामेभ्यः जनाः आगच्छन्।)

मीनाक्षी श्रावणशुद्धदशम्यां सेतुपतीनां गृहं गता आसीत्, पुनः अद्य गता। भागवतदर्शनार्थं एकवीराम् अहूय, रात्र्याः प्रथमयामे अतीते तया सह पुनरागता। ते द्वे गृहस्य बहिर्वितर्दिकायां श्लक्ष्णयवनिकायाः पश्चात् उपविष्टे आस्ताम् । एकस्यां दिशि मीनाक्षी सुन्दरेश्वरयोः परिणयोत्सवः सम्पद्यते। अपरस्यां नाटकस्य प्रारम्भसूचकः मृदङ्गतालप्रस्तारसहितं सङ्गीतं प्रारभत।

सार्धैकयामातीतायां निशायां गोल्लकलापः आरब्धः। रङ्गे स्थितौ उल्मुक(करदीप)पाणी रजकौ उल्मुकौ एकीकृत्य तयोः ज्वालायां गुग्गुलुचूर्णं अक्षिपताम्। ततः धगद्धगायमानायाः ज्वालायाः प्रकाशे यवनिकाभ्यन्तरात् गोल्लभामा(गोपिका) विदूषकः च द्रुततालानुगतेन उद्धतगतिना नाट्येन रङ्गं प्राविशताम्। विदूषकस्य हास्याभिनयेन, गोपिकायाः अभिनयेन, तस्याः उच्चारणेन, देशीयभाषाप्रयोगेण च जनाः अत्यर्थं आकृष्टाः अभूवन्। गोपिका "तक्रं विक्रीयते मातः तक्रम्" इति वदन्ती – स्वजात्याः लक्षणानि वर्णयित्वा, विविधानां पशूनां स्वभावैः साकं पशुशास्त्रं विस्तार्य, षट्छास्त्राणाम् अर्थम् उपन्यस्य, रागतालौ, भरतशास्त्रम्, अलङ्कारशास्त्रं च चर्चित्वा, गर्भधारणं, गर्भोत्पत्तिं, नवसु मासेषु वृद्धिं गच्छतः शिशोः परिणामं, अत्मतत्त्वं, सृष्टिकारणं, च कथयन्ती सभ्यान् रञ्जयित्वा यवनिकाभ्यन्तरम् अगच्छत्। एकवीरा तदेकध्यानेन श्रुण्वन्ती आसीत्। मीनाक्षी तु कञ्चित्कालं नाटकं, कञ्चित्कालं कल्याणोत्सवं च पश्यन्ती जनसमूहस्य अपरस्यां दिशि चरन्तं वीरभूपतिम् अक्षिभ्याम् अनुसरन्ती आसीत्।

यामद्वयम् अतीतं, तृतीययामस्य अपि अर्धमवसितं। तदा सत्यभामा स्ववेणीं यवनिकायाः उपरि निधाय यवनिकाभ्यन्तरात् स्वस्याः कथां कथयितुं अरभत। सर्वे सभ्याः अनिमिषाः अजायन्त।

मीनाक्षी – "अपि जानासि किमर्थं सा वेणी यवनिकायाः उपरि प्रक्षिप्यत"?

एकवीरा – "न अहं जाने"।

मीनाक्षी – "सा चेष्टा भरतशास्त्रे आत्मना तुल्यः कः अपि नास्ति इति

प्रख्यापयितुं उद्दिष्टा"।

एकवीरा – "तथा कृते किं पण्डिताः कुपिताः न भवेयुः" ?

मीनाक्षी – "कुपिताः भवेयुः इत्येव। कुपिताः भूत्वा स्वेषां पाण्डित्यं प्रदर्शयेयुः इत्येव"।

एकवीरा – "केचन ईर्ष्यालवः भवेयुः। ते आत्मभिः अनुभूतां तिरस्कृतिं मन्त्रप्रयोगेण निर्यातयेयुः"।

मीनाक्षी – "कूचिपूडिवासिनः ब्राह्मणाः मन्त्रशास्त्रे महाकुशलाः इति श्रूयते। तच्छास्त्रे तेषां शक्तिः अपरिमिता इति वदन्ति"।

तत्रान्तरे विरहिणी सत्यभामा यवनिकाभ्यन्तरात् रङ्गं प्रविश्य, भगवतः दशावतारान् अभिनीतवती। तत्पात्रधारिणः* ते हस्तविन्यासा, तानि अवयवचालनानि, तत् सुष्टूच्चारणं, ते भ्रूविक्षेपाः, तानि भावानुगुणं नेत्रविस्फारणनिमीलनानि, साक्षात् भरतमुनिना शिक्षितानीव आसन्। ततः भामावेषधारी मुग्धामध्याप्रगल्भानायिकानाम् आधारेण विप्रलम्भशृङ्गारम् अभिनेतुम् आरब्धवान्। मानावस्थायां मध्याप्रगल्भयोः धीरा, अधीरा धीराधीराभेदान्, तेषु च ज्येष्ठा कनिष्ठा भेदौ सूचयित्वा, विप्रलम्भावस्थाः आरभ्य, तासु अभिलाषा, चिन्ता, स्मृति, गुणकीर्तन, उद्वेग, प्रलाप, उन्माद, व्याधिनामकाः अष्टौ अवस्थाः अभिनीतवान्। रसज्ञानां हृदयानि पर्याकुलानि अभूवन्। पामराः विदूषकस्य वचनैः रज्यन्ते। सः अपि यदा यदा भामावेषधारी भिन्नभिन्ननायिकाः अभिनयति तदा तदा वाग्रूपेण एव तत्तदुचितसखीनिरुपणं कुर्वन्, पण्डितानाम् अपि चित्तानि अरञ्जयत्।

भावयोग्यैः पताकादि हस्तैः, स्वाधीनेन नेत्रतारकाभ्रमणेन, नित्याभ्यासवशात् अभ्युपगतेन कौशलेन च युक्तः भामावेषधारिणः अभिनयः मनोहरः आसीत्। सर्वासां विद्यानां जन्मस्थानभूतानां बीजाक्षराणां रूपेण ताम्रमयम् उत्सवविग्रहम् आविश्य स्थितः नादतनुः शिवः सुन्दरेश्वरः तस्य अभिनयेन पुलकितः भूत्वा लोचनानि उन्मील्य पश्यन् आस्ते। देवी मीनाक्षी अपि सम्मोहिता भूत्वा नाटकं पश्यति। तद्वीथीवायोः एकैकस्मिन् आवर्तने

मृदङ्गस्वनेन किङ्किणीरवेण च विक्षिप्तः लयः, रम्यातिरम्यं भागवतानां सङ्गीतं च ध्वनती आस्ताम्। द्रष्टृषु जनेषु शिशुः अपि नेत्रे न न्यमीलयत्।

(*कूचिपूडिभागवतेषु पुरुषाः एव स्त्रीवेषधारणं कुर्वन्ति।)

उषःकालं सूचयन् कुक्कुटः अनदत्। "भामा"जडतावस्थाम् अभिनयति। रागतालौ परिवर्तितौ, गीतं च अपरम् आरब्धम्। मीनाक्ष्याः अक्षिणी नाट्यरङ्गे निश्चलत्वेन अङ्किते अजायेतम्। एकवीरायाः प्राणाः पूर्वाः अष्टौ अपि अवस्थाः मनसा अनुभूतवन्तः। जडतावस्थाभिनयवेलायां तद्गीतेन तालेन च कुञ्चिताः अभूवन्। सा शरीरं विक्षिप्य, श्रवणे कराभ्यां पिधाय, विना शब्दलेशं वीरभूपतेः गृहस्य अन्तः अगच्छत्। तद्गृहस्य एकदेशः तस्याः परिचितः आसीत्। शयनागारं सा पूर्वं अपश्यत्। किन्तु त्रिवारम् आगता अपि सा तत्पार्श्वस्थां कक्ष्यां – यस्मिन् मीनाक्षीवीरभूपत्योः, वीरभूपतेः पूर्वप्रणयिन्याः च चित्राणि अविद्यन्त तं कदा अपि न प्राविशत्। मीनाक्षी तस्यै तां कक्ष्यां न अदर्शयत्।

एकवीरा अन्तः गत्वा शयनकक्ष्यायाम् अधः निषण्णा अभवत्। मुहूर्तात् अनन्तरं निषेदितुमपि अशक्ता भूतले शयितवती। सुकुमारा तस्याः गात्रयष्टिः भूम्याः कठिनस्पर्शं सोढुं नाशकत्। ततः सा उत्थाय अविचारितं शय्यायाम् अशेत। बाह्यात् जडताकारकः स रागः तालः च मन्दं श्रूयेते। सा जडता शनैः ताम् आविशत्।

बहिः भामावेषधारी निधनावस्थाम् अमङ्गलमिति परिहृत्य वासकसज्जिकाभिनयम् आरब्धवान्। पुनः रागतालौ परिवर्तितौ, नूत्ना गीतिका च आरभ्यत। इतः पूर्वं विषादभावपूरितासु वायुवीथीषु पुनः सन्तोषभावनाः व्यजृम्भन्त। तालः चित्रगतिभिः वाद्यते। एकवीरायाः हृदये विषादः अशाम्यत। का अपि काङ्क्षा तां पर्याकुलां अकरोत्। तावत् शयनम् आश्रिता सा उत्थाय, विमूढमतिः इतस्ततः पर्यभ्रमत्। तथा परिभ्रमन्ती सा पार्श्वस्थकक्ष्यां प्राविशत्। तत्र दीपः जाज्वल्यमानः प्रकाशते। मीनाक्ष्याः, वीरभूपतेः पूर्वप्रणयिन्याः च चित्रपटौ वस्त्राच्छन्नौ आस्ताम्। अतः सा तौ न अपश्यत्। वीरभूपतेः चित्रं भित्तौ अवलम्बितम् अवर्तत। तत् पश्यन्त्याः एकवीरायाः नेत्रे तीव्रेण तेजसा आहते इव अभवताम्। सा च आपादमस्तकम् अकम्पत। तस्याः पूर्वप्रणयमूर्तिः

पुरतः साक्षात्कृता इव अभवत्। सा अचेतना अजायत। तस्याः मनः च जडत्वं प्राप्नोत्। तस्याः लोचने उन्मीलिते एव आस्ताम्, किन्तु तयोः किमपि जीवचिह्नं न अलक्ष्यत। सा भित्तिम् आधारीकृत्य स्थितत्वात् ततः पतिता न अभवत्। तस्याः मनोरथः निश्चलः अजायत। शीतलपवनेन गवाक्षः विवृतः अभवत्। बहिः नाटके सख्याः परिहासवचनानि अश्रूयन्त।

एकवीरा प्रबोधिता आसीत्। सा आत्मानं नायिकाम् अमन्यत। तच्चित्रस्य उपस्थित्या सः तत्प्रदेशः – यत्र स्वस्याः नायकः आगमिष्यति, आत्मा च तस्य आगमनं प्रतीक्षमाणा वासकसज्जिका। एषः एकः एव ऊहः तस्याः मनसि अवर्तत। तदानीं तस्याः शरीरे मनसि वा एकः अणुः अपि रसमयं जगत् न अतिक्रम्य गतः। तस्मिन् क्षणे तस्याः चेतसि मीनाक्षी न आसीत्। तत् मीनाक्ष्याः गृहम् इति वा, आत्मा सेतुपतेः पत्नी इति वा ज्ञानं न आसीत्। आत्मा का इत्यपि सा न अजानात्। सा रसजगति वर्तते। सा नायिका, तत्रापि वासकसज्जिका, नायकं प्रतीक्षन्ती आस्ते....

प्राच्यां दिशि अरुणोदयरेखाः अलक्ष्यन्त। प्रकोष्ठस्य बहिः परिजनानां सामग्रीसम्पादनस्य कलकलः श्रूयते। एकवीरा प्रबुद्धा शाटिकां समीकृत्य केशान् नखैः सम्मार्जितवती। आत्मनः नायकः आगत्य आत्मानम् आलिङ्गनेन सम्भावयिष्यति इति चिन्तयन्ती आसीत्।

पुनः रङ्गात् मार्गविलोकननामकचेष्टायाः अभिनये आरब्धे, तत्सम्बन्धिगीतस्य प्रारम्भः "इतः आगच्छति सखि, अयमागच्छति" इति अश्रूयत। एकवीरायाः लोचने अप्रयत्नं द्वारदेशं व्यलोकयताम्। तत् द्वारं धगद्धगितम् अभवत्।

बहिः नेत्राणि उन्मील्य नाट्यसौन्दर्यं पश्यतः सुन्दरेश्वरस्य नयनोष्मणा अर्चकहस्तस्थं चामरम् अदह्यत। अर्चकः उल्मुकं वहन् रजकः प्रमादेन चामरम् अग्निसात्कृतवान् इति सम्भाव्य तं निन्दितवान्। नाटकप्रदर्शनाय निर्मितस्य तालपत्रमण्डपस्य उपरि तालपत्राणाम् अग्रभागाः रक्तवर्णाः अजायन्त। भामावेषधारिणः शाटिकाञ्चलः अपि दग्धः अभवत्। सः अपि रजकप्रमादत्वेन परिगृहीतः अभवत्। केनापि मन्त्रप्रयोगः कृतः स्यात् इति मत्वा भागवतबृन्दस्य नायकः वृद्धब्राह्मणः दिग्बन्धनं कृतवान्। तदा एव कृष्णवेषधारी रङ्गं प्राविशत्। तद्दर्शनेन सुन्दरेश्वरस्य दृष्टिः शीता अजायत।

कोलाहलः च शान्तः। सूर्योदयः अभवत्। समागतः श्रीकृष्णः सत्यभामया समाद्रियते। तत्सम्बन्धिनः ध्वनयः पुनः अन्तः अश्रूयन्त।

एकवीरायाः दृष्टिः द्वारदेशे आसीत्, तत्र च वीरभूपतिः स्थितः। तौ द्वौ अपि परस्परं पश्यन्तौ आस्ताम्। ततः षड्वर्षेभ्यः प्राक्, यदा वीरभूपतिः अम्बासमुद्रं गतः, तदा तस्याः पितुः अन्तःपुरगवाक्षात् प्रथमम् एकवीरायाः दृष्टिः वीरभूपतेः दृष्ट्या मिलिता आसीत्। षड्वत्सराणाम् अनन्तरं पुनः अद्य अतर्कितं तयोः दृष्टी अमिलताम्। एतन्निमेषद्वयस्य मध्ये महान् कालः अतीतः, बहूनि परिवर्तनानि च जातानि। किन्तु तयोः मनसि तत् व्यवधानं न अभासत। तस्मिन् क्षणे तौ अन्योन्यवर्जं अन्यत् न किमपि अपश्यताम्, अचिन्तयतां च। तौ द्वावपि शरीराभ्यां समं मनोभ्याम् आत्मभ्यां च तस्मिन्नेव स्थले, तस्मिन्नेव क्षणे लग्नौ अभूताम्। सम्प्रति न सा दुर्गे बन्दीकृता असीत्, नापि सः वीथ्यां किमपि कर्तुं अशक्तः तिष्ठति। कथम् एषः संयोगः सम्प्रवृत्तः इति प्रश्नः तयोः मनसि न उदपद्यत। कथं वा सा तत्र, सः च तत्र अस्ति इति ऊहः न अजायत। वीरभूपतिः तां परिष्वक्तुम् अग्रे गच्छन् आसीत्, एकवीरा च हस्तौ प्रसार्य अतिष्ठत्।

तस्याः गात्रयष्टिः अस्विद्यत।

विना शब्दं वीरभूपतिना विन्यस्यमानम् एकैकं पदं सा आत्मनः प्राणेषु विधीयमानम् इव अभावयत्। तस्याः वपुः स्तब्धमभवत्।

वीरभूपतिः ताम् आलिङ्गितुं यथा सुकरं भवेत् तथा निकटम् आगतः। एकवीरायाः पादयोः अधः भूमिः अकम्पत। सा आपादमस्तकं पुलकिता अभवत्।

सः तस्याः हस्तौ स्वकराभ्याम् अस्पृशत्। तस्याः शरीरे एकः विद्युत्प्रवाहः प्रावहत्। तस्याः गात्रं प्रविचलितं आसीत्।

तस्य हस्तौ तस्याः शरीरं पर्यवेष्टयताम्। तावत् श्रूयमाणं तस्य निःश्वासमारुतस्य मनोहरं मृदुस्वानं न अश्रूयत। तं निःश्वासपवनं जगतः सर्वपुष्पसमृद्धात् वनात् आगच्छन्तं मन्दमारुतं इव तस्याः घ्राणेन्द्रियः

अजिघ्रत्। तस्याः चक्षुषी तस्य एव चक्षुषी पश्यती स्तः। तस्याः नेत्रयोः वैवर्ण्यम् उदभूत्, तस्याः त्वगिन्द्रियः च चर्मदघ्नं शिशिरातिशिशिरः अजायत।

सः तां स्ववक्षसि अकरोत्। तस्याः नेत्रे उन्मीलिते अपि न तं पश्यतः । ते अपगतदर्शनशक्तिनी, अश्रुपूर्णे च अजायेताम्। तस्य आलिङ्गने यत् शीतलत्वं आसीत् तत् तस्याः रुधिरं प्राविशत्। सा उत्तरध्रुवप्रान्तं प्रति नीतः भूमध्यरेखाप्रान्तस्थः इव अभवत्।

सः तां गढातिगाढम् आलिङ्गितवान् । तस्याः घ्राणेन्द्रियस्य तस्य निःश्वासपरिमलाघ्राणने शक्तिः अपगता। तस्य दृढालिङ्गनेन तस्याः हृदयात् ध्वनिः इव उत्थितः वायुः तस्याः कण्ठकुहरे एव स्तम्भीभूतः अभवत्। तस्य परिष्वङ्गस्य शैत्यं तस्याः स्नायुषु व्याप्तम् अभवत्। तस्याः हृदये एकैकः नालः तत्स्पर्शस्य महासुखं अनुभूतवान्।

सः तस्याः अधरम् अचुम्बत्। तस्याः जिह्वेन्द्रियः तच्चुम्बनस्य रसं न अगृह्णात् । सम्प्रति तस्य स्पर्शः तस्याः अस्थिसञ्चयमपि अस्पृशत्। तस्याः हृदयसञ्चलने एव स्थितिः(क्रमः) आसीत्। अवशिष्टेषु सर्वेषु अपि अणुषु प्रलयः अजायत। चक्षुःश्रोत्रघ्राणजिह्वेन्द्रियाणां ज्ञानं सर्वमपि त्वगिन्द्रिये लीनम् अभवत्। सः च त्वगिन्द्रियः स्वस्य परिमितिं विहाय "सा" इति शब्देन उच्यमानं पदार्थं सर्वमपि व्याप्नोत्।

तदा घनीभूतस्य हिमस्य आलिङ्गनमिव चैतन्योष्मणा विरहितः तस्याः परिष्वङ्गः वीरभूपतिना अज्ञायत। झटिति सः प्रबुद्धः अभवत्। समनन्तरम् इहलोकज्ञानमपि उदपद्यत। आत्मा स्थानापतिः, सा च सा युवतिः यस्यां षड्वर्षेभ्यः प्राक् आत्मा प्रीतिमान् अभवत्। तस्याः नाम वा, किमर्थं सा अत्र स्थिता इति वा आत्मना न ज्ञायते। तत्क्षणम् आत्मना कृतः अपराधः सम्पूर्णतया तस्य मनसि अस्फुरत्। सः दिग्भ्रान्तः अभवत्। पूर्वस्मिन् क्षणे महानन्दम् अनुभवन् सः उत्तरस्मिन् क्षणे महासंशयाविष्टः अजायत। सा निश्चेतना अलक्ष्यत। मूर्छिता वा ? मृता वा ? वीरभूपतिः उद्विग्नः अभवत्।

बहिः नाटकम् अन्तम् आगतम्। मीनाक्षी परावृत्य अपश्यत्। एकवीरा तत्र न आसीत्। सा त्वरमाणा उपरिभूमिकां अगच्छत्। एकवीरा शयनागारे अपि न

आसीत्। पुनः नीचैः गमिष्यमाणा मीनाक्षी "अत्र अपि पश्येयम्" इति चिन्तयन्ती अन्यां कक्ष्यां प्राविशत्। तत्र एकवीरा भूमौ पतिता आसीत्, तस्याः निकटे स्वस्याः पतिः विषण्णवदनः अतिष्ठत्। मीनाक्षी एकवीरायां स्वपत्युः पूर्वप्रणयिनीरूपं प्रागेव अभिज्ञातवती। किन्तु न कदापि सा भर्त्रे अकथयत्। एकवीरायाः स्थितिं पश्यन्त्याः मीनाक्ष्याः मनसि बह्वः शङ्काः उदपद्यन्त।

तां दृष्ट्वा वीरभूपतिः अतिदीनः तत्क्षणं तस्यै सर्वं वृत्तं न्यवेदयत्। असम्भवः कः अपि अर्थः तस्य वचने वा, अयथार्थं किमपि वस्तु तस्य वदने वा न अलक्ष्यत। मीनाक्षी एकवीरां प्रबोधयितुम् अयतत। तस्याः स्पर्शेन एकवीरायाः हृदयात् उष्णः रुधिरः नालेषु प्राबहत्। तस्याः त्वक् उष्णतां प्राप्नोत्, निःश्वासः अचलत्, अक्षिणी उन्मीलिते अभूताम्, श्रोत्रे शब्दम् अश्रुण्वातां, सर्वेन्द्रियज्ञानम् अजायत। तस्याः मनः सहस्रधा अधावत्। सा त्वरमाणा उत्थाय लज्जावनतवदना मीनाक्ष्याः पृष्ठतः अतिष्ठत्। चन्द्रातपे दीपस्य समीपे न्यस्तस्य वस्तुनः द्वे छाये भवेताम्। एका सान्द्रा दीपकल्पिता छाया, अपरा च श्लक्ष्णा चन्द्रातपकल्पिता छाया। ते द्वे स्त्रियौ वीरभूपतेः द्वे छाये। मीनाक्षी दीपच्छाया, एकवीरा च चन्द्रिकाच्छाया। बहिः नाटकं समाप्तम् अभवत्।

23

दिग्भ्रान्ताः ते त्रयः कञ्चित्कालं तथैव अतिष्ठन्। यान्ती एकैका लिप्ता एकवीरावीरभूपत्योः एकैकः महायुगः इव महाभारयुतः आसीत्। वीरभूपतिः कः इति एकवीरा किञ्चिदिव अजानात्, न तु निश्चयेन। वीरभूपतिः तु किमपि न अजानात्। मुहूर्तात् अनन्तरं सः कथमपि वाचं व्यवस्थाप्य मीनाक्षीं प्रष्टुम् उद्यतः अभूत्। तस्य अभिप्रायं ज्ञात्वा मीनाक्षी – "एकवीरा कुट्टान सेतुपतेः पत्नी" इति तस्मै अकथयत्। वीरभूपतिः वज्राहतः इव अभवत्। उच्चैः आक्रोशन्, भूमौ पतितवत् निषण्णः, "हा! हन्त!" इति शोचन् अवनतवदनः हस्तेन शिरसि बलात् अताडयत्। उत्तरक्षणे सः विगतस्मृतिः अभवत्।

अनया घटनया एकवीरा सर्वम् अवगतवती। मीनाक्षी च तस्यै सविस्तरम् अकथयत् "एषः मे भर्ता स्थानापतिः, कुट्टान महाराजस्य प्राणमित्रं च।

एकवीरे! विचित्रः एषः संयोगः। विवाहात् पूर्वं त्वम् अस्मिन् अनुरक्ता आसीः, अहं च कुट्टान सेतुपतौ। तौ द्वौ अपि आवयोः अनुरक्तौ आस्ताम्। किन्तु दैवेन व्यत्यासः सङ्घटितः, तौ द्वौ च परममित्रे अभूताम्। ते भर्ता मां स्वसुहृदः पत्नीं विज्ञाय, स्वस्य प्रेमबन्धं छित्वा, मयि सोदरीवात्सल्यं अकल्पयत्। त्वद्गेहं प्रति मे गतागतानां तत् एव हेतुः।

तपस्वी सः कुट्टानः तस्मात् दिनात् प्रभृति त्वयि प्रीत्या परिभ्रमन् आसीत्। किन्तु राजकार्याणि त्वत्तः तं दूरे अस्थापयन्। प्रेमोद्वेगी सः अद्य वा श्वः वा आगमिष्यति। यतः उदयन सेतुपतिवर्यः दिनचतुष्टयात् प्रागेव रामनाथं प्रस्थितः। तव अन्तःपुरवर्तनात् वीरभूपतिः एतावन्तः वर्षान् त्वमेव कुट्टानस्य पत्नी इति न अजानात्। ततः एव अद्य एषः विचित्रः संयोगः सङ्घटितः। एकवीरे! त्वम् ईदृशी उद्वेगप्रणयिनी असि।"

मीनाक्ष्याः अन्तिमवचांसि एकवीरा न अश्रुणोत्। आत्मनि कुट्टानः अतीव प्रीतिमान् अभूत् इति, सः अद्य वा श्वः वा आगमिष्यति इति च श्रुण्वन्त्याः तस्याः नयनयोः किमपि विचित्रं सञ्चलनं उदपद्यत। मीनाक्षी किमपि वदन्ती एव आसीत्। एकवीरा तु सर्पिणी इव वेगेन उपरिभूमिकाम् अवरुह्य, बहिः गत्वा कल्याणमण्डपस्य पुरतः अतिष्ठत्। तावता सर्वे भागवताः गताः। जनसम्मर्दः च बहुधा क्षीणः अभवत्। अर्चकाः देवतामूर्तीः ततः आलयं नेतुं यत्नं कुर्वन्तः आसन्। एकवीरा प्राग्दिशाम् आलोकयत्। भगवान् घर्मांशुः रक्तान् तप्ताङ्गरान् उद्वमन् इव आसीत्। सा भीता लोचने न्यमीलयत्। सा स्वदेहे एकैकः अणुः वीरभूपतेः स्पर्शसुखचिह्नैः अङ्कितः अभवत् इति अमन्यत।

यदा सा नयने उदमीलयत् अश्वपालकस्य पुत्री अमृता तस्याः अग्रे अतिष्ठत्। तस्याः केशानि अपरिष्कृतानि, वस्त्रं मलिनं, कञ्चुलिका न धृता, नेत्रे च अरुणे। इतः पूर्वं दूरे प्राग्दिशि द्योतमानः रविबिम्बः अस्याः बालिकायाः रूपेण आत्मनः समीपम् आगच्छत् इति सा अचिन्तयत्। आपादमस्तकं कम्पमाना सा पुनः लोचने न्यमीलयत्। एकस्य अक्ष्णः पुरतः भानुबिम्बः अपरस्य पुरतः सा बालिका च अदृश्येताम्। तौ द्वौ अपि तस्याः शरीरे प्रविशन्तौ इव अलक्ष्येताम्। तस्याः नेत्रे अघूर्णताम्। तत् असहमाना सा लेचने उन्मील्य प्राग्दिशं वा अमृतां वा अपश्यन्ती देवं सुन्दरेश्वरम् अपश्यत्।

बहोः कालात् भगवतः एकः सङ्कल्पः आसीत्। तस्मिन् दिने नाटकप्रदर्शनेन देवस्य सः सङ्कल्पः उत्तेजितः अभवत्। भगवतः नयनानि – यस्मिन् मनसि सङ्कल्पविकल्पाः सहस्रमुखाः विजृम्भेरन् तस्य मनसः प्रतीक्षां कुर्वन्ति आस्ताम्। तस्मिन् समये एकवीरायाः मनसि सङ्कल्पविकल्पाः शतसहस्रमुखैः विजृम्भन्तः आसन्। एकवीरायाः अक्षिणी भगवतः लोचनैः अमिलताम्। तया दृष्ट्या देवः ताम् आविष्टवान्। एकवीरा भगवतः आवेशभारं सोढुम् अशक्ता मूर्छिता अभवत्। अर्चकाः भगवतः उत्सवमूर्तिं ततः चालयितुम् अक्षमाः जाताः।

राबर्ट्.डि.नोबिलि नामकः पोर्चुगीसक्रैस्तवमतव्यापकः सन्न्यासिवेषं धृत्वा "तत्त्वबोधकस्वामी " इति नाम गृहीतवान्। सः अज्ञानिनः सामान्यजनान् मतान्तरे परिवर्तयन्, विग्रहाराधनं च दूषयन् आसीत्। गतेषु चतुर्षु वत्सरेषु तेन क्रियमाणं तत्कार्यं भगवान् अनुमोदितवान्। अद्य तस्य प्राबल्यं मर्यादाम् अतिक्रान्तम्। अतः तस्य कर्म परिसमापयितुं चोक्कनाथ शिवस्य आज्ञा जाता। भगवतः सा आज्ञा एकवीरायां प्रतिध्वनिता अभवत्। अतः सा प्रकृतिमागत्य उदतिष्ठत्। भगवान् च अचलत्। तां परितः जनसमूहः समागतः।

एषा वार्ता च पुरे सर्वत्र व्याप्नोत् "कापि अन्तःपुरस्त्री, सौन्दर्येण अप्सराः, अवकुण्ठनं विना देवम् अनुगच्छति" इति। जनाः तस्याः सैन्दर्यं, तस्याः नयनयोः अगाधतां च प्रशसन्तः आसन्, तां दृष्ट्वा भीताः च अभवन्। सर्वे चोक्कनाथ शिवस्य मन्दिरद्वारं प्राप्नुवन्। भगवतः कल्याणोत्सवार्थं तत्र विशालः तालपत्रमण्डपः निर्मितः। एकवीरा तत्र अतिष्ठत्। भगवतः उत्सवविग्रहं वहन्तः वाहकाः च अतिष्ठन्। दूरे जनसन्दोहः निबिडः जायमानः आसीत्। एकः यामः अतीतः। वीरभद्र भट्टरः तेन सह चतस्रः दास्यः च आगत्य तस्यै नमस्कारम् अकुर्वन्। सा किमपि न अवदत्। दास्यः "स्वामिनि! किमेतत् ? एहि यास्यामः" इति अवदन्। सा अन्यतः अवालोकयत्। मीनाक्षी आगत्य "आयाहि, गृहं गच्छामः। किं अन्तःपुरस्त्रियः एवं वीथीषु विचरन्ति ? किमर्थम् एवम् अनुचितं प्रवर्तसे" ? इति अवोचत्। एकवीरा भ्रूभङ्गम् अकरोत्। कः अपि तां बलात् नेतुं न अयतत। सा कमपि प्रतीक्षन्ती इव अलक्ष्यत।

का अपि राजस्त्री अन्तःपुरं परित्यज्य, उन्मत्ता इव वीथीषु परिभ्रमति इति

वार्ता नोबिलिना अश्रूयत। सः स्वमतम् अनुसरन्तः कतिचन शिष्यान् नीत्वा – पक्षी जाले बद्धः इति जानन् व्याधः इव धावन् तत्र आगच्छत्। यामद्वयम् अतीतम्। चोक्कनाथ सुन्दर शिवस्य नेत्राग्निः सातिशयं ज्वलन् आसीत्। नोबिलिः जनान् हस्ताभ्याम् अपसारयन् मण्डपस्य अन्तः आगतवान्। एकवीरा उन्मीलितनयना तम् अपश्यत्। नोबिलिः तां दृष्टिं सोढुं न अशकत्। एकवीरा मन्दहासम् अकरोत्। नोबिलिः कथमपि आत्मानम् संस्थापितवान्। जनसमूहः निश्शब्दः अभवत्। सूचीपतनस्य अपि शब्दः श्रूयमाणः इव आसीत्।

ततः एकवीरायाः नोबिलेः च मध्ये वाग्वादः प्रावर्तत।

तत्र एकवीरा नोबिलेः पक्षं खण्डयित्वा स्वस्याः मतम् अस्थापयत्।

अन्ते एकवीरा स्वस्याः वादम् एवं परिसमापयत् "लोके सर्वत्र अपि जनसामान्यं वर्तते, समाजे उन्नतं स्थानम् अधिवसन्तः जनाः अपि वर्तन्ते। सर्वेषाम् एतेषां विवेकः समानः न भवति। देशः कः अपि वा भवतु, तत्रत्यस्य जनसामान्यस्य मतविषये वा, सारस्वतादि विषयेषु वा सविशेषं ज्ञानं न विद्यते। कः अपि किमपि कथयेत्, ते सामान्यजनाः तत् वेदवाक्यम् इव शिरसा वहन्ति। विद्यासम्पन्ने अपि समाजे अवश्यं केचित् मूढाः स्युः। तादृशजनान् त्वं त्वन्मतानुयायिनः करोषि। वस्तुतः निरर्थकस्य एतत्कार्यस्य साधनेन गर्वितः मा भूः।

अन्यत् एकं कथयामि। व्युत्पन्नता न कस्य अपि स्वकीयं धनं भवति। तत्तद्वेलायाः विशेषम् अनुसृत्य व्युत्पन्नमतेः अपि बुद्धिः कुण्ठीभवति। कस्याञ्चित् सन्तोषवेलायां मन्दबुद्धिः अपि जगद्विजेता इव भाषते। महावीरः अर्जुनः अपि कदाचित् कर्णं दृष्ट्वा भीतः अभवत्। सः तद्वेलायाः विशेषः।

किञ्च – एकैकस्य वादस्य प्रतिवादः अपि अस्ति। तीव्रतरवादिना केनापि खण्डयिष्यमाणानां सिद्धान्तानां प्रतिपादनेन किं प्रयेजनम् ? लोके सर्वे अपि मूढाः भूत्वा यदि कमपि नीचमतम् अनुसरेयुः, तन्मतेन किं प्रयोजनम् ? अद्य शतशः जनाः भवन्मतम् अनुसरन्ति। श्वः यदि कः अपि भवतः बलवत्तरः आगच्छेत् तर्हि सर्वे तस्य मतम् अनुसरिष्यन्ति। एषः वृथाप्रयासः। महाज्ञानी

स्वयं स्वस्य मोक्षं साधयति।

सनातनः वैदिकधर्मः बहुभ्यः युगेभ्यः अपि अप्रतिहतः स्थिरः च आसीत्। भवन्मतस्य प्राबल्यं बौद्धमतप्राबल्येन तुलयित्वा पश्य। देशे सर्वत्र व्याप्तं, सर्वात्मना वृद्धिं गतं च तत् मतं जगद्गुरुः आदिशङ्कराचार्यः नखाग्रेण निर्भेदयामास। अस्मिन् देशे वैदिकमतात् इतरेषां सर्वेषामपि मतानां सा एव स्थितिः। प्राक् उत्तरदेशे चैतन्यमीराबायीप्रभृतयः, पश्चिमे रामदासशिवाजीप्रभृतयः, प्राच्यां विद्यारण्याः च उदित्वा भगवतः परमशिवस्य प्रीतिं अकुर्वन्।

यदि यूयं युष्माकं मतप्रचाराय एवमेव प्रयतेयुः तर्हि युष्माकं मतम् उन्मूलयितुं कश्चित् जनिष्यते। अविवेकिषु अपि केवलं केषांचित् एव मनः आवर्जयितुं समर्थं मतं लोकवञ्चनायै कल्पते न तु ब्रह्मप्रीत्यै। भगवद्गीताम् अधीहि। यदा यदा हि धर्मस्य ग्लानिर्भवति भारत अभ्युत्थानम् अधर्मस्य तदात्मानं सृजाम्यहम्।" एकवीरायाः कण्ठध्वनिः क्रमेण उच्चतरः अभवत्। नेत्रे विस्फुलिङ्गानि व्यकिरन्। सा आपादमस्तकं विचलिता अभवत्। "सृजाम्यहम् " इति पठन्ती एव सा मूर्छिता भूमौ अपतत्। भानुः अस्तं गमिष्यन् आसीत्। दास्यः, वीरभद्र भट्टरः, मीनाक्षी च तां गृहम् अनयन्।

अर्धं पुरस्य तत्रैव अवर्तत। सूर्योदयात् प्रभृति ते जनाः किमपि न अश्रुवन्। डि.नोबिलिः तत्र स्थातुं न अपारयत्। जनानां निन्दावाक्यानि श्रोतुं अक्षमः सः अवनतशिरस्कः कुत्रापि अगच्छत्। गतेषु चतुर्षु वर्षेषु तेन निर्मितं सौधं तस्मिन् दिने शिथिलम् अभवत्। तस्य शिष्याः सर्वे एकैकस्यां दिशि अगच्छन्। जनाः अपि सन्ध्यातिमिरे परस्परं प्रणुदन्तः गृहाणि अगच्छन्। स्वपुत्री भर्तुः जीवितं सुखमयं कुर्यात् इति आशयेन एकवीरायाः मात्रा तस्यै अध्यापिता विद्या श्रीसुन्दर चोक्कनाथ शिवस्य उपयुक्ता अभवत्।

24

परस्मिन् दिने एकवीरा विलम्बेन जागृता अभवत्। सुप्तोत्थितायाः तस्याः

स्मृतिपथम् आगतः प्रथमः विषयः वीरभूपतेः परिष्वङ्गः। अपगते अपि तदालिङ्गनपारवश्ये तद्गता का अपि महानुभूतिः तस्याः सर्वावयवेषु रक्तनालेषु च व्याप्ता इव अलक्ष्यत। द्वितीयः विषयः तीव्रा बुभुक्षा। पूर्वस्मिन् दिने किं वृत्तमिति सा न अस्मरत्। परिचारिकाः उष्णोदकेन सुगन्धद्रव्यैः च ताम् अभ्यञ्जनस्नानम् अकारयन्। दीर्घं तस्याः केशपाशं मार्जयित्वा, अगुरुधूपेन वासितम् अकुर्वन्। शरीरं सुगन्धद्रव्यैः अनुलिप्य, दुकूलानि अधारयन्। सुकुमाराणि, लघूनि, मधूराणि च खाद्यानि अखादयन्। शरीरं परिमितैः आभरणैः अमण्डयन्।

तावत् एकः सेवकः धावन् आगत्य कुट्टान महाराजः आगच्छति इति न्यवेदयत्। एतावता सः नगरद्वारं प्राप्तः स्यात्। सः पत्न्यै स्वप्रेमचिह्नम् एकं रमणीयं सुवर्णहारं प्रेषितवान्। यदा सः तां द्रष्टुम् आगमिष्यति तदा सः हारः तया धृतः भवेत्। एवमुक्त्वा सः श्वेतोरगः इव तलतलायमानं तं हारं प्रायच्छत्। एका दासी तं स्वीकृत्य एकवीरायाः कण्ठे विन्यस्तवती। एकवीरा तं न निराकृतवती। तस्याः मुखे अङ्गीकृतिः अपि न आसीत्। सः हारः तस्याः काञ्चीप्रदेशपर्यन्त लम्बमानः अभवत्। यदा तस्य सूत्रं तस्याः कण्टे कञ्चुकेन अनाच्छादितं प्रदेशं अस्पृशत्, सः स्पर्शः विषलिप्तायाः खड्गधारायाः स्पर्शः इव ताम् अबधात। तं सोढुं अक्षमा सा गृहस्य पश्चाद्भागस्थम् उद्यानम् अगच्छत्। तत्र छिन्नपत्रस्य केवलम् उद्गच्छता एकेन शुक्लवर्णकोमलपत्रेण शिष्टस्य कदलीवृक्षस्य मूले अतिष्ठत्। त्रयः यामाः अतीताः। सा ततः न अचलत्। कतिचन परिचारिकाः तया सह भाषितुम् अपि भीताः अभूवन्।

फेनम् उद्गिरद्भिः तुरगैः युक्तात् रथात् कुट्टानः अवातरत्। स्नातः अभवत्। यावत् सः स्नानम् अकरोत् तावत् सः एकवीराम् अधिकृत्य एव पृच्छन् आसीत्। दास्यः पूर्वस्मिन् दिने एकवीरया कृतं सर्वं अकथयन्। सः आश्चर्यचकितः अभवत्। अल्पाहारम् अश्नन् अपि सः एकवीराम् अधिकृत्य एव पृच्छन् आसीत्। का अपि दासी एकवीरायाः अन्तःपुरं परित्यज्य बहिः गमनस्य विषये तस्य अभिप्रायम् अपृच्छत्। कुट्टानः प्रत्युत्तरं न अदात्। तस्य हृदये एकवीरा देवतामूर्तिः इव अलक्ष्यत। सः पीतवर्णं दुकूलं धूम्रवर्णसूत्रेण सौवर्णसूत्रेण च तत्र तत्र रचितपुष्पाकृतिं पीतवर्णम् उत्तरीयं य धृतवान्। केशेषु सुगन्धयुक्तं मन्दारतैलम् अञ्जित्वा कर्पूरवासनाः विकिरन्तं ताम्बूलम् असेवत। तावत्पर्यन्त

सः एकवीराम् अधिकृत्य एव पृच्छन् आसीत्। एका दासी एकवीरायाः ज्ञानेन सर्वे आश्चर्यचकिताः अभूवन् इति अकथयत्। कुट्टानस्य मनसि अनुरागप्रवाहः छिन्नबन्धनः अभवत्। दिनस्य यामत्रयम् अतीतम्। कुट्टानः एकवीरां द्रष्टुं तस्याः प्रकोष्ठम् अगच्छत्। सा तत्र न आसीत्। का अपि परिचारिका सा गृहस्य पश्चादङ्गणे अस्ति इति अकथयत्। सः धावन् तत्र अगच्छत्।

एकमात्रकोमलपत्रयुक्तस्य कदलीवृक्षस्य मूले अतिष्ठत् एकवीरा। तस्याः कण्ठे आत्मना प्रहितः स्वर्णहारः आतपे धगद्धगायते। सौदामनीगर्भितं सितमेघम् अलङ्कुर्वाणा शरल्लक्ष्मीः इव सा कुट्टानस्य नयनयोः प्रीतिम् अकरोत्। कुट्टानः सपदि गत्वा ताम् आलिङ्गितुं ऐच्छत्। एकवीरायाः वदनं विषण्णमासीत्। कुट्टानः ताम् उत्साहयितुकामः स्मितम् अकरोत्। एकवीरायाः मुखं विकृतम् अजायत। कुट्टानः तस्याः समीपम् अगच्छत्। एकवीरा पृष्ठतः अपासरत्।

कुट्टानस्य अक्ष्णोः प्रीतिः अवर्षत्। तस्याः नयनयोः भीतिः अद्योतत।

कुट्टानः भाषितुम् ऐच्छत्। न सा परकीया। इतःपूर्वमेव आत्मनि अनुरक्ता। किन्तु आत्मा तस्यां प्रीतिमान् न आसीत्। सम्प्रति सा प्रीतिः सर्वतोमुखम् उपचिता अभूत्। "अपि कुशलिनी वर्तसे" ? "किं करोषि"? इत्यादीनां प्रश्नानाम् इदं अस्थानम्। आत्मनः अनुरागं व्यञ्जयितु एका एव चेष्टा अलम्। सा च चेष्टा गाढपरिष्वङ्गः। सः भाषितुम् अशक्तः अभवत्। तस्य नेत्रयोः अश्रूणि अजायन्त। सः एकं पदम् अग्रे न्यधात्। एकवीरा आत्मना शस्त्वा तम् अवारयत्।

कुट्टानः अतिष्ठत्। एकवीरा अरोदीत्। कुट्टानः पुनः एकं पदम् अग्रे न्यस्तवान्।

एकवीरा "मां मा स्पृश। यदि त्वं मां स्पृशेः तर्हि अहं मरिष्यामि" इति अवदत्। तस्याः एतानि वचांसि कुट्टानस्य श्रोत्रयोः न अपतन्। तस्य कण्ठः विवृतः अभवत्। परम्परया बहवः प्रश्नाः तस्य मुखात् बहिः निस्सृताः। "इयती विद्या भवत्या कदा अधीता ? सः क्रैस्तवसन्न्यासी त्वत्सन्निधौ किमपि वक्तुम् अशक्तः अभवत् इति श्रूयते। अन्तःपुरं परित्यज्य बहिः गन्तु कथं धृष्णुयाः ? किं देवः सुन्दरेश्वरः त्वाम् आविष्टवान्? ह्यः अपि वा न आगतं मया। यदि ह्यः आगच्छं तव विजयेन प्रीतः अभविष्यम्"।

ततः सः अन्यं प्रसङ्गम् आरब्धवान्। "अहम् एतावत्पर्यन्तं त्वयि अनुरक्तः न अभवम्। तदर्थं मां क्षमस्व। तत्र हेतुम् अपि तुभ्यम् अकथयम्। मासचतुष्टयात् पूर्वं सः हेतुः अहेतुः संवृत्तः। किन्तु दुर्विधिः मां मथुरायाः अद्रावयत्। अकस्मात् त्वां समागत्य महान् आनन्दः प्राप्तव्यः इति मम मनसि आशा अजायत। तयैव आशया अहं त्वां प्रति एकं पत्रम् अपि न अलिखम्। मम सुहृदः वीरभूपतेः पत्नी मीनाक्षी...." इत्थं वदति कुट्टाने एकवीरा ततः धावितुम् आरभत। सा बहिर्द्वारं प्राङ्गणं च अतीत्य अगच्छत्। कुट्टानः ताम् अन्वसरत्। तदानीं दिनस्य अर्धयामः अवशिष्टः। वीथिं प्रविष्टा एकवीरा शिरः उन्नमय्य अपश्यत्। अग्रे देव्याः मीनाक्ष्याः आलयशिखरस्य सुवर्णकवचः आतपे धगद्धगायमानः आसीत्। तावता कुट्टानः आगत्य तां समागच्छत्।

कुट्टानः – "कुत्र गच्छसि" ?

एकवीरा – "वैगैनदीं गच्छामि"।

कुट्टानः– "किमर्थम्"?

एकवीरा – "मयि महत् कलुषं विद्यते । तत् अहं क्षालयितुम् इच्छामि"।

अश्वपालकस्य पुत्री अमृता मृष्टकेशा अधोवस्त्रं कञ्चुकं च धृत्वा पाठशलावसाने गृहं प्रतिनिवर्तन्ती "धर्मं चर , मा कुपः" इति उन्मत्ता इव गायन्ती आगच्छत्। सा एकवीरां दृष्ट्वा भीता पलायितुम् आरभत। एकवीरा अपि पुनः धावितुम् आरब्धा। कुट्टानः ताम् अन्वसरत्। वैगैनदी नयनगोचरा अभवत्। एकवीराकुट्टानयोः मध्ये शतहस्तमात्रं अन्तरम् आसीत्। एकवीरा वायुवीची इव लघु धावन्ती आसीत्, कुट्टानः तु पर्वतः इव चलितुम् अक्षमः अजायत। एकवीरायाः अभिमुखं कश्चन सन्न्यासी आगच्छन् आसीत्। तं दृष्ट्वा सा वेपमाना नयने हस्ताभ्यां पिहिततवती। सः तु तस्याः दिशि अपि न अपश्यत्। ताम् अतीत्य सः शनैः कुट्टानस्य समीपम् आगच्छति स्म। कुट्टानः अपश्यत् यत् एकवीरा धावनात् विरम्य तत्र अतिष्ठत्। सः सन्न्यासिनम् अपश्यत्। तं दृष्ट्वा कुट्टानः महाश्चर्याहतः इव देहं पश्चात् अचालयत्। सन्न्यासी शिरः न उन्नमितवान्। कुट्टानः तम् अपृच्छत् "वीर! किमेतत् " ?

सन्न्यासी शिरः उन्नम्य अग्रे कुट्टानम् अपश्यत्। वीरभूपतेः नयनयोः उद्गच्छन्तः अश्रुबिन्दवः पश्चात् निवर्तिताः अभवन्। कुट्टानस्य मनसि अनेकाः ऊहाः अजायन्त। आत्मनः मीनाक्ष्याः च अनुरागः एव वीरभूपतेः सन्न्यासस्य हेतुः इति मत्वा "स्थानापते! न मर्षितवान् असि " इति अवदत्। वीरभपतेः नेत्रयोः करुणा अलक्ष्यत।

दूरे एकवीरा पुनः गच्छन्ती आसीत्। कुट्टानः वीरभूपतिं विसृज्य पुनः ताम् अन्वसरत्। सम्प्रति एकवीरा चलितुम् अशक्ता अभवत्, कुट्टानः तां समागतवान्। वैगैजलप्रवाहसन्निकृष्टा सा, ईषत् दूरे सः द्वौ अपि एकहस्तमात्रेण अन्तरेण अतिष्ठताम्। कुट्टानः कुपितः अभवत्।

कुट्टानः – "यदि त्वम् एकमपि पदम् अग्रे गच्छसि, त्वां बलात् गृहं नेष्यामि"।

एकवीरा न अचलत्। तत्र स्थित्वा अत्मनः वीरभूपतेः च प्रणयवृत्तान्तं, पूर्वस्मिन् दिने संवृत्तं तस्य विचित्रपरिणामं च तस्मै सविस्तरम् अकथयत्। आत्मनः देहे एकैकः कणः वीरभूपतेः स्पर्शं सम्प्रति अपि अनुभवति इति, सः विजातीयम् अन्यस्पर्शं सोढुं न पारयिष्यति इत्यपि च अकथयत्। कुट्टानः अन्तिमानि एतानि वाक्यानि न श्रुण्वानः चिन्तामग्नः अजायत।

प्रतीच्यां दिशि लोकबान्धवः अस्तम् एष्यन् आसीत्। विचित्रत्वेन तमांसि, रक्तकान्तयः च युगपत् लोकम् अवातरन्। एकवीरा प्रागभिमुखी आसीत्, कुट्टानः च पश्चिमाभिमुखः। अतः एकवीरायाः मुखे अन्धकारः व्याप्नोत्, कुट्टानस्य च मुखे आलोकः।

अन्ते कुट्टानः अवदत् "एषः एकः अद्भुतः कथामण्डपः। अस्य – आवां द्वौ, मीनाक्षीवीरभूपती च चत्वारः स्तम्भाः"

एकवीरा तम् एकं विचित्रं प्रश्नम् अपृच्छत् "किं त्वम् अग्रे अपि मयि अनुरक्तः भविष्यसि"? एवं पृच्छन्त्याः तस्याः मुखात् मन्दः हासः अश्रूयत। तपस्वी कुट्टानः – आत्मा सम्प्रति अपि तस्याम् अनुरक्तः एव इति वचोभिः कथयितुं न अशकत्। सः प्रेम्णा विचिलतः अभवत्। प्रणयप्रवाहः तम् अप्लावयत्।

अकस्मात् कुट्टानस्य बाहू तस्याः देहं पर्यवेष्टयताम्। तावत्पर्यन्तं श्रूयमाणः


वैगैतरङ्गाणां ध्वनिः वा, वहतः वायोः रिव्विति शब्दः वा तया न अश्रूयत। तस्याः नेत्रे अन्धकारं पश्यती आस्ताम्। तस्याः घ्राणेन्द्रियः वायौ कमपि कषायगन्धम् उपालभत। तस्याः त्वगिन्द्रियः चैतन्यभ्रष्टः अभवत्।

सः तां स्ववक्षसि अकरोत्। तस्याः नेत्रयोः दृष्टिः अपगता। तस्याः देहे रुधिरप्रवाहः प्राणवायुं सोढुम् अक्षमः अभवत्। तत् रुधिरं सर्वं मृत्योः स्पर्शेन जायमानं शैत्यम् आप्नोत्।

सः तां गाढम् आलिङ्गितवान्। तस्याः नासारन्ध्रयोः श्वासः न अचलत्। मुखं ईषत् विवृतमभवत्, नाडीस्पन्दः निश्चलः अजायत।

सः तस्याः अधरम् अधरेण अस्पृशत्। तस्याः हृदये प्राणवायुः स्तम्भितः आसीत्।

एतत् सर्वं निमेषावधिकाले एव संवृत्तम्। तावता कुट्टानः प्रबुद्धः अभवत्। आत्मनः आलिङ्गने स्थितं निर्जीवपदार्थं सः पश्चात् अपसारितवान्। सः जानुदघ्ने वैगैजले पतन् शब्दम् अकरोत्। अन्धकारे व्याप्ते कृष्णवर्णवस्त्रेण आच्छन्नः गतप्राणी इव वैगैनदी अवहत्।



Shree Somnath Sanskrit University - Veraval

Pin - 362 266, Gujarat, India. Ph. : 02876 - 244532 Fax : 244417

e-mail : sssu.veraval@gmail.com, www.shreesomnathsanskrituniversity.info